FJAB-05
फलितज्योतिषम्, आचार्यसेतुः
पञ्चमपत्रम्

मुक्तस्वाध्यायपीठम्
(Institute of Distance Education)
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)

बृहत्संहिता

खण्डः
२

राह्वादिग्रहचारवर्णनम्

मुक्तस्वाध्यायपीठम्
(Institute of Distance Education)
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)

FJAB-05
बृहत्संहिता

फलितज्योतिषाचार्यसेतुः
पञ्चमपत्रम्

खण्डः

२

राह्वादिग्रहचारवर्णनम्

षष्ठः पाठः ०५=२१

सप्तमः पाठः २२-४३

अष्टमः पाठः ४४-६४

नवमः पाठः ६५-७७

दशमः पाठः ७८-९६

एकादशः पाठः ९७-११२

द्वादशः पाठः ११३-१२६

प्रधानसम्पादकः

प्रो॰ ए. पी. सच्चिदानन्दः
कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

पाठलेखनम्

डॉ. अवधेशश्रोत्रिय
अंशकालिक सहायकाचार्यः
रा.सं.सं. (मा.वि.)
भोपालपरिसरः (म.प्र.)
(०६ पाठः)

श्री प्रवेशव्यासः
अंशकालिक सहायकाचार्यः
रा.सं.सं. (मा.वि.)
जयपुरपरिसरः (राजस्थानम्)
(०७-०८ पाठौ)

विजयलक्ष्मीकर
कनिष्ठशोध अनुसन्धाता:,
श्री सदाशिवपरिसरः,
पुरी (उड़िसा)
(०९ पाठः)

अरविन्दशर्मा
कनिष्ठशोध अनुसन्धाता:,
श्रीला.ब.शा.सं.वि.,
देहली
(१० पाठः)

डॉ. निगमपाण्डेयः
अंशकालिक सहायकाचार्यः
रा.सं.सं. (मा.वि.)
रणवीरपरिसरः (जम्मू)
(११-१२ पाठाः)

सम्पादनम्

डॉ. शत्रुघ्नत्रिपाठी
वरिष्ठसहायकाचार्यः, ज्योतिषविभागः
सं.वि.ध.वि.संकायः, का.हि.वि.वि., वाराणसी

प्रबन्धसम्पादकः

डॉ. बिनोदकुमारसिंहः
कुलसचिवः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

पाठ्यक्रमसंयोजनम्

डा. श्यामदेवमिश्रः
वरिष्ठसहायकाचार्यः, मु.स्वा.पीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रकाशनम्

डा. रमाकान्तपाण्डेयः
निदेशकः, मुक्तस्वाध्यायपीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रकाशनवर्षम् : २०१४, पुनर्मुद्रणम् : २०१५

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

सर्वाधिकारः सुरक्षितः। नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य लिखितरूपेणानुमतिम् अप्राप्य येन केनापि माध्यमेन अस्याः पाठ्यसामग्र्याः कञ्चिदप्यंशं पुनः प्रस्तोतुम् अनुमतिः नास्ति।

प्रयुक्तकागदम् - Agro-based environment Friendly.

पृष्ठविन्यासः

राजीवकुमारसिंहः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

श्री दीपककुमारमुदगलः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

खण्ड-परिचयः

ज्योतिषाचार्यसेतुपाठ्यक्रमस्य संहितास्कन्धस्य महत्त्वं सर्वाधिकं परिकल्प्य आचार्य-वराहमिहिरेण प्रथमतया संहितास्कन्धोऽयं परिगणितः। सिद्धान्त-होरास्कन्धयोः स्वरूपं विषयदृष्ट्या संक्षिप्तरूपेण प्राप्यते परञ्च संहितास्कन्धस्य स्वरूपम् अतीव बृहद्रूपेण दृश्यते। अत्र ग्रहचारेषु राहुचार-भौमचार-बुधचार-बृहस्पतिचाराणां अध्ययनं ज्योतिषस्य आचार्यकक्षायाः कृते अतीवमहत्वपूर्णं वर्तते। खण्डेऽस्मिन् ग्रहणे राहोः प्रभावः तस्य ग्रासादयश्च, प्रतिमासं जायमानं ग्रहणं तस्य फलञ्चोपवर्णितमस्ति। चन्द्रग्रहणं सफलं ग्रास-मोक्षाभ्यां सह अत्र प्रतिपादितं वर्तते। निमित्तकारणेष्वपि उत्पातजनितविशेषफलमपि खण्डेऽस्मिन् सारल्येन प्रतिपादितं वर्तते। प्राक् पश्चात्सिद्धान्तयोः समन्वयः, भौमचाराध्यायोक्तं उष्णमुखादिलक्षणं सफलम्, नक्षत्रसञ्चारवशात् फलम्, मेघेषु भौमस्य प्रभावनिरूपणम् इति अत्रोल्लिखितं वर्तते। बुधस्य अश्विन्यादीनां नक्षत्राणां सञ्चारवशात् शुभाशुभं फलम् उदयास्तयोः प्रभावः बुधजनितविविधयोगादीनां सलक्षणानि फलानि चात्र प्रतिपादितानि सन्ति। आकाशे उदयास्तलक्षणानि बिम्बस्य शुभाशुभनिमित्तानि फलान्यत्र वराहमिहिरेण सरलगिरा प्रतिपादितानि सन्ति। आचार्यवराहमिहिरेण प्रतिपादित-ग्रहचारपरम्परायां किं स्वरूपं वर्तते? ग्रहचारस्य क्रमः केन प्रकारेण व्यवस्थितः? इत्यस्मिन् विषये विच्चार्यते चेत् रवि-चन्द्रयोः स्वरूपपरिज्ञानानन्तरं तयोः ग्रहणं येन सम्भवति। तेन कारणेन राहोर्ग्रहचारस्य क्रमनिर्धारणं प्रासङ्गिकं विषयदृष्ट्या महत्त्वपूर्णञ्च विद्यते। इतो अग्रे भौम-बुध-बृहस्पति-शुक्र-शनिचाराणां क्रमः सामान्येन व्यवस्थितो प्रतिभाति। अत्रैकादश-द्वादशपाठयोः गुरोः सञ्चारजनितविविधशुभाशुभफलविचारः कार्तिक्यादीनां वर्षाणां सलक्षणफलानि, षष्ठिसंवत्सराणां ज्ञानपूर्वकं फलञ्च महदुपकारकं विद्यते।

एवमत्र छात्राणां कृते राहुत आरभ्य बृहस्पतिं यावत् चतुर्णां ग्रहाणां चार-स्थिति-गतिवशात् शुभाशुभफलानि सलक्षणानि प्रतिपादितानि सन्ति। संहितोक्तपदार्थेषु ग्रहचारस्य महत्त्वं सर्वाधिकं महत्त्वपूर्णं मत्वा आचार्येण आरम्भे एव प्रतिष्ठापितम्।

मन्ये यत् इदं खण्डं छात्राणामुपकाराय नूनं महत्त्वपूर्णमस्तीति।

◆

षष्ठ: पाठ: - राहुचार:

पाठसंरचना

६.१ प्रस्तावना
६.२ उद्देश्यम्
६.३ राहोर्ग्रहत्वविचारप्रतिपादने मतान्तरम्
६.४ राहुस्तत्किमिति आकाशे ग्रहवन्नोपलभ्यते इति कारणप्रतिपादनम्
६.५ राहुविषये मतान्तरम्
६.६ राहुविषये आचार्यस्य स्वमतप्रतिपादनम्
बोधप्रश्ना:
६.७ रात्रौ कुतो भूच्छाया भवति तत्कारणप्रतिपादनम्
६.८ प्रतिमासं चन्द्रग्रहणं न भवतीति कारणप्रतिपादनम्
६.९ सूर्यचन्द्रग्रहणयो: युक्तिप्रतिपादनम्
६.१० आरामोक्त-गणितोक्तयो: समत्वप्रतिपादनम्
६.११ गर्गपराशरादीनां मतखण्डनप्रतिपादनम्
६.१२ ग्रहणे ग्रासप्रमाणं दिग्ज्ञानं वेलाज्ञानञ्च
बोधप्रश्ना:
६.१३ पर्वेशविचार: तेषां फलानि च
६.१४ वेलाहीनेऽतिवेले च पर्वणि फलप्रतिपादनम्
६.१५ एकमासे चन्द्रसूर्यग्रहणयो: फलप्रतिपादनम्
६.१६ ग्रस्तोदितयो: ग्रस्तास्तयोश्चार्कचन्द्रयो: फलप्रतिपादनम्
बोधप्रश्ना:
ग्रन्थस्य मूलपाठ:
६.१७ सारांश:
६.१८ शब्दावली
६.१९ सन्दर्भग्रन्थ:
६.२० सहायकग्रन्थ:
६.२१ बोधप्रश्नोत्तराणि
६.२२ अभ्यासप्रश्ना:

६.१ प्रस्तावना

पूर्वपाठे भवान् चन्द्रचारविषये पठितवान्। चन्द्रचारे अपि चन्द्रस्य सितासितवृद्धिह्रासविषये, चन्द्रमसो नक्षत्रयोगविषये, चन्द्रमस: दशसंस्थानविषये, चन्द्ररूपफलविषये, कुजादिभिन्नशृङ्गस्येन्दो: फलविषये, सितगुरुकुजशनिबुधभिन्नबिम्बस्येन्दोश्च फलविषये, औत्पत्तिककेतुभिन्नेन्दुफलविषये, ग्रहणकाले उल्काहतस्य चन्द्रस्य फलविषये, चन्द्रमसो वर्णविषये, चन्द्रस्य क्रमवृद्धिह्रासविषये च पठितवान्। राहो: ग्रहणे महती भूमिका भवति। राहु: नाम तम: (अन्धकार:) अथवा छाया भवति, पुराणेषु राहुविषयेऽपि वर्णनं मिलति राहु: असुर: (सैंहिकेय:)। राहुविषये आचार्याणां बहूनि मतानि सन्ति। केचिदाचार्या: राहो: ग्रहत्वं स्वीकुर्वन्ति, केचिदाचार्या: सैंहिकेयाख्यं राहुं मुखपुच्छविभक्ताङ्गमुपदिशन्ति (कथयन्ति)। राहुचाराध्याय: नाम यस्मिन् अध्याये राहो: सञ्चारविषये ज्ञानं भवति। अस्मिन् पाठे भवान् राहोर्ग्रहत्वविचारप्रतिपादने मतान्तरम्, राहु किमिति आकाशे ग्रहवन्नोपलभ्यते इति कारणप्रतिपादनम्, राहुविषये मतान्तरम्, राहुविषये आचार्यस्य स्वमतप्रतिपादनम्, रात्रौ कुतो भूच्छाया भवति तत्कारणप्रतिपादनम्, प्रतिमासं चन्द्रग्रहणं न भवतीति कारणप्रतिपादनम्, सूर्यचन्द्रग्रहणयो: युक्तिप्रतिपादनम्, परम्परागणितयो: समन्वयप्रतिपादनम्, गर्गपराशरादीनां

मतखण्डनप्रतिपादनम्, ग्रहणे ग्रासप्रमाणं दिग्ज्ञानं वेलाज्ञानञ्च पर्वेशविचारः तेषां फलानि च, वेलाहीनेऽतिवेले च पर्वणि फलप्रतिपादनम्, एकमासे चन्द्रसूर्यग्रहणयोः फलप्रतिपादनम्, ग्रस्तोदितयोः ग्रस्तास्तयोश्चार्कचन्द्रयोः फलप्रतिपादनञ्चेते विषयाः पठिष्यति।

६.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान्–

- राहोर्ग्रहत्वविचारप्रतिपादने समर्थः भविष्यति।
- प्रतिमासं चन्द्रग्रहणं न भवतीति कारणप्रतिपादने दक्षः भविष्यति।
- सूर्यचन्द्रग्रहणयोः युक्तिं प्रतिपादयितुं निपुणः भविष्यति।
- ग्रहणे ग्रासप्रमाणं दिग्ज्ञानं वेलाज्ञानञ्च निरूपयितुं कुशलो भविष्यति।
- वेलाहीने अतिवेले च पर्वणि फलप्रतिपादयितुं सक्षमो भविष्यति।
- ग्रस्तोदितयोः ग्रस्तास्तयोश्च सूर्यचन्द्रयोः फलं वक्तुं समर्थः प्रभविष्यति।

६.३ राहोर्ग्रहत्वविचारप्रतिपादने मतान्तरम्

अमृतास्वादविशेषाच्छिन्नमपि शिरः किलासुरस्येदम्।
प्राणैरपरित्यक्तं ग्रहतां यातं वदन्त्येके॥

अन्वयः – एके असुरस्य अमृतास्वादविशेषात् किल इदं शिरः छिन्नमपि प्राणैः अपरित्यक्तं ग्रहतां यातं वदन्ति।

सरलार्थः – एके - केचिदाचार्या, असुरस्य - राक्षसस्य, अमृतास्वादविशेषात् - अमृतपानकारणात्, किल - निश्चयेन, इदं शिरः - एतत् मूर्द्धा (अयं मस्तकः), छिन्नमपि - निकृत्तमपि, प्राणैः - असुभिः, अपरित्यक्तम् - न परित्यक्तम् (नोज्झितम्), ग्रहतां यातम् - ग्रहत्वं प्राप्तम्, वदन्ति - कथयन्ति ।

व्याख्या – केचिदाचार्याः राक्षसस्य अमृतपानकारणात् निश्चयेन इदं शिरः छिन्नमपि प्राणैः न परित्यक्तं ग्रहत्वं प्राप्तमिति कथयन्ति।

६.४ राहुः किमति आकाशे ग्रहवन्नोपलभ्यते इति कारणप्रतिपादनम्

इन्द्वर्कमण्डलाकृतिरसितत्वात् किल न दृश्यते गगने।
अन्यत्र पर्वकालाद् वरप्रदानात् कमलयोनेः॥

अन्वयः – इन्द्वर्कमण्डलाकृतिः गगने किल असितत्वात् न दृश्यते, पर्वकालाद् अन्यत्र कमलयोनेः वरप्रदानात् न दृश्यते।

सरलार्थः – इन्द्वर्कमण्डलाकृतिः - इन्दुमण्डलस्य (चन्द्रबिम्बस्य), अर्कमण्डलस्य - सूर्यबिम्बस्य, आकृतिः - तादृगेव, राहुमण्डलस्याकृतिः गगने - आकाशे, किल - निश्चयेन, असितत्वात् - कृष्णत्वात्, न दृश्यते - न उपलभ्यते, पर्वकालाद् अन्यत्र - ग्रहणसमयादन्यस्मिन् काले, कमलयोनेः - ब्रह्मणः, वरप्रदानात् - वरदानकारणात्, न दृश्यते - न उपलभ्यते ।

व्याख्या – इन्दुमण्डलस्य (चन्द्रबिम्बस्य) सूर्यमण्डलस्य (सूर्यबिम्बस्य) च यादृशी आकृतिस्तादृगेव राहुमण्डलस्यापि आकृतिः वर्तते, पुनरपि आकाशे न दृश्यते यतोहि राहोः

कृष्णवर्णत्वात् (तमोमयः राहुः) पर्वकालाद् अन्यत्र (ग्रहणसमयादन्यत्र) ब्रह्मणो वरप्रदानकारणाद् न दृश्यते, पर्वकाले तु पुनः दृश्यते।

६.५ राहुविषये मतान्तरम्

मुखपुच्छविभक्ताङ्गं भुजङ्गमाकारमुपदिशन्त्यन्ये।
कथयन्त्यमूर्त्तमपरे तमोमयं सैंहिकेयाख्यम्॥

अन्वयः – अन्ये मुखपुच्छविभक्ताङ्गं भुजङ्गमाकारम् उपदिशन्ति। अपरे अमूर्त्तं तमोमयं सैंहिकेयाख्यं कथयन्ति।

सरलार्थः – अन्ये – अन्ये आचार्याः, मुखपुच्छविभक्ताङ्गम् – पृथगवस्थितमुख-पुच्छमध्याङ्गशून्यम्, भुजङ्गमाकारम् – सर्पाकृतिम्, उपदिशन्ति – कथयन्ति, अपरे – अपरे आचार्याः, अमूर्त्तम् – मूर्त्तिरहितम्, तमोमयम् – अन्धकारमयम्, सैंहिकेयाख्यम् – सिंहिकातनयः, कथयन्ति – वदन्ति।

व्याख्या – एके (अन्ये) आचार्याः राहुं मुखपुच्छविभक्ताङ्गं सर्पाकृतिं वदन्ति। अपरे आचार्याः मूर्त्तिरहितं अन्धकारमयं सैंहिकेयनामकं राहुं च कथयन्ति।

यदि मूर्त्तो भविचारी शिरोऽथवा भवति मण्डली राहुः।
भगणार्द्धेनान्तरितौ गृह्णाति कथं नियतचारः॥

अन्वयः – यदि राहुः मूर्त्तो भविचारी शिरोऽथवा मण्डली नियतचारो भवति तदा भगणार्द्धेन अन्तरितौ कथं गृह्णाति।

सरलार्थः – यदि राहुः मूर्त्तः – मूर्त्तिमान् (सावयवः), भविचारी – भेषु राशिषु नक्षत्रेषु वा विचरणशीलः, शिरः – शिरोमान्, अथवा मण्डली – मण्डलवान्, नियतचारः – एकत्र राशौ, तिष्ठति (भवति) तदा भगणार्द्धेन – राशिषट्केन, अन्तरितौ – व्यवहितौ (सूर्यचन्द्रमसौ), कथं गृह्णाति – कथं ग्रहणं करोति ।

व्याख्या – यदि असौ राहुः मूर्तिमान्, राशिषु नक्षत्रेषु वा विचरणशीलः शिरोमान् मण्डलवान् वा भवति अथवा नियतचारः (नियता गतिः यस्य सः नियतचारः) राहुः कथं भगणार्द्धेन राशिषट्केन अन्तरितौ सूर्यचन्द्रौ गृह्णाति? अस्य राहोः किल तिस्रः लिप्ताः (३ कलाः), एकादश विलिप्ताश्च (११ विकलाः) गणितस्कन्धोक्ताः नियता गतिः (नियता गतिः ३'/११'') वर्तते, तस्य राहोः षड्राश्यन्तरिता गतिः न सम्भाव्यते।

अनियतचारः खलु चेदुपलब्धिः संख्यया कथं तस्य।
पुच्छाननाभिधानोऽन्तरेण कस्मान्न गृह्णाति॥

अन्वयः – यदि राहुः खलु अनियतचारः चेत् तस्य संख्यया कथं उपलब्धिः भवति? पुच्छाननाभिधानोऽन्तरेण कस्मात् न गृह्णाति?

सरलार्थः – यदि राहुः खलु – निश्चयेन, अनियतचारः – अनिश्चितगतियुक्तः, चेत् संख्यया – तर्हि गणितेन, कथं तस्य उपलब्धिः भवति – कथं तस्य राहोः साधनं भवति, पुच्छाननाभिधानोऽन्तरेण – पुच्छसंज्ञस्य (राहुस्थितसप्तमराशेः) मुखसंज्ञस्य (राहुस्थितराशेश्च) अन्तरेण (मध्ये यद् राशिषट्कं), कस्मात् – कस्मात् कारणात्, न गृह्णाति – न ग्रहणं करोति।

व्याख्या – यदि राहुः सर्पाकारः, स च षड्राश्यन्तरितौ सूर्यचन्द्रौ पुच्छेन मुखेन वा गृह्णाति। एवं मुखपुच्छमध्यवर्त्तिराशिषट्कं कस्मात् कारणात् न आच्छादयति।

राहुद्वयं यदि स्याद् ग्रस्तेऽस्तमितेऽथवोदिते चन्द्रे।
तत्समगतिनान्येन ग्रस्तः सूर्योऽपि दृश्येत॥

अन्वयः – यदि राहुद्वयं स्यात्तर्हि चन्द्रे ग्रस्तेऽस्तमितेऽथवोदिते तत्समगतिना अन्येन राहुणा सूर्योऽपि ग्रस्तः दृश्येत।

सरलार्थः – यदि राहुद्वयं स्यात् प्रथमः – नियतचारः राहुः, द्वितीयस्तु – अनियतचारः राहुः, तर्हि चन्द्रे – शशिनि (चन्द्रमसि), ग्रस्ते – ग्रहणग्रस्ते, उदिते – उदिते सति, अन्येन – द्वितीयेन राहुणा, तत्समगतिना – सूर्यतुल्यगतिना, सूर्योऽपि – रविरपि, ग्रस्तः – आच्छादितः, दृश्येत – अवलोक्येत ।

व्याख्या – यदि राहुद्वयं स्यादर्थात् एकः नियतचारः, द्वितीयस्तु अनियतचारः तर्हि चन्द्रे दिने ग्रस्ते उदिते सति सूर्योऽपि सूर्यतुल्यगतिना द्वितीयेन राहुणा ग्रस्ताच्छादितो दृश्येत अर्थात् चन्द्रार्कयोः उदयास्तमयोः पौर्णमास्यन्ते चन्द्रग्रहणमेकेन राहुणा यदा क्रियते तदा तस्मिन्नेव समये उद्यतः अस्तमयतो वा सूर्यस्य द्वितीयेन तत्समगतिना राहुणा जायमानं ग्रहणं दृश्येत।

६.६ राहुविषये आचार्यस्य स्वमतप्रतिपादनम्

भूच्छायां स्वग्रहणे भास्करमर्कग्रहे प्रविशतीन्दुः।
प्रग्रहणमतः पश्चान्नेन्दोर्भानोश्च पूर्वार्द्धात्॥

अन्वयः – इन्दुः स्वग्रहणे भूच्छायां प्रविशति, अर्कग्रहे इन्दुः भास्करं प्रविशति, अतः इन्दोः पश्चात् प्रग्रहणं भवति, भानोः च पूर्वार्द्धात् (प्रग्रहणं भवति।)

सरलार्थः – इन्दुः – चन्द्रः, स्वग्रहणे – चन्द्रग्रहणे, भूच्छायाम् – भूभाम्, प्रविशति – प्रवेशं करोति (अन्तः गच्छति), अर्कग्रहे – सूर्यग्रहणे, इन्दुः – चन्द्रः, भास्करम् – सूर्यतलम् आच्छादयति, अतः – अस्मात् कारणात्, इन्दोः – चन्द्रस्य, पश्चात् प्रग्रहणम् – पश्चिमायां स्पर्शः भवति, भानोः च – सूर्यस्य च, पूर्वार्द्धात् प्रग्रहणं भवति – पूर्वतः स्पर्शः भवति।

व्याख्या – चन्द्रः चन्द्रग्रहणे भूच्छायां प्रवेशं करोति, सूर्यग्रहणे चन्द्रः सूर्यतलम् आच्छादयति। पूर्णिमायां सूर्यात् सप्तमराशौ भूच्छाया भ्रमति, चन्द्रश्च शीघ्रगतित्वात् पूर्वाभिमुखो गच्छन् भूच्छायां प्रविशति, अस्मात् कारणात् चन्द्रस्य पूर्वस्यां दिशि स्पर्शः। सूर्यग्रहणे चन्द्रार्कौ एकराशिगौ भवतः। तत्र चन्द्रः शीघ्रगतित्वात् पश्चादागत्यामावास्यान्ते अस्थोऽर्कमाच्छादयति। अतः सूर्यग्रहणे सूर्यस्य पश्चिमायां दिशि स्पर्शः।

सूर्यचन्द्रग्रहणयोः स्पर्शमोक्षविषयकं चित्रम्

बोधप्रश्नाः

१. 'शिरः' इति शब्दस्य अर्थः कः?



२. 'पर्वकालाद्' इति शब्दस्य अर्थः कः?

३. 'भुजङ्गाकारः' इति शब्दस्य अर्थः कः?

४. 'मण्डली' इति शब्दस्य अर्थः कः?

५. 'अर्कग्रहे' इति शब्दस्य अर्थः कः?

६.७ रात्रौ कुतो भूच्छाया भवति तत्कारणप्रतिपादनम्

वृक्षस्य स्वच्छाया यथैकपार्श्वे भवति दीर्घतया।
निशि निशि तद्वद्भूमेरावरणवशाद्दिनेशस्य॥

अन्वयः – दिनेशस्य आवरणवशाद् यथा वृक्षस्य स्वच्छाया एकपार्श्वे दीर्घतया भवति, तद्वद् निशि निशि दिनेशस्य आवरणवशाद् भूमेः भवति।

सरलार्थः – वृक्षस्य - तरोः, स्वच्छाया - आत्मीया भा, दिनेशस्य - आदित्यस्य (सूर्यस्य), आवरणवशाद् - छादनहेतोः, एकपार्श्वे - एकस्मिन् पार्श्वे, दीर्घतया - दीर्घकारा भवति, तद्वद् - तेनैव प्रकारेण, निशि निशि - रात्रौ रात्रौ, दिनेशस्य - सूर्यस्य आवरणवशाद्, भूमेः - पृथिव्याः छाया भवति ।

व्याख्या – सूर्यस्य आवरणवशाद् यथा वृक्षस्य स्वच्छाया (छादनहेतोः) एकस्मिन् पार्श्वे दीर्घतया सूर्याद्विपरितदिशि भवति। तद्वत् (अनेन प्रकारेण) रात्रौ रात्रौ दिनेशस्य आवरणवशाद् भूमेच्छाया सूर्याद्विपरितदिशि भवति।

६.८ प्रतिमासं चन्द्रग्रहणं न भवतीति कारणप्रतिपादनम्

सूर्यात् सप्तमराशौ यदि चोदग्दक्षिणेन नातिगतः।
चन्द्रः पूर्वाभिमुखश्छायामौर्वीं तदा विशति॥

अन्वयः – यदि पूर्वाभिमुखः चन्द्रः सूर्यात् सप्तमराशौ उदग्दक्षिणेन च नातिगतः तदा छायामौर्वीं विशति।

सरलार्थः – यदि पूर्वाभिमुखः चन्द्रः - यदि पूर्वाभिमुखो गच्छन् चन्द्रः, सूर्यात् - रवेः, सप्तमराशौ - सप्तमे राशौ, स्थितः - संस्थितः, उदग्दक्षिणेन च - भूच्छायातः उत्तरेण दक्षिणेन च, नातिगतः - नात्यर्थं याति, तदा छायामौर्वीम् - भूच्छायाम्, विशति - प्रविशति (प्रवेशं करोति)।

व्याख्या – यदि पूर्वाभिमुखः चन्द्रः सूर्यात् सप्तमे राशौ स्थितः भूच्छायात उत्तरेण दक्षिणेन च नातिगतः (न दूरं गतः) तदा भूच्छायां प्रविशति नान्यथा इति।

६.९ सूर्यचन्द्रग्रहणयोः युक्तिप्रतिपादनम्

चन्द्रोऽधःस्थः स्थगयति रविमम्बुवत् समागतः पश्चात्।
प्रतिदेशहतश्चित्रं दृष्टिवशाद् भास्करग्रहणम्॥

अन्वयः – पश्चात्समागत अधःस्थश्चन्द्र अम्बुवत् रविं स्थगयति। अतः भास्करग्रहणं प्रतिदेशं दृष्टिवशाद् चित्रं भवति।

सरलार्थः – पश्चात् समागतः - पश्चिमभागात् समागतः, अधःस्थश्चन्द्रः - आदित्यादधःस्थश्चन्द्रः, अम्बुवत् - मेघवत्, रविम् - सूर्यम्, स्थगयति - आच्छादयति, अतः

– अस्मात् कारणात्, प्रतिदेशम् – देशं देशं प्रति, दृष्टिवशाद् – दर्शनहेतो:, चित्रम् – विचित्रम्, भास्करग्रहणम् – सूर्यग्रहणम् भवति ।

व्याख्या – पश्चिमभागात् समागत आदित्यादधःस्थश्चन्द्रः मेघवत् सूर्यमाच्छादयति, अस्मात् कारणात् सूर्यग्रहणं देशं देशं प्रति दर्शनहेतोः विचित्रं भवति।

आवरणं महदिन्दोः कुण्ठविषाणस्ततोऽर्द्धसंछन्नः।
स्वल्पं रवेर्यतोऽतस्तीक्ष्णविषाणो रविर्भवति॥

अन्वयः – इन्दोः महद् आवरणं ततः अर्द्धसंछन्नः कुण्ठविषाणः भवति, रवेः स्वल्पमावरणं यतः अर्द्धसंछन्नः रविः तीक्ष्णविषाणो भवति।

सरलार्थः – इन्दोः – चन्द्रस्य, महद् आवरणम् – अतिबृहत् छादिका भूभा, ततः – तस्माद्धेतोः (तस्मात् कारणात्), अर्द्धसंछन्नः – अर्द्धग्रस्तः, कुण्ठविषाणः – अतिस्थूल– शृङ्गः भवति, रवेः – सूर्यस्य, स्वल्पमावरणम् – न्यूनमावरणम्, छादकः – चन्द्रः, यतः – यस्मात्, कारणात् अर्द्धसंछन्नः – अर्द्धग्रस्तः, रविः – सूर्यः, तीक्ष्णविषाणः – तीक्ष्णशृङ्गः (सूक्ष्मशृङ्गः) भवति।

व्याख्या – चन्द्रस्य अतिबृहत् किञ्चिदावरणं भवति अर्थात् चन्द्रग्रहणे छादिका भूभा बृहत् भवति, तस्मात् कारणात् अर्द्धग्रस्तः चन्द्रः अतिस्थूलशृङ्गः भवति। सूर्यस्य न्यूनमावरणम् अर्थात् सूर्यग्रहणे छादकः चन्द्रो भवति। यस्मात् कारणात् अर्द्धग्रस्तः सूर्यः तीक्ष्णशृङ्गः भवति।

एवमुपरागकारणमुक्तं दिव्यदृग्भिराचार्यैः।
राहुरकारणमस्मिन्नित्युक्तः शास्त्रसद्भावः॥

अन्वयः – एवम् उपरागकारणं दिव्यदृग्भिराचार्यै उक्तम् अस्मिन् राहुरकारणं शास्त्रसद्भावः नित्य उक्तः।

सरलार्थः – एवम् – अनेन प्रकारेण, उपरागकारणम् – ग्रहणनिमित्तकारणम्, दिव्यदृग्भिराचार्यैः – दिव्यज्ञानसंयुक्ता दृष्टिः येषां तैः, दिव्यदृग्भिराचार्यैः – ज्योतिषशास्त्रमर्मज्ञैः, उक्तम् – कथितम्, अस्मिन् – ग्रहणप्रसङ्गे, राहुरकारणम् – राहु अनिमित्तम्, शास्त्रसद्भावः – शास्त्रसिद्धान्तः, नित्य उक्तः – परमार्थः कथितः ।

व्याख्या – अनेन प्रकारेण ग्रहणनिमित्तं ज्योतिषशास्त्रमर्मज्ञैः कथितम्, ग्रहणप्रसङ्गे राहुः अकारणं भवति, अर्थात् वसिष्ठविष्णुगुप्तार्यभटाद्यैः आचार्यैः उक्तप्रकारेण ग्रहणनिमित्तमुक्तम्। अस्मिन् ग्रहणे राहुः ग्राहकत्वेन अनिमित्तमिति एषः शास्त्रसिद्धान्तः कथितः।

६.१० आगमगणितयोः समत्वप्रतिपादनम्

योऽसावसुरो राहुस्तस्य वरो ब्रह्मणाऽयमाज्ञप्तः।
आप्यायनमुपरागे दत्तहुतांशेन ते भविता॥
तस्मिन् काले सान्निध्यमस्य तेनोपचर्यते राहुः।
याम्योत्तरा शशिगतिर्गणितेऽप्युपचर्यते तेन॥

अन्वयः – योऽसौ असुरः राहुः तस्य ब्रह्मणा अयम् वरः आज्ञप्तः। उपरागे दत्तहुतांशेन ते आप्यायनं भविता। तस्मिन् काले अस्य सान्निध्यं तेन राहु उपचर्यते, गणितेऽपि शशिगतिः याम्योत्तरा तेन उपचर्यते।

सरलार्थः – योऽसौ असुरः – यः असौ असुरः (राक्षसः), राहुः – सैंहिकेयाख्यः, तस्य – राहोः, ब्रह्मणा – पितामहेन, वरः अयम् आज्ञप्तः – वर अयं (एषः) दत्तः, उपरागे –

ग्रहणे, दत्तहुतांशेन – अर्कचन्द्रयोः दत्तहुतांशेन ग्रहणकाले यद्दानं दीयते यच्च वह्नौ हूयते असौ अंशः भागः तेन दत्तहुतांशेन, ते – तव, आप्यायनम् – तर्पणम्, भविता – भविष्यति, तस्मिन् काले – ग्रहणसमये, अस्य – राहोः, सान्निध्यम् – सन्निहित्वम्, तेन – तेन कारणेन, लोके राहुः उपचर्यते – राहुः कथ्यते, गणितेऽपि – गणितस्कन्धेऽपि, शशिगतिः – चन्द्रगतिः, याम्योत्तरा – दक्षिणोत्तरा, तेन – तेन कारणेन, उपचर्यते – कथ्यते।

व्याख्या – योऽसौ राक्षसः सैंहिकेयनाम राहुः, तस्य राहोः कृते पितामहेन अयं वरः दत्तः यथा ग्रहणे (ग्रहणकाले) यद्दानं दीयते यच्च अग्नौ हूयते ततोऽसौ तेन भागेन तव तर्पणं भविष्यति। तस्मिन् ग्रहणकाले ब्रह्मणो वरदानात् राहोः सान्निध्यं कथ्यते। तेन कारणेन लोके राहुः कथ्यते। गणितस्कन्धेऽपि दक्षिणोत्तरा चन्द्रगतिः विक्षेपवशात् पातहेतुकः वर्तते। तेन कारणेन पात एव राहु इति कथ्यते एवं चन्द्रस्य या दक्षिणोत्तरा गतिः सा पातवशात् सिद्ध्यति।

६.११ गर्गपराशरादीनां मतखण्डनप्रतिपादनम्

न कथञ्चिदपि निमित्तैर्ग्रहणं विज्ञायते निमित्तानि।
अन्यस्मिन्नपि काले भवन्त्यथोत्पातरूपाणि॥

अन्वयः – कथञ्चिदपि निमित्तैः ग्रहणं न विज्ञायते। अन्यस्मिन्नपि काले निमित्तानि यथा उत्पातरूपाणि भवन्ति।

सरलार्थः – निमित्तैः – कारणचिह्नैः उत्पातरूपैः, ग्रहणम् – ग्रहणपरिज्ञानम् न कथञ्चिदपि विज्ञायते, यतो निमित्तानि यथा उत्पातरूपाणि – उत्पातरूपाणि निमित्तकारणानि, अन्यस्मिन्नपि काले – अन्यकाले (अपरसमये), भवन्ति – सम्भवन्ति ।

व्याख्या – गर्गपराशरादिभि उत्पातवशेन यद्ग्रहणज्ञानमुक्तं तन्न शोभनम्। निमित्तानि यथा उत्पातरूपाणि ग्रहणकाले एव न सम्भवन्ति। अस्मात् कारणात् उत्पातवशाद् ग्रहणज्ञानं न सम्भवति।

पञ्चग्रहसंयोगान्न किल ग्रहणस्य सम्भवो भवति।
तैलं च जलेऽष्टम्यां न विचिन्त्यमिदं विपश्चिद्भिः॥

अन्वयः – पञ्चग्रहसंयोगात् किल ग्रहणस्य सम्भवो न भवति, विपश्चिद्भिः अष्टम्यां जले तैलं च इदं न विचिन्त्यम्।

सरलार्थः – पञ्चग्रहसंयोगात् – पञ्चानां ग्रहाणां संयोगात् समागमाद्, ग्रहणस्य सम्भवः – ग्रहणस्य सम्भावना, न भवति, विपश्चिद्भिः – बुधैः, अष्टम्याम् – अष्टमी तिथौ, जले – जलमध्ये तैलं च, इदं न विचिन्त्यम् – एतत् न विचार्यम् ।

व्याख्या – पञ्चानां ग्रहाणां संयोगाद् ग्रहणस्य सम्भावना न भवति। विपश्चिद्भिः (बुधैः) चन्द्रग्रहणं सूर्यग्रहणं वा यदा अष्टम्यां समीपवर्त्तिन्यां तिथौ जलमध्ये तैलं क्षिप्तं यस्यां दिशि तत्प्रसरति, तस्यामेव दिशि ग्रहणं वक्तव्यम्। पुनरपि मोक्षार्थं जलमध्ये तैलं क्षिप्तं। यस्यामेव दिशि न प्रसरति तस्यामेव मोक्षो वक्तव्यः। एतत् सर्वं न विचार्यम्।

६.१२ ग्रहणे ग्रासप्रमाणं दिग्ज्ञानं वेलाज्ञानञ्च

अवनत्याऽर्के ग्रासो दिग्ज्ञेया वलनयाऽवनत्या च।
तिथ्यवसानाद्वेला करणे कथितानि तानि मया॥

अन्वयः – अवनत्या अर्के ग्रासः ज्ञेयः, वलनयाऽवनत्या च दिग्ज्ञेया, तिथ्यवसानाद्वेला मया करणे तानि कथितानि।

सरलार्थः – अवनत्या – स्फुटविक्षेपेण, अर्के ग्रासः – सूर्ये ग्रासः, वलनया अवनत्या च – वलनवशात्, स्फुटविक्षेपवशाच्च, दिग्ज्ञेया – दिशाज्ञानं कर्त्तव्यम्, तिथ्यवसानाद् वेला – तिथेः अमावस्यायाः योऽवसान अस्य हरिजसंस्कारेण (लम्बनसंस्कारेण) मध्यग्रहण-वेलासाधनम्, मया – वराहमिहिराचार्येण, करणे – पञ्चसिद्धान्तिकायाम्, कथितानि – उक्तानि।

व्याख्या – स्फुटविक्षेपेण (स्फुटशरेण) सूर्ये ग्रासः ज्ञेयः। वलनवशाद् स्फुटविक्षेपवशाच्च परिलेखकरणेन प्रग्रहणादीनां दिशा ज्ञेया, तिथे अमावस्यायाः पूर्णिमायाः वा अवसाने लम्बनसंस्कारेण ग्रहणस्य वेलासाधनं कार्यम्। मया वराहमिहिराचार्येण पञ्चसिद्धान्तिकायां तानि ग्रहणस्य उपकरणानि कथितानि।

विशेषः –

स्पष्टशरः – ध्रुवप्रोतवृत्ते बिम्बात् क्रान्तिवृत्तावधिः स्पष्टशरो भवति। शराभावे ग्रहणं भवति।

वलनम् – वल् संचलने धातोः वलति = गच्छतीति वलनम्, वलनम् = चलनम्, तच्च द्विविधं भवति = आक्षाऽऽयनभेदात्। ग्रहणस्य परिलेखे स्पर्शमोक्षयोः सम्मीलनोन्मीलनयोः दिग्ज्ञानार्थञ्च वलनस्योपयोगी भवति।

लम्बनम् – गर्भीयग्रहात् पृष्ठीयग्रहो यावल्लम्बितस्तावन्मितं लम्बनं भवति। तच्च दृग्लम्बनस्पष्टलम्बनभेदाद् द्विविधं भवति। अस्य सूर्यग्रहणे उपयोगो भवति।

बोधप्रश्नाः

६. 'विशति' इति शब्दस्य अर्थः कः?

७. 'चित्रम्' इति शब्दस्य अर्थः कः?

८. 'अर्द्धसंछत्रः' इति शब्दस्य अर्थः कः?

९. 'याम्योत्तरा' इति शब्दस्य अर्थः कः?

१०. 'अवनत्या' इति शब्दस्य अर्थः कः?

६.१३ पर्वेशविचारः तेषां फलानि च

षण्मासोत्तरवृद्धया पर्वेशा सप्तदेवताः क्रमशः।
ब्रह्मशशीन्द्रकुबेरा वरुणाग्नियमाश्च विज्ञेयाः॥

अन्वयः – षण्मासोत्तरवृद्धया पर्वेशाः क्रमशः ब्रह्मशशीन्द्रकुबेरा वरुणाग्नियमाश्च सप्तदेवताः विज्ञेयाः।

व्याख्या – कल्पादारभ्य षण्मासोत्तरवृद्धया – कल्पादेः वृद्धया षड्भिः मासैः गतैः पर्व, पर्वेशाः – सप्तपर्वणां स्वामिनः, सप्तदेवताः – सप्तदेवाः क्रमशः ब्रह्मशशीन्द्रकुबेराः वरुणाग्नियमाः च, विज्ञेयाः – ज्ञातव्याः ।

सरलार्थः – कल्पादारभ्य वृद्धया षड्भिः षड्भिः मासैः गतैः एकं पर्व भवति, तानि च सप्तपर्वाणि सन्ति, तेषां पर्वाणां क्रमशः सप्तदेवाः ब्रह्माद्याः सन्ति। यथा–ब्रह्मा (कमलजः), शशी (चन्द्रः), इन्द्रः (शक्रः), कुबेरः (वैश्रवणः), वरुणः (जलाधिपतिः), अग्निः (हुताशनः), यमः (पितृपतिः) एते सप्त यथासंख्यं सप्तानां पर्वाणामधिपतयो विज्ञेयाः (विज्ञातव्याः)।

फलानि –

ब्राह्मे द्विजपशुवृद्धिः क्षेमारोग्याणि सस्यसम्पच्च।
तद्वत्सौम्ये तस्मिन् पीडा विदुषामवृष्टिश्च॥

ऐन्द्रे भूपविरोधः शारदसस्यक्षयो न च क्षेमम्।
कौबेरेऽर्थपतीनामर्थविनाशः सुभिक्षं च॥

वारुणमवनीशाशुभमन्येषां क्षेमसस्यवृद्धिकरम्।
आग्नेयं मित्राख्यं सस्यारोग्याभयाम्बुकरम्॥

याम्यं करोत्यवृष्टिं दुर्भिक्षं संक्षयं च सस्यानाम्।
यदतः परं तदशुभं क्षुन्मारावृष्टिदं पर्व॥

अन्वयः – ब्राह्मे द्विजपशुवृद्धिः क्षेमारोग्याणि सस्यसम्पच्च भवति, तस्मिन् सौम्ये तद्वत् विदुषां पीडा अवृष्टिश्च भवति, ऐन्द्रे भूपविरोधः शारदसस्यक्षयः क्षेमं च न भवति, कौबेरे अर्थपतीनामर्थविनाशः सुभिक्षं च भवति, वारुणम् अवनीशाशुभम् अन्येषां क्षेमसस्यवृद्धिकरं च भवति, आग्नेयं मित्राख्यं सस्यारोग्याभयाम्बुकरं भवति, याम्यम् अवृष्टिं दुर्भिक्षं सस्यानां संक्षयं च करोति, यदतः परं पर्व तदशुभं क्षुन्मारावृष्टिदं च भवति।

व्याख्या – ब्राह्मे - ब्राह्मे नामके पर्वणि, द्विजपशुवृद्धिः - द्विजानां ब्राह्मणानां पशूनां चतुष्पदानां वृद्धिर्वर्द्धनम्, क्षेमारोग्याणि - कल्याणनीरोगत्वादीनि, सस्यसम्पच्च - सस्यानां सम्पद्वृद्धिश्च भवति, तस्मिन् सौम्ये - सौम्ये (चान्द्रे) पर्वणि, तद्वद् - द्विजपशुवृद्धिक्षेमारोग्याणि भवन्ति, सस्यसम्पच्च भवति, पुनः विदुषां पीडा - पण्डितानां पीडा (कष्टम्), अवृष्टिः - अवर्षणं भवति, ऐन्द्रे - ऐन्द्रे पर्वणि, भूपविरोधः - भूपानां राज्ञां विरोधः कलहः, शारदसस्यक्षयः - शारदानां सस्यानां धान्यानां क्षयो विनाशः, क्षेमम् - कल्याणं न च भवति, कौबेरे - कौबेरे पर्वणि, अर्थपतीनाम् - धनिकानाम्, अर्थविनाशः - वित्तक्षयः, सुभिक्षं च भवति, वारुणम् - वारुणं पर्व, अवनीशाशुभम् - अवनीशानां राज्ञाम् अशुभम्, अश्रेयस्करम्, अन्येषाम् - अन्येषाम् (इतरेषां), क्षेमसस्यवृद्धिकरम् - क्षेमकरं तथा सस्यानां वृद्धिकरं च भवति, आग्नेयम् - आग्नेयं मित्राख्यमित्यपरं नाम, सस्यारोग्याभयाम्बुकरम् - सस्य-आरोग्य-जलमभयं (भयरहितम्) भवति, याम्यम् - याम्यं पर्व, अवृष्टिम् - अवर्षणम्, दुर्भिक्षम् - क्षुद्भयम्, सस्यानां संक्षयम् - विनाशं च करोति, यदतः परं - अतोऽस्मात् पर्वसप्तकात् यत्परमन्यत्पर्व, तदशुभम् - अनिष्टदम्, क्षुन्मारावृष्टिदं च - दुर्भिक्ष-मरण-अवर्षणं च ददाति ।

सरलार्थः – ब्राह्मे पर्वणि ब्राह्मणानां पशूनां चतुष्पदानां वृद्धिः कल्याणनीरोगत्वादीनि सस्यानां सम्पद्वृद्धिश्च भवति। तस्मिन् चान्द्रे पर्वणि द्विजपशुवृद्धिक्षेमारोग्याणि भवन्ति, सस्यसम्पच्च भवति पुनश्च विदुषां कष्टम् अवर्षणञ्च भवति। ऐन्द्रे पर्वणि राज्ञां कलहो भवति तथा शारदानां सस्यानां धान्यानां च विनाशः कल्याणं न च भवति। कौबेरे पर्वणि धनिकानामर्थविनाशः सुभिक्षं च भवति। वारुणं पर्व राज्ञाम् अश्रेयस्करमन्येषां सर्वजनानां क्षेमकरं (कल्याणप्रदम्) तथा सस्यानां वृद्धिकरं च भवति। आग्नेयस्य पर्वणो मित्राख्यमित्यपरं नाम तत्पर्व सस्यारोग्यकरं तथा जलभयरहितं च करोति, याम्यं पर्व अवर्षणं क्षुद्भयं सस्यानां विनाशं च करोति, अतोऽस्मात् पर्वसप्तकात् यत्परमन्यत्पर्व तदनिष्टदं दुर्भिक्ष-मरण-अवर्षणञ्च ददाति।

६.१४ वेलाहीनेऽतिवेले च पर्वणि फलप्रतिपादनम्

वेलाहीने पर्वणि गर्भविपत्तिश्च शस्त्रकोपश्च।
अतिवेले कुसुमफलक्षयो भयं सस्यनाशश्च॥

अन्वयः – वेलाहीने पर्वणि गर्भविपत्तिश्च शस्त्रकोपश्च भवति। अतिवेले कुसुमफलक्षयो भयं सस्यनाशश्च भवति।

सरलार्थः –

१.	वेलाहीने पर्वणि गर्भविपत्तिः	–	गर्भस्त्रावः (गर्भाणां विपत्तिर्नाशः)।
२.	शस्त्रकोपश्चः	–	युद्धं वा भवति।
३.	अतिवेले	–	अतिवेले पर्वणि।
४.	कुसुमफलक्षयः	–	कुसुमानां (पुष्पाणां) फलानां च क्षयो विनाशः।
५.	भयम्	–	लोके भयम्।
६.	सस्यनाशश्च	–	सस्यानां नाशश्च भवति।

व्याख्या – वेलाहीने पर्वणि गर्भस्त्रावः युद्धं च भवति। अतिवेले पर्वणि कुसुमानां फलानां च विनाशः, लोके भयम्, सस्यानां नाशश्च भवति।

हीनातिरिक्तकाले फलमुक्तं पूर्वशास्त्रदृष्टत्वात्।
स्फुटगणितविदः कालः कथञ्चिदपि नान्यथा भवति॥

अन्वयः – हीनातिरिक्तकाले पूर्वशास्त्रदृष्टत्वात् फलमुक्तम्। स्फुटगणितविदः कालः कथञ्चिदपि नान्यथा भवति।

सरलार्थः – हीनातिरिक्तकाले – वेलाहीनातिवेलकाले, पूर्वशास्त्रदृष्टत्वात् – भगवद्गर्गादि प्रणीतानां शास्त्राणां दृष्टत्वात् (अवलोकनात्), फलम् उक्तम् – फलं कथितम्, स्फुटगणितविदः कालः – स्पष्टगणितज्ञस्य कालः (प्रग्रहणादीनां समयः) कथञ्चिदपि न अन्यथा भवति अर्थात् स्पष्टगणितज्ञस्य काल असाधु न भवति ।

६.१५ एकमासे चन्द्रसूर्यग्रहणयोः फलप्रतिपादनम्

यद्येकस्मिन् मासे ग्रहणं रविसोमयोस्तदा क्षितिपाः।
स्वबलक्षोभैः संक्षयमायान्त्यतिशस्त्रकोपश्च॥

अन्वयः – एकस्मिन् मासे रविसोमयोः यदि ग्रहणं तदा क्षितिपाः स्वबलक्षोभैः संक्षयमायान्ति अतिशस्त्रकोपश्च भवति।

सरलार्थः – एकस्मिन् मासे, रविसोमयोः – सूर्यचन्द्रयोः, यदि ग्रहणम् – यदि उपरागो भवति, तदा क्षितिपाः – तदा राजानः, स्वबलक्षोभैः – आत्मीयसैन्यानां क्षोभणैः, संक्षयमायान्ति – विनाशं प्राप्नुवन्ति, अतिशस्त्रकोपः – सङ्ग्रामश्च भवति ।

व्याख्या – एकस्मिन् मासे सूर्यचन्द्रयोः यदि ग्रहणं भवति तदा राजानः आत्मीयसैन्यानां क्षोभणैः विनाशं प्राप्नुवन्ति सङ्ग्रामश्च भवति।

६.१६ ग्रस्तोदितयोः ग्रस्तास्तयोश्चार्कचन्द्रयोः फलप्रतिपादनम्

ग्रस्तावुदितास्तमितौ शारदधान्यावनीश्वरक्षयदौ।
सर्वग्रस्तौ दुर्भिक्षमरकदौ पापसन्दृष्टौ॥

अन्वयः – सूर्यचन्द्रौ ग्रस्तोदितौ ग्रस्तास्तमितौ शारदधान्यावनीश्वरक्षयदौ भवतः, सूर्यचन्द्रौ (सूर्यन्दू) सर्वग्रस्तौ दुर्भिक्षमरकदौ भवतः।

सरलार्थः – सूर्यचन्द्रौ ग्रस्तोदितौ शारदधान्यक्षयदौ भवतः - सूर्यचन्द्रौ ग्रस्तास्तमितौ अवनीश्वरक्षयदौ भवतः, सूर्यचन्द्रौ सर्वग्रस्तौ - निःशेषाच्छादितौ, तावेव पापसन्दृष्टौ - पापग्रहयोरङ्गारकसौरयोन्यतरेण दृष्टौ भवतः तदा दुर्भिक्षमरकदौ भवतः।

व्याख्या – सूर्यचन्द्रौ ग्रस्तोदितौ शारदधान्यक्षयकरौ भवतः सूर्यचन्द्रौ ग्रस्तास्तमितौ अवनीश्वरक्षयदौ भवतः। सूर्यचन्द्रौ निःशेषाच्छादितौ तौ एव पापसन्दृष्टौ तदा दुर्भिक्षमरकदौ भवतः।

अर्द्धोदितोपरक्तो नैकृतिकान् हन्ति सर्वयज्ञांश्च।
अग्न्युपजीविगुणाधिकविप्राश्रमिणो युगेऽभ्युदितः॥

कर्षकपाखण्डिवणिक् क्षत्रियबलनायकान् द्वितीयांशे।
कारुकशूद्रम्लेच्छान् खतृतीयांशे समन्त्रिजनान्॥

मध्याह्ने नरपतिमध्यदेशहा शोभनश्च धान्यार्घः।
तृणभुगमात्यान्तःपुरवैश्यघ्नः पञ्चमे खांशे॥

स्त्रीशूद्रान् षष्ठेंऽशे दस्युप्रत्यन्तहाऽस्तमयकाले।
यस्मिन् खांशे मोक्षस्तत्प्रोक्तानां शिवं भवति॥

अन्वयः – यदा चन्द्रोऽर्को वा अर्द्धोदित उपरक्तो भवति तदा नैकृतिकान् सर्वयज्ञान् च हन्ति। अभ्युदितः युगे तदा अग्न्युपजीविगुणाधिकविप्राश्रमिजनान् हन्ति। द्वितीयांशे कर्षकपाखण्डिवणिक् क्षत्रियबलनायकान् हन्ति, खतृतीयांशे समन्त्रिजनान् कारुकशूद्रम्लेच्छान् हन्ति, मध्याह्ने नरपतिमध्यदेशहा शोभनः धान्यार्घश्च भवति, पञ्चमे खांशे तृणभुगमात्यान्तःपुरवैश्यघ्नान् हन्ति, षष्ठेंऽशे स्त्रीशूद्रान् निहन्ति तथा अस्तमयकाले दस्युप्रत्यन्तहा निहन्ति, यस्मिन् खांशे मोक्षे भवति, तत्प्रोक्तानाम् = अग्न्युपजीविप्रभृतीनाम्, शिवम् = श्रेयः (कल्याणम्) भवति।

सरलार्थः – चन्द्रः सूर्यो वा अर्द्धोदितः यद्युपरक्तः(ग्रस्तः) भवति, तदा नैकृतिकान् - निषादान्, सर्वयज्ञान् - सम्पूर्णयागान् (निःशेषान् यागान् च), हन्ति - नाशयति, ग्रहणदिने दिनप्रमाणस्य रात्रिप्रमाणस्य वा सप्तभिः भागं तदा युगस्य तत् खांशमानं भवति। अनेन आकाशमपि सप्तधाकृतं भवति।

यथा –

स्पार्शिकं मौक्षिकं वान्यं कालं सप्तगुणं हरेत्।
दिनमानेन यल्लब्धं खांशमानं युगस्य तत्॥

अभ्युदितः - उदितः (उद्गत एव), चन्द्रः सूर्यो वा युगे - प्रथमभागे (प्रथमदिन-सप्तभागे यदि अर्कस्य चन्द्रस्य ग्रहणं भवति तदा स एवाकाशभागः प्रथमः), तदा अग्न्युपजीविनः - सुवर्णकारप्रभृतयः, गुणाधिकाः - गुणिनः, विप्राः - ब्राह्मणाः, आश्रमिणः - आश्रमवासिनः, जनान् - नरान्, हन्ति - नाशयति, द्वितीयांशे - द्वितीयभागे, कर्षकपाखण्डिवणिक् - क्षत्रिय-बलनायकान् हन्ति अर्थात् कर्षकाः - कृषिकराः, पाखण्डिनः - वेदवाह्याः (आडम्बरयुक्ताः जनाः), वणिजः - क्रयविक्रयकारकाः, क्षत्रियाः - राजन्याः, बलनायकाः - सेनापतयः, एतान् - जनान् (नरान्), हन्ति - निहन्ति (नाशयति), खतृतीयांशे - आकाशे तृतीयभागे, समन्त्रिजनान् - मन्त्रिजनैः सह, कारुकशूद्रम्लेच्छान् - शिल्पि-शूद्र-म्लेच्छजनान् हन्ति (नाशयति),

मध्याह्ने – चतुर्थे खांशे, नरपतिमध्यदेशहा – नरपतिं राजानं मध्यदेशं च निहन्ति तथा शोभनः धान्यार्घश्च भवति, पञ्चमे खांशे – पञ्चमे आकाशभागे, तृणभुगमात्यान्तःपुरवैश्यघ्नाः – तृणभुजः चतुष्पदान्, अमात्यान् – मन्त्रिणः, अन्तःपुराणि – राजदारान्, वैश्यान् – वैश्यजातीयान् च नाशयति, षष्ठे अंशे – षष्ठे भागे, स्त्रीशूद्रान् – स्त्रियः शूद्रजातयः च एतान् नाशयति, अस्तमयकाले दस्युप्रत्यन्तहा – दस्यवः चौराः, प्रत्यन्ताः – गह्वरवासिन एतान् हन्ति, यस्मिन् खांशे – आकाशभागे मोक्षो भवति, तत्प्रोक्तानाम् – अग्न्युपजीविप्रभृतीनाम्, श्रेयो भवति।

व्याख्या – चन्द्रः सूर्यो वा अर्द्धोदितः ग्रस्तः भवति तदा आकाशस्य प्रथमभागे सुवर्णकारप्रभृतयः, गुणिनः, ब्राह्मणा आश्रमवासिनश्च एतान् हन्ति। द्वितीयभागे कृषिकराः, पाखण्डिनः क्रयविक्रयकारकाः, राजन्याः, सेनापतय एतान् हन्ति। आकाशस्य तृतीयभागे मन्त्रिजनैः सह शिल्पि-शूद्र-म्लेच्छ जनान् हन्ति (नाशयति) मध्याह्ने चतुर्थे भागे नरपतिं मध्यदेशं च नाशयति तथा शोभनः धान्यार्घश्च भवति। पञ्चमे आकाशभागे चतुष्पदान्, मन्त्रिणः, राजदारान्, वैश्यान् च नाशयति, षष्ठे भागे स्त्रियः शूद्रजातयश्च एतान् हन्ति (नाशयति) अस्तमयकाले चौराः गह्वरवासिनः एतान् नाशयति, यस्मिन् आकाशभागे मोक्षो भवति, तदा अग्न्युपजीविप्रभृतीनां श्रेयः (कल्याणम्) भवति।

बोधप्रश्नाः

११. 'द्विजपशुवृद्धिः' इति शब्दस्य अर्थः कः?

१२. 'भूपविरोधः' इति शब्दस्य अर्थः कः?

१३. 'गर्भविपत्तिः' इति शब्दस्य अर्थः कः?

१४. 'क्षितिपाः' इति शब्दस्य कोऽभिप्रायः?

१५. 'खतृतीयांशे' इति शब्दस्य अर्थः कः?

१६. 'यस्मिन् खांशे' इति शब्दस्य अर्थः कः?

१७. 'तृणभुजः' इति शब्दस्य अर्थः कः?

ग्रन्थस्य मूलपाठः (श्लोकः १-३१)

अमृतास्वादविशेषाच्छिन्नमपि शिरः किलासुरस्येदम्।
प्राणैरपरित्यक्तं ग्रहतां यातं वदन्त्येके॥

इन्द्वर्कमण्डलाकृतिरसितत्वात् किल न दृश्यते गगने।
अन्यत्र पर्वकालाद् वरप्रदानात् कमलयोनेः॥

मुखपृच्छविभक्ताङ्गं भुजङ्गमाकारमुपदिशन्त्यन्ये।
कथयन्त्यमूर्त्तमपरे तमोमयं सैंहिकेयाख्यम्॥

यदि मूर्त्तो भविचारी शिरोऽथवा भवति मण्डली राहुः।
भगणार्द्धेनान्तरितौ गृह्णाति कथं नियतचारः॥

अनियतचारः खलु चेदुपलब्धिः संख्यया कथं तस्य।
पुच्छाननाभिधानोऽन्तरेण कस्मान्न गृह्णाति॥

राहुद्वयं यदि स्याद् ग्रस्तेऽस्तमितेऽथवोदिते चन्द्रे।
तत्समगतिनान्येन ग्रस्तः सूर्योऽपि दृश्येत॥

भूच्छायां स्वग्रहणे भास्करमर्कग्रहे प्रविशतीन्दुः।
प्रग्रहणमतः पश्चान्नेन्दोर्भानोश्च पूर्वार्द्धात्॥

वृक्षस्य स्वच्छाया यथैकपार्श्वे भवति दीर्घतया।
निशि निशि तद्वद्भूमेरावरणवशाद्दिनेशस्य॥

सूर्यात् सप्तमराशौ यदि चोदग्दक्षिणेन नातिगतः।
चन्द्रः पूर्वाभिमुखश्छायामौर्वीं तदा विशति॥

चन्द्रोऽधःस्थः स्थगयति रविमम्बुवत् समागतः पश्चात्।
प्रतिदेशमतश्चित्रं दृष्टिवशाद् भास्करग्रहणम्॥

आवरणं महदिन्दोः कुण्ठविषाणस्ततोऽर्द्धसंछन्नः।
स्वल्पं रवेर्यतोऽतस्तीक्ष्णविषाणो रविर्भवति॥

एवमुपरागकारणमुक्तं दिव्यदृग्भिराचार्यैः।
राहुरकारणमस्मिन्नित्युक्तः शास्त्रसद्भावः॥

योऽसावसुरो राहुस्तस्य वरो ब्रह्मणाऽयमाज्ञप्तः।
आप्यायनमुपरागे दत्तहुतांशेन ते भविता॥

तस्मिन् काले सान्निध्यमस्य तेनोपचर्यते राहुः।
याम्योत्तरा शशिगतिर्गणितेऽप्युपचर्यते तेन॥

न कथञ्चिदपि निमित्तैर्ग्रहणं विज्ञायते निमित्तानि।
अन्यस्मिन्नपि काले भवन्त्यथोत्पातरूपाणि॥

पञ्चग्रहसंयोगान्न किल ग्रहणस्य सम्भवो भवति।
तैलं च जलेऽष्टम्यां न विचिन्त्यमिदं विपश्चिद्भिः॥

अवनत्याऽर्के ग्रासो दिग्ज्ञेया वलनयाऽवनत्या च।
तिथ्यवसानाद्वेला करणे कथितानि तानि मया॥

षणमासोत्तरवृद्ध्या पर्वेशा सप्तदेवताः क्रमशः।
ब्रह्मशशीन्द्रकुबेरा वरुणाग्नियमाश्च विज्ञेयाः॥

ब्राह्मे द्विजपशुवृद्धिः क्षेमारोग्याणि सस्यसम्पच्च।
तद्वत्सौम्ये तस्मिन् पीडा विदुषामवृष्टिश्च॥

ऐन्द्रे भूपविरोधः शारदसस्यक्षयो न च क्षेमम्।
कौबेरेऽर्थपतीनामर्थविनाशः सुभिक्षं च॥

वारुणमवनीशाशुभमन्येषां क्षेमसस्यवृद्धिकरम्।
आग्नेयं मित्राख्यं सस्यारोग्याभयाम्बुकरम्॥

याम्यं करोत्यवृष्टिं दुर्भिक्षं संक्षयं च सस्यानाम्।
यदतः परं तदशुभं क्षुन्मारावृष्टिदं पर्वे॥

वेलाहीने पर्वणि गर्भविपत्तिश्च शस्त्रकोपश्च।
अतिवेले कुसुमफलक्षयो भयं सस्यनाशश्च॥

हीनातिरिक्तकाले फलमुक्तं पूर्वशास्त्रदृष्टत्वात्।
स्फुटगणितविदः कालः कथञ्चिदपि नान्यथा भवति॥

यद्येकस्मिन् मासे ग्रहणं रविसोमयोस्तदा क्षितिपाः।
स्वबलक्षोभैः संक्षयमायान्त्यतिशस्त्रकोपश्च॥

ग्रस्तावुदितास्तमितौ शारदधान्यावनीश्वरक्षयदौ।
सर्वग्रस्तौ दुर्भिक्षमरकदौ पापसन्दृष्टौ॥

अर्द्धोदितोपरक्तो नैकृतिकान् हन्ति सर्वयज्ञांश्च।
अग्न्युपजीविगुणाधिकविप्राश्रमिणो युगेऽभ्युदितः॥

कर्षकपाखण्डिवणिक् क्षत्रियबलनायकान् द्वितीयांशे।
कारुकशूद्रम्लेच्छान् खतृतीयांशे समन्त्रिजनान्॥

मध्याह्ने नरपतिमध्यदेशहा शोभनश्च धान्यार्घः।
तृणभुगमात्यान्तःपुरवैश्यघ्नः पञ्चमे खांशे॥

स्त्रीशूद्रान् षष्ठेंऽशे दस्युप्रत्यन्तहाऽस्तमयकाले।
यस्मिन् खांशे मोक्षस्तत्प्रोक्तानां शिवं भवति॥

स्पार्शिकं मौक्षिकं वान्यं कालं सप्तगुणं हरेत्।
दिनमानेन यल्लब्धं खांशमानं युगस्य तत्॥

६.१७ सारांशः

अनेके आचार्याः राक्षसस्य अमृतपानकारणात् निश्चयेन इदं शिरः छिन्नपि प्राणैः न परित्यक्तं ग्रहत्वं प्राप्तमिति कथयन्ति। अनेके आचार्याः राहुं मुखपुच्छविभक्ताङ्गं सर्पाकृतिं वदन्ति, अपरे आचार्याः मूर्तिरहितम् अन्धकारमयं च कथयन्ति। यदि असौ राहुः मूर्तिमान्, राशिषु नक्षत्रेषु वा विचरणशीलः शिरोमान् मण्डलवान् भवति, तदा कथं भगणार्द्धेन राशिषट्केन अन्तरितौ सूर्यचन्द्रौ गृह्णाति? यदि राहुः निश्चयेन अनिश्चितगतियुक्तः तर्हि गणितेन कथं तस्य राहोः साधनं भवति? यदि राहुद्वयं स्यात् प्रथमः नियतचारः राहुः द्वितीयस्तु अनियतचारः राहुः तर्हि चन्द्रे ग्रस्ते उदिते सति द्वितीयेन राहुणा सूर्यतुल्यगतिना सूर्योऽपि ग्रस्तः दृश्येत (दृश्यते वा)। चन्द्रः चन्द्रग्रहणे भूच्छायां प्रवेशं करोति। सूर्यग्रहणे चन्द्रः सूर्यतलम् आच्छादयति। पूर्णिमायां चन्द्रग्रहणे सूर्यात् सप्तमराशौ भूच्छाया भ्रमति सः चन्द्रश्च शीघ्रत्वात् पूर्वाभिमुखो यदा भूच्छायां प्रविशति, अस्मात् कारणात् पूर्वस्यां दिशि स्पर्शः करोति। सूर्यग्रहणे चन्द्रार्कौ एकराशिगौ भवतः तत्र चन्द्रः शीघ्रगतित्वात् पश्चादागत्यामावस्यान्तेऽर्कतलं प्रविशति स एवाध :स्थोऽर्कमाच्छादयति, अत एव सूर्यग्रहणे चन्द्रः पश्चिमायां दिशिग्रहणं स्पर्श वा करोति। चन्द्रस्य अतिवृहत् किञ्चिदावरणं भवति अर्थात् चन्द्रग्रहणे छादिका भूभा बृहदाकारा भवति। अत एव चन्द्रग्रहणे अर्द्धग्रस्त अतिस्थूलशृङ्गो भवति। सूर्यग्रहणे छादकः चन्द्रो भवति अर्थात् सूर्यस्य न्यूनमावरणवशाद् अर्द्धग्रस्तः सूर्यः तीक्ष्णशृङ्गो भवति। सूर्यग्रहणे स्फुटशरेण ग्रासः विज्ञेयः। वलनवशात् स्फुटशरवशाच्च ग्रहणे दिग्ज्ञानं कर्त्तव्यम्। तिथेः अमावस्यायाः योऽवसान अस्य लम्बनसंस्कारेण मध्यग्रहणवेलासाधनं कार्यम्। ध्रुवप्रोतवृत्ते बिम्बात् क्रान्तिवृत्तावधि स्पष्टशरो भवति। शराभावे ग्रहणस्य पूर्णसम्भावना भवति। वल् संचलने धातोः वलति गच्छतीति वलनम्, वलनम् = चलनम्, तच्च द्विविधं भवति, आक्षाऽऽयनभेदाद् ग्रहणस्य परिलेखे स्पर्शमोक्षयोः सम्मीलनोन्मीलनयोः दिग्ज्ञानार्थं वलनस्योपयोगो भवति। गर्भीयग्रहात् पृष्ठीयग्रहो यावत्लम्बितस्तावन्मितं लम्बनं भवति। तच्च दृग्लम्बनस्पष्ट- लम्बनभेदाद् द्विविध भवति। अस्य सूर्यग्रहणे उपयोगो भवति।

६.१८ शब्दावली

१. प्राणैः – असुभिः।

२. ग्रहतां यातम् – ग्रहत्वं प्राप्तम्।

३. गगने – आकाशे।

४. वरप्रदानात् – वरदानकारणात्।

५. मूर्त्तः – मूर्तिमान्।

६. संख्यया – गणितेन।

७. स्थगयति – आच्छादयति।

८. भूच्छायाम् – भूभाम्।

९. निशि निशि – रात्रौ रात्रौ।

१०. अम्बुवत् – मेघवत्।

११. भास्करग्रहणम् – सूर्यग्रहणम्।

१२. शास्त्रसद्भावः – शास्त्रसिद्धान्तः।

१३. शशिगतिः – चन्द्रगतिः।

१४. याम्योत्तरा – दक्षिणोत्तरा।

१५. आप्यायनम् – तर्पणम्।

१६. विपश्चिद्भिः – बुधैः।

१७. विज्ञेयाः – ज्ञातव्याः।

१८. दुर्भिक्षम् – क्षुद्भयम्।

१९. अवृष्टिम् – अवर्षणम्।

२०. सौम्ये – चन्द्रे।

२१. अवनीशाशुभम् – राज्ञामशुभम्।

२२. कुसुमफलक्षयः – पुष्पाणां फलानां च क्षयः (नाशः)।

२३. स्फुटगणितविदः – स्पष्टगणितशास्त्रज्ञाः।

२४. संक्षयमायान्ति – विनाशं प्राप्नुवन्ति।

२५. अतिशस्त्रकोपः – सङ्ग्रामः (युद्धम्)।

२६. शिवम् – श्रेयः (कल्याणम्)।

२७. हन्ति – नाशयति।

२८. खांशे – आकाशस्य भागे।

६.१९ सन्दर्भग्रन्थः

१. **बृहत्संहिता - श्रीवराहमिहिराचार्यः**, प्रकाशकः - सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः सन् १९९६ ई.।

६.२० सहायकग्रन्थः

१. **बृहत्संहिता - श्रीवराहमिहिराचार्यः**, प्रकाशकः - राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः नवदेहली सन् २००७ ई.।

२. **भद्रबाहुसंहिता - डॉ. नेमिचन्द्र ज्योतिषाचार्यः**, प्रकाशकः - भारतीय ज्ञानपीठ प्रकाशनम् नवदेहली सन् १९९६ ई.।

६.२१ बोधप्रश्नोत्तराणि

१. मस्तकः।

२. ग्रहणसमयाद् (ग्रहणकालाद्)।

३. सर्पाकृतिः।

४. मण्डलवान्।

५. सूर्यग्रहणे।

६. प्रविशति (प्रवेशं करोति)।

७. विचित्रम्।

८. अर्द्धग्रस्तः।

९. दक्षिणोत्तरा।

१०. शरेण।

११. ब्राह्मणानां पशूनां च वृद्धिः।

१२. राज्ञां परस्परं विरोधः।

१३. गर्भस्त्रावः (गर्भाणां नाशः)।

१४. राजानः।

१५. आकाशस्य तृतीयभागे।

१६. यस्मिन् आकाशभागे।

१७. तृणान् भुञ्जतीति तृणभुजः (पशवः) चतुष्पदाः।

६.२२ अभ्यासप्रश्नाः

१. ब्राह्मपर्वेशस्य फलं प्रतिपादयत।

उत्तरम् ....

....

....

२. प्रतिमासं चन्द्रग्रहणं न भवतीति कारणं प्रतिपाद्यताम्।

उत्तरम् ....

....

....

३. ग्रहणे ग्रासप्रमाणं दिग्ज्ञानं च लिखत।

उत्तरम् ....

....

....

४. एकस्मिन् मासे सूर्यचन्द्रग्रहणयोः फलं प्रतिपादयत।

उत्तरम् ....

....

....

५. राहुकृतमर्कचन्द्रयोः ग्रहणं न भवतीति विवेचयत।

उत्तरम् ....

....

....

◆

सप्तमः पाठः (राहुचारः)

पाठसंरचना

७.१ प्रस्तावना
७.२ उद्देश्यम्
७.३ अयनवशात् दिग्वशाच्च ग्रहणफलम् (श्लोक ३१, ३३, ३४)
७.४ द्वादशराशिषु सूर्यचन्द्रयोर्ग्रहणफलम्
    ७.४.१ मेषादिराशिषु ग्रहणफलम् (३५, ३६, ३७, ३८)
    ७.४.२ सिंहादिराशिषु ग्रहणफलम् (३९, ४०)
    ७.४.३ धन्वादिराशिषु ग्रहणफलम् (४१, ४२)
७.५ सूर्यचन्द्रयोः दशविधग्रासाः (४३)
    ७.५.१ सव्यादिग्रासानां लक्षणं फलञ्च (४४, ४५)
    ७.५.२ ग्रसनादिग्रासानां लक्षणं फलञ्च (४६, ४७)
    बोधप्रश्नाः
७.६ अवमर्दनादिग्रासानां लक्षणं फलञ्च (४८, ४९, ५१)
७.७ मध्यतमसादिग्रासानां लक्षणं फलञ्च (५०, ५१, ५३)
७.८ राहोर्वर्णवशात् फलविवेचनम् (५४ से ५९)
७.९ ग्रहणकालिकचन्द्रसूर्ययोरुपरि ग्रहदृष्टिफलम् (६०, ६१)
    ७.९.१ शुभदृष्टेः विशेषफलम् (६२)
७.१० ग्रहणकाले उत्पातस्य दर्शनेन अन्यग्रहणस्य ज्ञानम् (६३)
    बोधप्रश्नाः
    ग्रन्थस्य मूलपाठः
७.११ सारांशः
७.१२ शब्दावली
७.१३ सन्दर्भग्रन्थाः
७.१४ सहायकग्रन्थाः
७.१५ बोधप्रश्नोत्तराणि
७.१६ अभ्यासप्रश्नाः

७.१ प्रस्तावना

पूर्वस्मिन् पाठे भवान् राहोः ग्रहत्वप्रतिपादनसन्दर्भे वराहमिहिरस्य मतान् पठितवान्। वराहमिहिरः तत्र पूर्ववर्तीनाम् आचार्याणां मतानि च प्रतिपादयति, पुराणोक्तानां मतानां च विवेचनं करोति। तेषां मतानां सम्यक्रीत्या आलोचनं कृत्वा वैज्ञानिकं तथ्यं प्रतिपादयति यत् राहु आकाशे ग्रहवत् न उपलभ्यते, मुखपुच्छयुक्ता सर्पाकारसंरचना आकाशे कुत्रापि नास्ति। राहुवशात् सूर्यचन्द्रयोः ग्रहणं भवतीति पूर्वाचार्यैं उक्तं परन्तु ग्रहणस्तु भूमेः चन्द्रबिम्बस्य च छायावशादेव सम्भवति। अत एतयोः छाया एव राहोः स्वरूपमस्ति इति मत्वा वराहमिहिराचार्येण राहुचाराध्याये ग्रहणसम्बन्धितानां विषयाणां विस्तृतरूपेण विवेचनं कृतम्। अतः पूर्वं राहुचाराध्यायस्य आरम्भिकाः विषयाः भवता पठिता, यथा- प्रतिमासं चन्द्रग्रहणं न भवतीति कारणप्रतिपादनम्, सूर्यचन्द्रग्रहणयोः युक्तिप्रतिपादनम्, परम्परागणितयोः समन्वयप्रतिपादनम्, गर्गपराशरादीनां मतखण्डनप्रतिपादनम्, ग्रहणे ग्रासप्रमाणं दिग्ज्ञानं वेलाज्ञानञ्च, पर्वेशविचारः, वेलाहीने अतिवेले च पर्वणि फलप्रतिपादनम्, एकमासे चन्द्रसूर्यग्रहणयोः फलप्रतिपादनम्, ग्रस्तोदितास्तयोः अर्कचन्द्रयोः फलप्रतिपादनम्।

अस्मिन् पाठे भवान् अयनवशात् दिग्वशात् च ग्रहणस्य फलानि, द्वादशराशिषु ग्रहणफलानि,

सूर्यचन्द्रयोः दशविधग्रासानां लक्षणानि फलानि च, राहोवर्णशात् फलविवेचनम्, ग्रहणकालिकसूर्यचन्द्रोपरि ग्रहाणां शुभाशुभदृष्टेः फलानि च पठिष्यति। प्राचीनकाले ग्रहणस्य अतिमहत्त्वम् आसीत्। अत एव सिद्धान्तग्रन्थेषु ग्रहणकालनिर्धारणस्य सूक्ष्मविधीनां विवेचनं प्राप्यते। मुहूर्त्तग्रन्थेषु ग्रहणस्य शुभाशुभफलानां विवेचनं तथा च संहिताग्रन्थेषु उत्पातरूपेण विशदतया ग्रहणस्य विवेचनं कृतमस्ति। दीर्घकालावधिपर्यन्तं प्राचीनाचार्यैः ग्रहणस्वरूपस्य सूक्ष्मधिया अध्ययनं कृतम्। अत एव ग्रहणस्य प्रत्येकस्मिन् राशौ, प्रत्येकस्मिन् मासे, विविध स्वरूपयुक्तानां ग्रहणानां लक्षणपुलानि च विवेचितानि। तेषां विषये पाठेऽस्मिन् भवान् पठिष्यति।

७.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् –

- ➢ अयनवशात् दिग्वशाच्च ग्रहणफलप्रतिपादने समर्थः भविष्यति।
- ➢ द्वादशराशिषु सूर्यचन्द्रयोः ग्रहणफलप्रतिपादने सक्षमः भविष्यति।
- ➢ सूर्यचन्द्रयोः दशविधग्रासानां लक्षणानि फलानि च प्रदर्शने पटुः भविष्यति।
- ➢ ग्रहणकालिकचन्द्रसूर्ययोः ग्रहाणां दृष्टेः शुभफलानि अशुभफलानि च प्रतिपादने कुशली भविष्यति।
- ➢ ग्रहणकाले उत्पातस्य दर्शनेन अन्यग्रहणस्य ज्ञाने समर्थः भविष्यति।

७.३ अयनवशात् दिग्वशाच्च ग्रहणफलम्

अयनं नाम चलनम्। यदा सूर्यस्य उत्तरदिशि चलनं भवति तत् उत्तरायणं तथा सूर्यस्य दक्षिणदिशि चलनं दक्षिणायनम् उच्यते। द्वयो अयनयोः तथा पूर्वादिदिक्षु ग्रहणस्य दर्शनवशात् फलानि वराहमिहिराचार्येण एवं वर्णितानि–

द्विजनृपतीनुदगयने विट्शूद्रान् दक्षिणायने हन्ति।
राहुरुदगादिदृष्टः प्रदक्षिणं हन्ति विप्रादीन्॥
म्लेच्छान् विदिक्स्थितो यायिनश्च हन्याद्धुताशसक्तांश्च।
सलिलचरदन्तिघाती याम्येनोदग्गवामशुभः॥

पूर्वेण सलिलपूर्णां करोति वसुधां समागतो दैत्यः।
पश्चात् कर्षकसेवकबीजविनाशाय निर्दिष्टः॥

अन्वयः – (राहुः) उदगयने द्विजनृपतीन् (तथा) दक्षिणायने विट्शूद्रान् हन्ति। प्रदक्षिणं (क्रमेण) उदगादिदृष्टः राहुः विप्रादीन् हन्ति। विदिक्स्थितो राहुः म्लेच्छान् यायिनश्च हुताशसक्तान् च हन्यात्। याम्येन (दृष्टः राहुः) सलिलचरान् (हन्ति) दन्तिघाती (च भवति) उदग् (दृष्टः) गवाम् अशुभः (भवति) दैत्यः पूर्वेण समागतो वसुधां सलिलपूर्णां करोति। पश्चात् (आगतः राहुः) कर्षकसेवकबीजविनाशाय निर्दिष्टः।

प्रतिपदार्थः – (राहुः) उदगयने = मकरादिराशिषट्कस्थे सूर्ये उत्तरायणम्, द्विजनृपतीन् = ब्राह्मणान् क्षत्रियान् च (तथा) दक्षिणायने = कर्कटादिषड्राशिस्थिते सूर्ये दक्षिणायणम् (तस्मिन् स्थिते राहुः) विट्शूद्रान् = वैश्यान् शूद्रान्, हन्ति=निहन्ति। प्रदक्षिणं = प्रदक्षिणाक्रमेण, उदगादिदृष्टः = उत्तराद्यासु चतसृषु दिक्षु (उत्तर-पश्चिम-दक्षिण-पूर्व) राहुः, विप्रादीन् = ब्राह्मणादीन् (ब्राह्मण-क्षत्रिय-वैश्य-शूद्र), हन्ति= निहन्ति। विदिक्स्थितो = विदिक्षु (ऐशान्याग्नेयनैर्ऋत्यवायव्येषु) स्थितः, राहुः, म्लेच्छान्= म्लेच्छजनान् तथा यायिनः = प्रोद्यतान् अथवा आक्रमणकारिणः,

हुताशसक्तान् = अग्निरतान्, अग्निहोत्रीन्, अग्निना ये आजीविकां प्राप्नुवन्ति तान् च हन्यात् = मारयति। याम्येन= दक्षिणेन, दृष्टः राहुः, सलिलचरान्= जलचरान् हन्ति तथा दन्तिघाती = दन्तिनम् अर्थात् हस्तिनां घातयति हन्ति। उदग् = उत्तरेण दृष्टः, गवाम्= गोजातीनम्, अशुभः= क्षयकृत् भवति। दैत्यः = राहुः, पूर्वेण = पूर्वस्यां दिशि, समागतो= दृष्टो, वसुधां = भूमिं, सलिलपूर्णां = जलपूर्णां करोति। पश्चात् = पश्चिमदिशि आगतः राहुः, कर्षकसेवकबीजविनाशाय = कृषिकराणां, सेवकानां पराऽऽराधनरतानां बीजानां च विनाशाय, निर्दिष्टः = उक्तः।

व्याख्या – उत्तरायणे अर्थात् मकरादिषड्राशिस्थिते सूर्ये यदा राहुदृष्टः भवति तदा ब्राह्मणन् क्षत्रियान् च निहन्ति। राहुदृष्टः इत्यस्य तात्पर्यं वर्तते ग्रहणम्। यदा दक्षिणायने राहु दृष्टः भवति अर्थात् यदा कर्कादिषड्राशिषु सूर्ये सति ग्रहणं भवति तदा वैश्यान् शूद्रान् च घातयति। एवं रीत्या अयनवशात् ग्रहणफलं निर्दिष्टम्। तदनन्तरं दिग्वशात् ग्रहणफलं निर्दिष्टम् यत् उत्तराद्यासु चतसृषु दिक्षु प्रदक्षिणेन दृष्टः राहुः ब्राह्मणादीन् हन्ति। यदि सूर्ये चन्द्रे वा उत्तरस्यां दिशि राहुः प्रग्रहणं करोति तदा ब्राह्मणान् हन्ति। पूर्वस्यां दृष्टः राहुः क्षत्रियान् निहन्ति। दक्षिणस्यां दृष्टे राहुः वैश्यान् हन्ति। पश्चिमायां दिशि दृष्टः राहुः शूद्रान् निहन्ति। अत्र भट्टोत्पलेन लिखितं यत् यद्यपि सूर्यचन्द्रयोः दक्षिणोत्तरदिग्भागात् ग्रहणं न सम्भवति तथापि वराहमिहिरेण पूर्वाचार्याणां मतानुसारेण अत्र वर्णनं कृतमस्ति। यथा च उक्तं कश्यपेन–

सौम्यायामागतो विप्रान् पूर्वस्यां क्षत्रजातयः।
वैश्यान् दक्षिणतो राहुर्हन्ति पश्चिमतोऽपरान्॥

तथैव पराशरमतेनापि ज्ञायते – 'उदक्प्राग्दक्षिणप्रत्यग्ब्राह्मणक्षत्रियविट्शूद्रोच्छेदनायाऽऽनुपूर्व्याऽपि च चतुर्षु दिक्षु ग्रहणस्य प्रभाव वर्णनान्तरम् आचार्येण विदिक्षु च ग्रहणस्य प्रभावं प्रतिपादितम्। विदिक्स्थितो अर्थात् ईशान–आग्नेय–नैर्ऋत्य–वायव्य दिक्षु दृष्टः राहुः म्लेच्छजनान्, यायीन्, अग्निरतान् अर्थात् अग्निना ये आजीविकां प्राप्नुवन्ति यथा पाचकाः अग्निहोत्राणि तान् च निहन्ति। विदिक्षु राहोः दर्शनस्यफलवर्णनानन्तरं चतुर्षु दिक्षु ग्रहणस्य विशेषफलानि पुनः वर्णयति आचार्यः।

दक्षिणेन दृष्टः राहुः जलचरान् हस्तिनः च घातयति। उत्तरस्यां दिशि दृष्टः राहुः गवाम्।

अशुभः क्षयकारको भवति। यदि पश्चिमायां दिशि ग्रहणं भवति तदा कृषिकराणां सेवकानां बीजानां च विनाशाय भवति। पूर्वस्यां दिशि दृष्टराहोस्तु शुभफलं विहितं यत् सम्पूर्णा वसुधाा जलेन पूर्णा भवति। अत्र विशेषरूपेण अवधेयं यत् बृहत्संहितायां वराहमिहिरेण यत्किमपि वर्णितं, तत् सर्वं पूर्वाचार्याणां मतानाम् एव आलोचनं वर्तते। अत एव भट्टोत्पलेन ग्रन्थस्य टीकायां पूर्वाचार्याणां मूलमतानि अपि लिखितानि, यथा सन्दर्भेऽस्मिन् काश्यपमतम्–

पूर्वे सलिलघाती स्यात् पश्चाद्धान्यकृषीवलान्।
याम्ये जलचरान् हन्ति सौम्ये गोनाशकः स्मृतः॥
म्लेच्छान् यायिनृपान् हन्ति विदिक्स्थः सिंहिकासुतः॥

७.४ द्वादशराशिषु सूर्यचन्द्रयोर्ग्रहणफलम्

इतः पश्चात् भवान् अयनवशात् दिग्वशाच्च सूर्यचन्द्रयोः ग्रहणस्य फलानि पठिस्यति।

७.४.१ मेषादिराशिषु ग्रहणफलम्

मेषादारभ्य कर्कटराशिपर्यन्तं चतुर्षु राशिषु सूर्यचन्द्रयोः ग्रहणे सति के जनाः पीडां प्राप्नुवन्ति, कानि च वस्तूनि विनाशमुपयान्ति। तत्सर्वम् आचार्येण एवं विहितम्–

पाञ्चालकलिङ्गशूरसेनाः काम्बोजोड्रकिरातशस्त्रवार्त्ताः।
जीवन्ति च ये हुताशवृत्त्या ते पीडामुपयान्ति मेषसंस्थे॥

गोपाः पश्वोऽथ गोमिनो मनुजा ये च महत्त्वमागताः।
पीडामुपयान्ति भास्करे ग्रस्ते शीतकरेऽथवा वृषे ॥

मिथुने प्रवराङ्गना नृपा नृपमात्र बलिनः कलाविदः।
यमुनातटजाः सबाह्लिका मत्स्याः सुह्मजनैः समन्विताः॥

आभीराञ्छरान् सपह्लवान् मल्लान् मत्स्यकुरुच्छकानपि।
पाञ्चालान् विकलांश्च पीडयत्यन्नं चापि निहन्ति कर्कटे॥

अन्वयः – मेषसंस्थे (अर्के चन्द्रे वा ग्रस्ते) पाञ्चालाः, कलिङ्गाः, शूरसेनाः, काम्बोजाः, उड्राः, किराताः (तथा) शस्त्रवार्ताः, ये हुताशवृत्त्या जीवन्ति ते च पीडाम् उपयान्ति।

वृषे भास्करे अथवा शीतकरे ग्रस्ते गोपाः, पशवः अथ गोमिनो, ये च महत्त्वमागताः मनुजा (ते सर्वे एव) पीडाम् उपयान्ति।

मिथुनस्थे (सूर्ये चन्द्रे वा ग्रस्ते) प्रवराङ्गनाः नृपा नृपमात्रा बलिः कलाविदः यमुनातटजाः सबाह्लिका सुह्मजनैः समन्विताः मत्स्याः (एते सर्वे एव पीडाम् उपयान्ति)

कर्कटे (यदि अर्कचन्द्रौ ग्रस्तौ भवतः तदा) अम्भीरान्, शबरान्, सपह्लवान् च पीडयति अन्नं च निहन्ति।

प्रतिपदार्थः

मेषसंस्थे = मेषराशिस्थिते (अर्के चन्द्रे वा ग्रस्ते) पाञ्चालाः = पाञ्चालजनाः, कलिङ्गाः = कलिङ्गदेशीयाः जनाः, शूरसेनाः, काम्बोजाः = काम्बोज देशस्थजनाः, उड्राः = उड्रदेशे स्थिताः जनाः, किराता (एते सर्वे जनाः तथा) शस्त्रवार्ताः = शस्त्रं वर्तनं येषां ते, अथवा शस्त्रेण वृतिः येषां ते शस्त्रवृत्तयः, ये हुताशवृत्त्या जीवन्ति = अग्निना आजीविका येषां ते यथा- पाचकाः, सुवर्णकारादयः, ते च पीडाम् = दुःखम्, उपयान्ति = प्राप्नुवन्ति।

वृषे = वृषराशिस्थिते भास्करे = सूर्ये अथवा शीतकरे = चन्द्रगे वा ग्रस्ते = ग्रसिते, गोपाः = गाः पान्ति रक्षन्तीति गोपाः, पशवः = चतुष्पदाः, गोमिनो = गावो विद्यन्ते येषां ते, ये च महत्त्वमागताः = पूज्यतां प्राप्ताः ये, मनुजाः = मनुष्याः (ते सर्वे एव) पीडाम् = दुःखं उपयान्ति = प्राप्नुवन्ति।

मिथुने = मिथुनराशिस्थिते (सूर्ये चन्द्रे वा ग्रस्ते) प्रवराङ्गनाः = प्रधानस्त्रियः वा नृपा = राजानः, नृपमात्रा = नृपसदृशा अमात्याः, बलिनः = प्राणिनः, कलाविदः = चित्रगीतनृत्यवा द्यादिकलासु निपुणाः ये, यमुनातटजाः = यमुना नदी तस्याः तीरे ये जाताः ते च, सबाह्लिका = बाह्लिकैः जनैः सहिताः। तथा सुह्मजनैः = सुह्मदेशस्थितैः जनैः, समन्विताः = सहिताः, मत्स्याः = मत्स्यदेशस्थाः जनाः (पीडामनुभवन्ति)

कर्कटे = कर्कराशिस्थिते (सूर्ये चन्द्र वा ग्रस्ते) आभीरान् = आभीरप्रदेशीयान् जनान्, शबरान् = शबरान् = शबरप्रदेशस्य जनान्, सपह्लवान् = पह्लवजनैः सहितान्, मल्लान् = बाहुयुद्धज्ञान्, मत्स्यकुरुञ्छकान् = मत्स्यान्, कुरुश्च, शकान्, अपि पाञ्चालान् = पाञ्चाल-प्रदेशीयजनान्, विकलान् = अङ्गहीनजनान् च पीडयति = उपतापयति तथा च अन्नं = धान्यम्, निहन्ति = महार्धाधिक्यं मूल्यवृद्धिः वा भवतीति भावः।

व्याख्या – आचार्येण प्रत्येकस्मिन् राशौ सूर्यचन्द्रयोः ग्रहणवशात् फलं प्रतिपादितमस्ति। तत्रापि मुख्यत्वेन संसारे के प्रदेशाः के जनाश्च पीडिताः भवन्ति इति विवेचितम्। सर्वप्रथमं मेषराशौ ग्रहणस्य फलं निर्दिष्टम्। मेषराशौ सूर्यस्य चन्द्रस्य वा ग्रहणे सति पाञ्चालदेशस्य जनाः, कलिंगप्रदेशीयाः जना, शूरसेनाप्रदेशस्थाः जनाः, काम्बोजस्थाः, उड्रप्रदेशनिवासिनः, किराताश्च पीडां प्राप्नुवन्ति। अत्र पीडा शब्देन जनहानिः, युद्धं, भूकम्पादि उत्पाताः इत्येतानि फलानि ज्ञेयानि।

वृषराशौ सूर्यस्य चन्द्रस्य वा ग्रहणे सति गोपालकाः, चतुष्पदाः, येषां गावः भवन्ति अर्थात् गवाम् स्वामिनः, ये च लोके पूज्यतां प्राप्ताः ते महत्त्वमागताः मनुष्याः पीडिताः भवन्ति। अत्र स्थानविशेषस्य फलं नोक्तम् अपि जातिविशेषाणाम् एव फलं विहितम्।

मिथुनराशौ स्थिते सूर्ये चन्द्रे वा यदि ग्रहणं भवति तदा प्रधानस्त्रियः, राजस्त्रियः, राजानः, राजा सदृशाः जनाः यथा अमात्याः, सामन्ताः, बलिनः प्राणिनः, संगीतनृत्यचित्रगीतवाद्यादिसु निपुणाः कलाविदः, बाह्लिकदेशस्य जनैः सह यमुनानद्याः तीरनिवासिनः जनाः, सुह्मप्रदेशस्य जनैः सह मत्स्यदेशस्थाः जनाः एते सर्वे पीडाम् अनुभवन्ति।

यदि च कर्कराशिस्थिते भास्करे वा चन्द्रे ग्रहणं भवति तदा आभीरान् जनान्, शवरान् जनान्, पह्लवप्रदेशस्य जनैः सह मल्लान्, (बाहुयुद्धेनिपुणाः जनाः मल्लाः भवन्ति) मत्स्यदेशीयान् जनान्, कुरुप्रदेशस्थजनान्, शकान्, पाञ्चालनिवासिनः, अंगविहीनान् जनान् च पीडयति। तथा च अन्नस्य महर्घता भवति अर्थात् धान्यानां, खाद्यान्नस्य वा मूल्ये महती वृद्धिः भवति। एवं प्रकारेण चतुर्षु राशिषु ग्रहणस्य फलानि पठितानि।

एतेषु श्लोकेषु विभिन्नानां प्रदेशानां नामानि भवद्भिः पठितानि। यानि–वाह्लिक, आभीर, सुह्म कलिंगादि। एतेषां प्रदेशानां वर्तमानसमये स्थितिः कुत्रास्ति इति जिज्ञासा समुदेति। अस्य जिज्ञासायाः शमनम् अग्रे नक्षत्रकूर्माध्याये भविष्यति। यतो तेषु अध्यायेषु विभिन्नप्रदेशानां स्थितेः आधुनिकपरिचयः विस्तृत रूपेण प्रदत्तः वर्तते। अतः एतानि नामानि तत्र प्रसंगवशात् पठितव्यानि। अग्रे च अध्यायेऽस्मिन् बहूनां प्रदेशानां नामानि भवान् पठिष्यति। तेषां सर्वेषां परिचयः पूर्वोक्तेषु अग्रिमाध्यायेषु एव पठनीयः।

७.४.२ सिंहादिराशिषु ग्रहणफलम्

मेषादिचतुर्षु राशिषु सूर्यस्य चन्द्रस्य वा ग्रहणवशात् फलानि पठितानि। इदानीं सिंहादितः आरभ्य चतुर्षु राशिषु ग्रहणस्य फलानि पठिष्यति। सिंहादि चतुर्षु राशिषु ग्रहणफलम् एवं प्रतिपादितम्–

सिंहे पुलिन्दगणमेकलसत्त्वयुक्तान्।
राजोपमान्नरपतीन् वनगोचरांश्च॥

षष्ठे तु सस्यकविलेखकगेयसक्तान्।
हन्त्यश्मकत्रिपुरशालियुतांश्च देशान्॥

तुलाधरेऽवन्त्यपरान्त्यसाधूनवणिग्दशार्णान् मरूकच्छपांश्च।
अलिन्यथोदुम्बरमद्रचोलान् द्रुमान् सयौधेयविषायुधीयान्॥

अन्वयः – सिंहे (अर्के चन्द्रे वा ग्रस्त) पुलिन्दः गणः मेकलः सत्वयुक्तः राजोपमा नरपतिः वनगोचनः एतान् हन्ति।

प्रतिपदार्थः – सिंहस्थे (अर्के चन्द्रे वा ग्रस्ते) पुलिन्दान् गणान् मेकलान् सत्वयुक्तान् राजोपमान् नरपतीन् वनगोचरान् च हन्ति।

षष्ठे (अर्के वा चन्द्रे ग्रस्ते) सस्यान् कवीन् लेखकान् गेयसक्तान् अश्मकान् त्रिपुरान् शालियुतान् च हन्ति।

तुलाधरे (सूर्य चन्द्रे वा ग्रसिते) अवन्त्यान् अपरन्त्यान् साधून् वणिजः दशार्णान् मरुकच्छपान् च (हन्ति)

अलिनि (स्थिते चन्द्रे सूर्ये वा ग्रस्ते) उदुम्बरान् मद्रान् चोलान् द्रुमान् सयौधेयान् विषायुधीयान् (च हन्ति)

प्रतिपदार्थः – सिंहे = सिंहराशिस्थिते (सूर्ये चन्द्रे वा ग्रसिते) पुलिन्दगणान् = निषादजातिविशेषस्य समूहान् मेकलान् = मेकलाप्रदेशस्य जनान्, सत्त्वयुक्तान् = सत्त्वप्रधानाः ये जनाः तान्, राजोपमान् = राजतुल्यान् जनान्, नृपतीन् = राज्ञः, वनगोचरान् = वनवासिनः वनम् अरण्यं गोचरो विषयो येषां ते वनगोचराः (एतान् हन्ति)

षष्ठे = कन्याराशिस्थिते (चन्द्रे वा सूर्ये ग्रस्ते) सस्यान् = धान्यान्, कवीन् = काव्यशास्त्रे निपुणान् जनान्, लेखकान् = लेखने प्रवीणान्, गेयसक्तान् = गानरतान् जनान्, अश्मकान् = अश्मकप्रदेशस्य जनान्, त्रिपुरान् = त्रिपुरादेशस्य जनान्, शालियुतान् = शाालियुताः देशाः येषु शालयो धान्यानि बहूनि भवन्ति तत्रस्थान् जनान् हन्ति = निहन्ति।

तुलाधरे = तुलां धारयतीति तुलाधरः अर्थात् तुलाराशिः, तस्मिन् स्थिते (सूर्ये चन्द्रे वा ग्रस्ते)

अवन्त्यान् = अवन्तिप्रदेशस्थान् जनान्, अपरान्त्यान् अपरान्त्यप्रदेशे स्थितान् जनान्, साधून् = सज्जनाः जनाः तान्, वणिजः = वस्तूनां क्रयविक्रयव्यापारेण आजीविकां निर्वहन्ति ते वणिजः तान्, दशार्णान् = दशार्णप्रदेशवासिनः जनान्, मरुकच्छपान् = मरु प्रदेशे कच्छप्रदेशे ये निवसन्ति तान् च (हन्ति)

अलिनि = वृश्चिकराशिस्थिते (सूर्ये चन्द्रे वा ग्रस्ते) उदुम्बरान् = उदुम्बरदेशे स्थितान् जनान्, मद्रान् = मद्रदेशीयजनान्, चोलान् = चोलदेशीयान्, द्रुमान् = वृक्षान्, सयौध यान् = सयौधेयदेशनिवासिनः, विषायुधीयान् = विषम् आयुधं येषां तान् (हन्ति)

व्याख्याः – सिंहराशिस्थिते चन्द्रे वा सूर्ये ग्रसिते सति निषादजातिविशेषस्य जनान्, मेकलाप्रदेशस्य जनान्, सत्त्वप्रधानजनान्, राजतुल्यान् जनान्, राज्ञः, वनवासिनः जनान् च निहन्ति। अर्थात् सिंहराशौ सूर्यग्रहणे चन्द्रग्रहणे वा सति एते जनाः पीडिताः भवति।

कन्याराशिस्थिते चन्द्रे वा सूर्ये यदि ग्रहणं भवति तदा प्रसिद्धाः कवयः, पण्डिताः, धान्याः, लेखकाः, गायकाः, अश्मकप्रदेशीयाः जनाः, त्रिपुराप्रदेशीयाः जनाः, येषु प्रदेशेषु बहूनि धान्यानि भवन्ति तादृशाः शालियुताः देशाः एते सर्वे पीडिताः भवन्ति।

तुलाराशिस्थिते सूर्ये चन्द्रे वा यदि ग्रहणं भवति तदा अवन्तिप्रदेशस्य जनाः, अपरान्त्यदेशस्य जनाः, सत्पुरुषाः, व्यापारिणः, किराटाः दर्शार्णाः जनाः मरुप्रदेशीयाः, कच्छप्रदेशीयाश्च जनाः पीडां प्राप्नुवन्ति।

वृश्चिकराशिस्थिते भास्करे यदि ग्रहणं भवति तदा उदुम्बराः जनाः, मद्रदेशीयाः जनाः, चौलप्रदेशस्य जनाः, वृक्षाः वनस्पतयः, सयौधेयजनान्, विषमायुधं येषां तादृशाः विषायुधीयाः जनाः अर्थात् ये जनाः विषप्रयोगे कुशलीनः भवन्ति ते, एते जनाः पीडिताः भवन्ति। अर्थात् वृश्चिकराशौ चन्द्रग्रहणं सूर्यस्यग्रहणं वा भवेत्तदा पूर्वोक्ताः उदुम्बरादिजनाः पीडिताः भवन्ति। अत्रापि विभिन्नानां प्राचीनप्रदेशानां नामानि पठितानि, तेषामपि परिचयः अग्रे विविध अध्यायेषु भविष्यति।

७.४.३ धन्वादिराशिषु ग्रहणफलम्

सिंहादिचतुर्षु राशिषु चन्द्रे सूर्ये सति ग्रहणस्य फलानि भवता पठितानि। तदनन्तरं धन्वादि चतुर्णां राशीनां फलानि आचार्येण एवं वर्णितानि –

धन्विन्यमात्यवरवाजिविदेहमल्लान्
पाञ्चालवैद्यवणिजो विषमायुधज्ञान्।
हन्यान्मृगे तु झषमन्त्रिकुलानि नीचान्
मन्त्रौपधीषु कुशलान् स्वविरायुधीयान्॥

कुम्भेऽन्तर्गिरिजान् सपश्चिमजनान् भारोद्वहांस्तस्करा-
नाभीरान् दरदाऽऽर्यसिंहपुरकान् हन्यात्तथा बर्बरान्।
मीने सागरकूलसागरजलद्रव्याणि वन्यान् जनान्
प्राज्ञान् वार्युपजीविनश्च भफलं कूर्मोपदेशाद्वदेत्॥

अन्वयः

धन्विनि (सूर्ये चन्द्रे वा ग्रसिते सति) अमात्यान् वरान् वाजिन् विदेहान् मल्लान् पाञ्चालान् वैद्यान् वणिजः विषमायुधज्ञान् (हन्यात्)

मृगे (स्थिते सूर्ये चन्द्रे ग्रहणे सति) झषान् मन्त्रिन् कुलानि नीचान् मन्त्रौषधेषु च कुशलान् स्थविरान् आयुधीयान् हन्यात्।

कुम्भे (स्थिते सूर्ये चन्द्रे वा यदि ग्रहणं स्यात् तदा) अन्तर्गिरिजान् सपश्चिमजनान् भारोद्वहान् तस्करान् आभीरान् दरदान् आर्यान् सिंहपुरकान् तथा बर्बरान् हन्यात्।

मीने (स्थिते सूर्ये चन्द्रे वा ग्रहणे सति) सागरकूलं सागरजलद्रव्याणि वन्यान् जनान् प्राज्ञान् वार्युपजीविनं च (हन्यात्) भफलं कर्मोपदेशात् वदेत्।

प्रतिपदार्थः

धन्विनिः = धनुराशिस्थिते (सूर्ये चन्द्रे वा ग्रहणं भवति तदा), अमात्याः = मन्त्रिणः, वराः = प्रधानाः, अथवा अमात्यवराः = प्रधानमन्त्रिणः, वाजिनः = अश्वान्, विदेहान् = विदेहप्रदेशस्य जनान्, मल्लान् = बाहुयुद्धं ये जानन्ति तान्, पाञ्चालान् = पाञ्चालदेशीयजनान्, वैद्यान् = कायचिकित्सकान्, वणिजः =क्रयविक्रयिणः, विषमायुधज्ञान् = विषप्रयोगं तथा आयुध विज्ञानं च जानन्ति तान्, (हन्यात्)

मृगे = मकरराशिस्थिते (सूर्ये चन्द्रे वा यदि ग्रहणं भवति तदा) झषान् = मत्स्यान्, मन्त्रिन् = सचिवान्, कुलानि = वंशाः अथवा मन्त्रिणां सचिवानां वा कुलानि, नीचान् = अधर्मकर्मकरान् मन्त्रौपधीषु च कुशलान् = मन्त्रेषु शैववैष्णवसौरेषु औषधीषु च कुशलान् प्रवीणान् वा, स्थविरान् = वृद्धान्, आयुधीया् = आयुधजीविनः अस्त्रशस्त्रादि = निर्माणद्वारा प्रयोगेन वा जीविकां प्राप्नुवन्ति ते, यथा सैनिकाः, आयुधनिर्मातादयः (तान् हन्यात्)

कुम्भे = कुम्भराशिस्थिते (सूर्ये चन्द्रे वा ग्रस्ते) अन्तर्गिरिजान् = अन्तर्मध्ये गिरौ अर्थात् पर्वते जाता अर्थात् उत्पन्नाः अर्थात् पर्वतेषु उत्पन्नानां जनान्, सपश्चिमजनान् = पश्चिमदिग्वासिनः जनैः सह, भारोद्वहान् = भारवाहिनः जनान्, तस्करान् = चौरान्, आभीरान् = आभीरदेशीयान् जनान्, दरदान् = दरददेशनिवासिनः, आर्यान् = प्रधानजनान्, सिंहपुरकान् = सिंहपुरदेशनिवासिनः, वर्बरान् = बर्बरदुष्टजनान्, हन्यात् =निहन्ति।

मीने = मीनराशिस्थिते (सूर्ये चन्द्रे वा ग्रस्ते) सागरकूलान् = समुद्रस्य

तटवर्तीप्रदेशे निवासिनः, सागरजलद्रव्याणि = समुद्रोत्पन्नानि द्रव्यानि रत्नशङ्खादीनि, वन्यान् = वने उत्पन्नान्, प्राज्ञान् =बुद्धियुक्तान् जनान्, वार्युपजीविनम् = जलोपजीविनः, मत्स्यपालकाः, मुक्ताशङ्खादीनां विक्रेता, तान् च हन्यात्। भफलं = नक्षत्रफलं, कूर्मोपदेशात्= कूर्मविभागचक्रे कथितान्, वदेत् = कथयेत् ब्रूयात् वा।

व्याख्या – एतेषु श्लोकेषु धनुराशितः आरभ्य मीनराशिपर्यन्तं चतुर्षु राशिषु सूर्ये चन्द्रे वा स्थिते ग्रहणे जाते किं फलं भवतीति वर्णितम्। धनुराशिस्थिते सूर्ये चन्द्रे वा यदि ग्रहणं भवति तदा प्रधानमन्त्रिणः, प्रधानपुरुषाः, अश्वाः, विदेहदेशे स्थिताः जनाः, बाहुयुद्धेकुशलीनः जनाः, पाञ्चालादेशनिवासिनः, चिकित्साकर्मे निरताः वैद्याः, वणिजः क्रयविक्रयेण येषां जीविका भवति ते जनाः, विषप्रयोगे आधुयशस्त्रादीनां प्रयोगे ये कुशलाः जनाः पीडिताः भवन्ति।

मकरराशिस्थिते सूर्ये चन्द्रे वा यदि ग्रहणं भवति तदा मत्स्याः, सचिवाः, सचिवानां कुलानि, अधमकर्मे निरताः जनाः, मन्त्रेषु शैववैष्णवशाक्तसौरेषु च कुशलाः, औषधनिर्माणे प्रयोगे च कुशलाः, वयोवृद्धाः जनाः, अस्त्रशस्त्रादि आयुधैः जीविकां प्राप्नुवन्ति ते जनाः पीडिताः भवन्ति।

कुम्भराशिस्थिते सूर्ये चन्द्रे वा ग्रस्ते सति पर्वतेषु उत्पन्नाः मनुष्याः जन्तवश्च, अर्थात् पर्वतान्तर्वर्तीप्रदेशेषु जाताः प्राणिनः, पश्चिमदिग्वासिनः, भारवाहकाः, चौराः, आभीरदेशीयाः जनाः, दरदप्रदेशनिवासिनः, प्रधानजनाः, सिंहपुरदेशनिवासिनः क्रूरजनाः, आक्रमणकारिणः बर्बराः, एते जनाः पीडां प्राप्नुवन्ति।

मीनराशिस्थिते भास्करे चन्द्रे वा यदि ग्रहणं भवति अर्थात् मीनराशौ यदि सूर्यग्रहणं चन्द्रग्रहणं वा भवति तदा समुद्रस्य तटवर्ती प्रदेशनिवासिनः पीडिताः भवन्ति। समुद्रस्य जले यानि द्रव्याणि उत्पद्यन्ते यथा मुक्तादिरत्नानि, शङ्खादीनि तेषामपि हानिः भवति। वन्यप्राणिनः, बुद्धिमन्तः जनाः च पीडिताः भवन्ति। जलेन, जलोत्पन्नैः पदार्थैः वा येषां जीविका भवति तादृशाः मत्स्यपालकाः, मुक्ताशङ्खादिविक्रेतारः पीडिताः भवन्ति। इत्येवं प्रकारेण द्वादशराशिषु सूर्यचन्द्रयोः ग्रहणफलं दैवज्ञवराहमिहिरेण वर्णितम्। परन्तु अन्तिमायां पंक्तौ नक्षत्रेषु ग्रहणफलप्रतिपादस्य सूत्रं निर्दिष्टम्। नक्षत्रेषु ग्रहणफलं कूर्मविभागानुसारेण वक्तव्यम्। कूर्मनचक्रस्य विस्तृतपरिचयः भवान् विंशतितमे अध्याये प्राप्स्यति। तत्र एकस्मिन् कूर्मचक्रे सर्वेषां नक्षत्राणां स्थापना कृता अस्ति। यत् नक्षत्रस्थौ सूर्यचन्द्रौ ग्रहणसमये भवतः तत् नक्षत्रं कूर्मविभागेन यस्मिन् देशे उक्तं तस्मिन् देशे जनानां पीडा भवति। प्रागादिदिक्षु नक्षत्राणां विभाजनम् एव वर्णितम् –

नक्षत्रत्रयवर्गैराग्याद्यैर्व्यवस्थितैर्नवधा।
भारतवर्षे मध्यात् प्रागादिविभाजिता देशाः॥

श्लोकस्य व्याख्यायां टीकाकारेण पराशरस्य वचनानि उद्धृतानि सन्ति प्रत्येकस्मिन् नक्षत्रे ग्रहणस्य फलं निर्दिष्टमस्ति।

अथ कृत्तिकासु कलिंगानामधिपतीन् पीडयति। रोहिण्यां हृत् शस्त्रकोपैः प्रजानाम्, मृगशिरसि सालनिषादकैकयान् आर्द्रायां शुकान् कुकुरान् पल्वलोपजीविनश्च। पुनर्वसौ पण्यान् रुरुकर्पासं च। पुष्ये गोमतिसिन्धुसौवीरकुरुपाञ्चालान्। सार्पे आश्लेषा नक्षत्रे काशिकलिंगसिंहलकराजन्यान्। पित्र्ये (मघानक्षत्रे) दण्डकनिवासिनः पितृधान्यं च। भाग्ये (पूर्वाफाल्गुनीनक्षत्रे) सुभगान् काम्बोजान् सुराष्ट्राधिपतीन् च। अर्यम्णे (उत्तराफाल्गुनीनक्षत्रे) मगधान् यवनान्। हस्ते दशार्णान्। त्वाष्ट्रे (चित्रानक्षत्रे) मद्रान् कुरुक्षेत्रं च। वायव्ये (स्वातीनक्षत्रे) काश्मीरोशीनरान् वाजिनश्च। विशाखायां वृक्षाश्मकान्। मैत्रे (अनुराधानक्षत्रे) काशिकोशलान्। ज्येष्ठायां ज्येष्ठनृपतीन् दरदाश्च। मूले क्षुद्रमालवकयौधेयान्। आप्ये (पूर्वषाढानक्षत्रे) पञ्चनदान्

सुवीराधिपतिं च। वैश्वदेवे (उत्तरषाढानक्षत्रे) आर्जुनायनपौण्ड्रशिबिमालवान्। श्रवणे सत्त्वावतंसकांश्च। वासवे (धनिष्ठानक्षत्रे) धनिनः शकानण्डजांश्च। वारुणे (शताभिषानक्षत्रे) कैकयपाञ्चालराजांश्च अजे (पूर्वाभाद्रपदनक्षत्रेवङ्गमगधकुक्कुरान्, अहिर्बुध्ने) (उत्तराभाद्रपदनक्षेत्र) अश्मकेक्षुक्षुद्रकत्रिगर्त्तान्। पौष्णे (रेवतीनक्षत्रे) च वैदेहानर्त्तकसिन्धुसौवीरान्। आश्विने (आश्विनीनक्षत्रे) अश्वान् अश्वजीविनश्च। याम्ये (भरणीनक्षत्रे) कलिङ्गान् दक्षिणान् उपतापयति।

यस्मिन् नक्षत्रे ग्रहणं भवति तत्संबंधिताः देशाः पीडिताः भवन्ति, यथोक्तं समाससंहितायाम् –

कूर्मविभागेन वदेत् पीडां देशस्य वीक्ष्य नक्षत्रम्।
सहितं ग्रहणं येन तद्देशश्चाप्नुयात् पीडाम्।

७.५ सूर्यचन्द्रयोः दशविधग्रासाः

सूर्यचन्द्रयोः ग्रहणस्य लक्षणवशात् दशभेदाः आचार्येण वर्णिताः। तेषां नामानि एवं सन्ति।

सव्यापसव्यलेहग्रसननिरोधावमर्दनारोहाः।
आघ्रातं मध्यतमस्तमोऽन्त्य इति ते दश ग्रासाः॥

अन्वयः – सव्यः अपसव्यः लेहः ग्रसनं निरोधः अवमर्दनम् आरोहः आघ्रातं मध्यतमः तमोऽन्त्य इति ते दशग्रासाः (भवन्ति)। अत्र प्रतिपदार्थः स्पष्ट एव।

व्याख्या – सूर्यचन्द्रयोः ग्रहणं वराहमिहिरेण लक्षणभेदेन स्वरूपभेदेन च दशधा विभक्तमस्ति। ते च एवं सन्ति –

१. सव्यः २. अपसव्यः ३. लेहः ४. ग्रसनम्
५. निरोधः ६. अवमर्दनम् ७. आरोहः ८. आघ्रातम्
९. मध्यतमः १०. तमोऽन्त्यः।

एतेषां लक्षणस्वरूपविषये फलविषये च अग्रे पठामः।

७.५.१ सव्यादिग्रासानां लक्षणं फलञ्च

सव्यादिग्रासानां लक्षणविषये तु आचार्यवराहमिहिरेण स्पष्टतया न लिखितं तेषां फलविषये एव विशेषरूपेण वर्णितम्। परन्तु भट्टोत्पलेन सर्वेषां ग्रासानां लक्षणविषयेऽपि भट्टोत्पलटीकायां विशेषरूपेण वर्णनं कृतमस्ति। अतः सव्यादित्रयाणां ग्रासानां विषये पठामः। आचार्येण विहितम्–

सव्यगते तमसि जगज्जप्लुतं भवति मुदितमभयं च।
अपसव्ये नरपतितस्करावमर्दैः प्रजानाशः॥

अन्वयः – तमसि सव्यगते जगत् जलप्लुतं मुदितम् अभयं च भवति। अपसव्ये नरपते तस्कराणाम् आमर्दैः प्रजानाशः (भवति)

प्रतिपदार्थः – तमसि = राहौ, सव्यगते = चन्द्रस्य अथवा सूर्यस्य दक्षिणभागगते, जगत् = संसारः, जलप्लुतं = वारिणा प्लावितः जलेन पूरितः वा मुदितं = हृष्टम्, अभयं = भयरहितं च भवति। अपसव्ये = वामभागगते (राहौ) नरपते राज्ञस्तरकराणां चौराणामवमर्दैः = पीडनैः प्रजानाशः = प्रजायाः हानिः संक्षयो भवति।

व्याख्या – श्लोकेऽस्मिन् सव्यापसव्यग्रहणयोः फलविवेचनं कृतमस्ति। यदि राहुः दक्षिणभागतः सूर्यस्य चन्द्रस्य वा ग्रहणं करोति तदा जगत् जलेन पूरितं भवति धान्यादिवृद्धिद्वारा जनाः प्रसन्नाः मुदिताः भवति तथा लोकः भयेन रहितः भवति।

तथा च यदि राहुः वामभागतः सूर्यस्य चन्द्रस्य वा ग्रासः करोति तदा राजानः पीडिताः भवति, चौरणां लुण्ठकानां च विनाशः भवति। प्रजायाः च विनाशः भवति।

कदा च राहुः सव्यः कदा च अपसव्यः भवतीति प्रश्ने सति भट्टोत्पलेन उक्तं यत् चन्द्रग्रहणे आग्नेय्यां राहोः आगमनं सव्यःऐशान्यां च अपसव्यः भवति। तथा सूर्यग्रहणे वायव्यदिशि राहोरागमनं सव्यः तथा नैर्ऋत्यां दिशि राहोः आगमनम् अपसव्यः भवति।

तदनन्तरं लेहग्रहणस्य लक्षणं फलं च दैवज्ञेन एवं वर्णितम्।

जिह्वोपलेढि परितस्तिमिरनुदो मण्डलं यदि स लेहः।
प्रमुदितसमस्तभूता प्रभूततोया च तत्र मही॥

अन्वयः – (चन्द्रस्य अर्कस्य वा) यदि तिमिः अनुदः परितः मण्डलं जिह्वोपलेढि स लेह (तस्मिन् ग्रासे) तत्र मही प्रमुदितसमस्तभूता प्रभूततोया च (भवति)

प्रतिपदार्थः – (चन्द्रस्य अर्कस्य वा) तिमिः = अंधकारं नुदति प्रेरयति इति तिमिरनुदः (तस्य) परितः = समन्ततः, मण्डलं = बिम्बं, जिह्वालेढि जिह्वया = रसनया उपलीढमिव दृश्यते तथा स ग्रासः, लेह इति। तत्र तस्मिन् ग्रासे) मही = भूः प्रमुदितसमस्तभूता = प्रकर्षेण मुदिता = हर्षिता समस्ता भूता = जना यस्यां तथा प्रभूततोया वारिबहुला च भवति।

व्याख्या – यदि ग्रहणकाले चन्द्रस्य सूर्यस्य वा बिम्बं समन्ततः अन्धकाररूपरसनया उपलीढम् अन्धकाररूपाछाया तु साक्षात् राहुः एव कथिता अतः राहुः सूर्यबिम्बं चन्द्रबिम्बं वा स्वरसनया उपलेढनं कर्तुम् इव दृश्यते तदा लेह संज्ञकः ग्रासः भवति अर्थात् लोके जनाः प्रमुदिताः भवन्ति तथा भूमिः जलेन परिपूर्णा भवति अर्थात् बहुलावृष्टिः भवति, तेन सस्यादिकस्य वृद्धिः लोके जनाः प्रमुदिताः च भवन्ति। वारिबहुला प्रभूततोया जलाधिक्ययुक्तावा भवति।

इत्येवं प्रकारेण सव्यादित्रयः ग्रासाः पठिताः। ग्रसनादीनां विषये अग्रे पठामः।

७.५.२ ग्रसनादिग्रासानां लक्षणं फलञ्च

लेहनामकस्य ग्रहणानन्तरं दैवज्ञेन ग्रसनादिग्रासाानां विषये एवं वर्णितम्।

ग्रसनमिति यदा त्र्यंशः पादो वा गृह्यतेऽथवाऽप्यर्द्धम्।
स्फीतनृपवित्तहानिः पीडा च स्फीतदेशानाम्॥

अन्वयः – त्र्यंशः पादः वाऽयवा अर्द्धं गृह्यते यदा (सः ग्रासः) ग्रसनम् इति। (तस्मिन् ग्रासे) स्फीतनृपवित्तहानिः स्फीतदेशानां च पीडा (भवति)

प्रतिपदार्थः – त्र्यंशः = त्रिभागः, पादः = चतुर्भागः, अर्द्धं = अर्धभागः बिम्बार्द्धं वा, गृह्यते= तमसा आच्छाद्यते राहुणा वा ग्रसितः भवति तदा सः ग्रासः =ग्रहणं, ग्रसनं = ग्रसनं नाम्ना ज्ञायते। (तस्मिन् ग्रासे) स्फीतनृपवित्तहानिः स्फीतानाम्= अतिविभवयुक्तानां, नृपाणां= राज्ञां, वित्तहानिः= धननाशः भवति। तथा स्फीतानां = सधनानां च देशानां = प्रदेशानां, पीडा = कष्टं भवति।

व्याख्या – यदि ग्रहणकाले सूर्यस्य चन्द्रबिम्बस्य वा तृतीयांशः, चतुर्थांशः, अर्द्धांशः बिम्बार्धः वा राहुणा आच्छाद्यते तमसा वा गृह्यते तदा तस्य ग्रहणस्य नाम भवति 'ग्रसनम्'।

तस्मिन् ग्रासे अतिविभवयुक्तानां राज्ञां धननाशः भवति तथा च साधनानां देशानां पीडा भवति। अर्थात् मुख्यतया ग्रसननामके ग्रहणे धनीनां, अत्यधिकवैभवयुक्तानां जनानां तथा धन्यधान्यवैभवयुक्तानां देशानां च पीडा भवति।

ग्रसनग्रासस्य वर्णनान्तरं निरोधनामकस्य ग्रासस्य विषये आचार्येण वर्णितम्।

पर्यन्तेषु गृहीत्वा मध्ये पिण्डीकृतं तमस्तिष्ठेत्।
स निरोधो विज्ञेयः प्रमोदकृत् सर्वभूतानाम्॥

अन्वयः – तमः पर्यन्तेषु गृहीत्वा समन्ततः मध्ये पिण्डीकृतं तिष्ठेत् (तदा स ग्रासः) निरोधः विज्ञेयः। (स च) सर्वभूतानां प्रमोदकृत् (भवति)

प्रतिपदार्थः – तमः = राहुः, पर्यन्तेषु गृहीत्वा समन्ततः संछाद्य = ग्रहणं = मध्यभागे, पिण्डीकृतं = घनतरं भूत्वा यदि तिष्ठेत् = स्थितः स्यात्)तदा सः ग्रासः) निरोधः = निरोधसंज्ञकः विज्ञेयः = ज्ञातव्यः। सः च सर्वभूतानां = निःशेष-प्राणीनां, प्रमोदकृत् = हर्षकृत् (भवति)

व्याख्या – यदि राहुः सूर्यमण्डलं चन्द्रमण्डलं पर्यन्तेषु ग्रसनं कृत्वा समन्ततः सन् बिम्बस्य मध्यभागे घनतरं भूत्वा यदि स्थितः स्यात् तदा तस्य ग्रासस्य निरोध संज्ञा भवति। अर्थात् यदि बिम्बस्य मध्यभागः विशेषरूपेण ग्रसितः भवति तदा तस्य ग्रहणस्य निरोध संज्ञा भवति। निरोधसंज्ञकः ग्रासः सर्वेषां प्राणीनां कृते हर्षदायकः भवति। अस्मिन् ग्रहणे सर्वे मनुष्याः जन्तवः वनस्पतयश्च सुखमाप्नुवन्ति।

बोधप्रश्नाः

१. उत्तरायणे दृष्टः राहुः कान् निहन्ति?

२. पश्चिमायां दिशिः दृष्टः राहुः कान् पीडयति?

३. विदिक्षु दृष्टस्य राहोः फलं लिखत।

४. मेषराशौ ग्रहणे सति किं फलं भवति?

५. कन्याराशौ ग्रहणे सति किं फलं भवति?

६. नक्षत्रेषु ग्रहणफलं कथं वदेत्?

7. सूर्यचन्द्रयोः ग्रहणं कतिविधं भवति?

८. लेहग्रहणे सति किं फलं भवति?

७.६ अवमर्दनादिग्रासानां लक्षणं फलञ्च

इदानीं पर्यन्तं भवता दशग्रासेषु पञ्चग्रहणानि पठितानि। ततः अग्रे पठामः। षष्ठस्य अवमर्दनग्रहणस्य लक्षणम् आचार्येण एवं वर्णितम् –

अवमर्दनमिति निःशेषमेव सञ्छाद्य यदि चिरं तिष्ठेत्।
हन्यात् प्रधानभूपान् प्रधानदेशांश्च तिमिरमयः॥

अन्वयः – तिमिरमयः निःशेषम् एव (मण्डलं) सञ्छाद्य यदि चिरं तिष्ठेत् (तदा) अवमर्दनम् इति। (सः ग्रासः) प्रधानभूपान् = प्रधानान् नृपान्, प्रधानदेशान् = प्रधानान् देशान् च हन्यात् = घातयेत्।

व्याख्या – यदा सूर्यग्रहणे अथवा चन्द्रग्रहणे राहुः सम्पूर्णस्य बिम्बस्य आच्छादनं कृत्वा यदि बहुकालं यावत् तिष्ठेत् तदा तस्य ग्रहणस्य अवमर्दनसंज्ञा भवति। अवमर्दनग्रासे सम्पूर्णः बिम्बः अन्धकारेण राहुणा वा आच्छादितो भवति। अवमर्दनग्रासः प्रधाननृपान् प्रधानदेशान् च घातयति। अर्थात् ये प्रमुखाः राजानः भवति तथा ये प्रधानदेशाः भवन्ति ते पीडामाप्नुवन्ति।

अवमर्दनग्रहणानन्तरम् आरोहणग्रासविषये आचार्य वराहमिहिरेण एवं वर्णितम् –

वृत्ते ग्रहे यदि तमस्तत्क्षणमावृत्य दृश्यते भूयः।
आरोहणमित्यन्योऽन्यमर्दनैर्भयकरं राज्ञाम्॥

अन्वयः – ग्रहे वृत्ते भूयः यदि (चेत्) तमः तत्क्षणम्

आवृत्य दृश्यते (तदा) आरोहरणम् इति। अस्मिन् राज्ञाम् अन्योऽन्यमर्दनैः भयं भवति।

प्रतिपदार्थः – ग्रहे = ग्रहणे, वृत्ते = निवृत्ते अतिक्रान्ते वा, भूयः = पुनः यदि (चेत्) तमः = राहुः छादयन्, दृश्यते = दर्शनम् आगच्छेत्, (तदा) आरोहरणम् = आरोहणं नाम ग्रासः (भवति) (तच्च) राज्ञां = नृपाणाम्, अन्योऽन्यमर्दनैः = परस्परावमर्दनैः, भयकरं = भीतिं करोति।

व्याख्या – सूर्यस्य चन्द्रस्य वा ग्रहणानन्तरं यदि राहुः पुनः तस्मिन् काले एव दर्शनमायाति तदा सः ग्रासः आरोहणं नाम्ना ज्ञायते। अस्मिन् आरोहणनाम्ने ग्रहणे नृपाणां परस्परं संघर्षेण हानिः भवति। अनेक राज्ञां भीतिजनकं भवति। परस्परसंघर्षेण निर्बलानां राज्ञां मनसि आक्रमणस्य भयं तथा सबलराज्ञां च मनसि अन्यानां राज्ञां आक्रमणस्य भयं भवति। अनेन भयकारणात् परस्परं राज्ञां संघर्षः भवति।

आरोहणग्रहणानन्तरम् आघ्रातग्रहणविषये आचार्येण एवं वर्णितम्–

दर्पण इवैकदेशे सबाष्पनिः श्वासमारुतोपहतः।
दृश्येताऽऽघ्रातं तत् सुवृष्टिवृद्ध्यावहं जगतः॥

अन्वयः – दर्पण इव एकदेशे सवाष्पेण निःश्वास-मारुतेन उपहतः दृश्येत (सः ग्रासः) आघ्रातं (संज्ञकः भवति) तत् जगतः सुवृष्टिवृद्ध्यावहं (भवति)

प्रतिपदार्थः – दर्पण = आदर्शः, इव, एकदेशे = एकस्मिन् स्थाने, सवाष्पेण = सोष्मणा, निःश्वासमारुतोहतः = श्वासवायुना च उपहतः, दृश्येत = अवलोक्येत तदा आघ्रातं = आघ्रातं नाम ग्रासः (भवति) तत् जगतः = संसारस्य, सुवृष्टिवृद्ध्यावहं – शोभनां वृष्टिं वृद्धिं च वहति जगतो जनपदस्य।

व्याख्या – यदि ग्रहणकाले सूर्यमण्डले चन्द्रमण्डले वा एकस्मिन् स्थाने वाष्पयुक्तेन निःश्वासेन वायुना उपहतः इव भागः दृश्येत तदा आघ्रातं नाम ग्रासः भवति। तच्च ग्रहणं लोके सुवृष्टिं करोति तथा जनपदस्य वृद्धिं करोति। दर्पणोपरि निःश्वासवायुना कदाचित् वृद्धिं करोति। दर्पणोपरि निश्वासवायुना कदाचित् वाष्पयुक्तभागः दृष्टिपथि आगच्छति तथैव वाष्पसदृशस्वरूपं यदि ग्रहणकाले यदि सूर्यमण्डले चन्द्रमण्डले वा दृश्येत तदा आघ्रातं नाम ग्रहणं फलति, तस्मिन् ग्रहणे सुवृष्टिः तथा जनपदस्य वृद्धिः भवति।

७.७ मध्यतमसादिग्रासानां लक्षणं फलञ्च

ग्रहणस्य नवमः प्रकार भवति मध्यतमग्रहणं, तस्य लक्षणं दैवज्ञेन एवं विहितम्।

मध्ये तमः प्रविष्टं वितमस्कं मण्डलं च यदि परितः।
तन्मध्यदेशनाशं करोति कुक्ष्यामयभयं च॥

अन्वयः – तमः मध्ये यदि प्रविष्टं (दृश्यते) परितः मण्डलं वितमस्कं (भवति तदा ग्रासो मध्यतमः नाम) तत् च मध्यदेशनाशं करोति (तथा) कुक्ष्यामयभयं।

प्रतिपदार्थः – तमः = राहुः, मध्ये = अन्तः यदि प्रविष्टः = समागतः, (दृश्यते) परितः = समन्ततः, मण्डलं = बिम्बः, वितमस्कं = तमोरहितं निर्मलं (भवति तदा मध्यतमः नाम ग्रासः) तत् मध्यदेशनाशं = मध्यदेशस्य नाशं = विघातं करोति (तथा) कुक्ष्यामयभयं = कुक्षिरोगभयं (करोति)

व्याख्या – यदि सूर्यग्रहणे अथवा चन्द्रग्रहणे राहुः बिम्बस्य मध्ये प्रविष्टः भवति परन्तु तस्य राहोः परितः तमोरहितं निर्मलं मण्डलमपि दृश्येत तदा तत् ग्रहणं मध्यतमस नाम्ना ज्ञायते। यतो हि अस्मिन् ग्रहणे बिम्बस्य मध्यभागः एव तमसा आवृतः भवति अतः अस्य मध्यतम संज्ञा प्रदत्ता एषः ग्रासः सूर्यग्रहणे एव सम्भवति यतो हि सूर्यग्रहणे छाद्यबिम्बस्य (सूर्यस्य) अपेक्षया छादकः (चन्द्रः) बिम्बः अल्पः भवति। अतः छादकः चन्द्रः कदाचित् छाद्यसूर्यस्य सम्पूर्णबिम्बं न छादयति अपितु तस्य मध्यभागम् एवं छादयति तदा मध्यतमग्रहणं भवति। परन्तु चन्द्रग्रहणे एतादृशी स्थितिः नैव भवति यतो हि चन्द्रग्रहणे छाद्यबिम्बात् (चन्द्रबिम्बात्) छादकः (महीच्छाया) दीर्घतरा भवति अतः भूमेः छाया चन्द्रबिम्बस्य मध्यभागे समावेष्टुं न शक्नोति। अतः सूर्यग्रहणे एव एतादृशः वलयग्रासः संभवति।

अस्मिन् ग्रहणे मध्यदेशानां विनाशः भवति। मध्यदेशानां निर्णयं कूर्माचक्रानुसारं करणीयम्। तथा च कुक्षरोगेण जनाः पीडिताः भवन्ति। अर्थात् लोके उदररोगकारणात् जनाः भीताः भवन्ति।

मध्यतमग्रहणानन्तरं ग्रहणस्य दशमः अन्तिमश्च प्रकारः वर्तते तमोऽन्त्यग्रहणम्। तद्विषये आचार्येण एवमुक्तम्।

पय्येर्यन्तेष्वतिबहुलं स्वल्पं मध्ये तमस्तमोऽन्त्याख्ये।
सस्यानामीतिभयं भयमस्मिस्तस्कराणां च॥

अन्वयः – तमः पर्यन्तेषु अतिबहुलं मध्ये स्वल्पं (दृश्यते) (तदा स) तमोऽन्त्याख्यः (ग्रासः) अस्मिन् (ग्रासे) सस्यानाम् ईतिभयं तस्कराणां च (भयं भवति)

प्रतिपदार्थः – तमः = राहुः, पर्यन्तेषु = बिम्बपरिधे मध्यभागे स्वल्पम् = अत्यल्पं (दृश्यते तदा सः) तमोऽन्त्याख्य = तमोऽन्त्यसंज्ञकः ग्रासः भवति। अस्मिन् = तमोऽन्त्याख्ये ग्रासे सस्यानाम् = धान्यानाम्, ईतिभयं = ईतिजनितं भयं भवति।

परिधिभागेषु अधिकं ग्रहणं परन्तु मध्यभागे स्वल्पः एव अन्धकारः भवति तदा तमोऽन्त्यसंज्ञकः आशयः भवति अन्तिमभागेषु अर्थात् बिम्बस्य परिधिभागेषु अनेन तमोऽन्त्य शब्दस्य आशयः भवति बिम्बस्य अन्त्यभागेषु तमसः आधिक्यम्। अस्मिन् ग्रहणे सस्यानाम् ईतिभिः विनाशकाः ईतयः इति शब्देन व्यवहृताः सन्ति। ताश्च इतयः भवन्ति। अतिवृष्टिः, अनावृष्टिः, मूषकाः, शलभाः (कीटविशेषः, हिन्दीभाषायां, टीड्डा) शुकाः (पक्षिणः) तथा च अति आसन्ना भोगिनः राजानश्च। एता षड् ईतयः भट्टोत्पलेन टीकायाम् उल्लिखिता–

अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः।
अव्यासन्नाश्च राजानः षडेता ईतयः स्मृताः॥

इत्येव प्रकारेण वराहमिहिरेण ग्रहणस्य दशभेदानां लक्षणानि पुलानि च विवेचितानि। कश्यपमतेऽपि दशग्रासानां फलानि अनया रीत्या एव विवेचितानि सन्ति–

सव्यगे तु सुभिक्षं स्यादपसव्ये तु तस्कराः।
लीढे प्रजाः प्रहृष्टाः स्युर्ग्रसनं लोकनाशनम्॥
निरोधे जनहर्षः स्यादारोहे नृपसंक्षयः।
आमर्दितं चापमर्दे स्वयं क्षुभ्यन्ति पार्थिवाः॥
स्वच्छं वर्णप्रदेशं यदाघ्रातं तद्विघातयेत्।
मध्ये तमसि सन्दृष्टे पीडयेद् मध्यदेशजान्॥
दृष्टे तमसि पर्यन्ते सस्यानामीतिजं भयम्॥

७.८ राहोः वर्णवशात् फलविवेचनम्

ग्रहणस्य लक्षणस्वरूपवशात् फलानि भवता पठितानि। तदनन्तरं ग्रहणस्य वर्णवशात् फलानि आचार्येण एवं वर्णितानि–

श्वेते क्षेमसुभिक्षं ब्राह्मणपीडां च निर्दिशेद्राहौ।
अग्निभयमनलवर्णे पीडा च हुताशवृत्तीनाम्॥

हरिते रोगोल्बणता सस्यानामीतिभिश्च विध्वंसः।
कपिले शीघ्रगसत्त्वम्लेछध्वंसोऽथ दुर्भिक्षम्॥

अरुणकिरणानुरुपे दुर्भिक्षावृष्टयो विहगपीडा।
आधूम्रे क्षेमसुभिक्षमादिशेन्मन्दवृष्टिं च॥

कापोतारुणकपिलश्यावाभे क्षुद्भयं विनिर्देश्यम्।
कापोतः शूद्राणां व्याधिकरः कृष्णवर्णश्च॥

विमलकमणिपीताभौ वैश्यध्वंसी भवेत् सुभिक्षाय।
सार्चिष्मत्यग्निभयं गैरिकरूपे तु युद्धानि॥

दूर्वाकाण्डश्यामे हारिद्रे वापि निर्दिशेन्मरकम्।
अशनिभयसम्प्रदायी पाटलकुसुमोपमो राहुः।

पांशुविलोहितरूपः क्षत्रध्वंसाय भवति वृष्टेश्च।
बालरविकमलसुरचापरुपभृच्छस्त्रकोपाय॥

अन्वयः – अत्र पदानाम् अन्वयः स्पष्ट एव पुनश्च प्रतिपदार्थवर्णने तु अन्वयः इतोऽपि स्पष्टरः भविष्यति।

प्रतिपदार्थः – राहौ=तमसि (ग्रहणम्) श्वेते=शुक्लवर्णे दृष्टे, क्षेमं = कल्याणं, सुभिक्षं = सौख्यम्, ब्राह्मणपीडां = ब्राह्मणानां च पीडां, निर्दिशेत् = विनिर्दिशेत्, अनलवर्णे= अग्निसदृशे वर्णे, अग्निभयं = अग्निना भयं, हुताशवृत्तीनाम् = अग्निना येषाम् आजिविका भवति तेषाम् अग्निवार्त्तानां, पीडा = कष्टं भवति।

हरिते = हरितवर्णे, शुकसदृशे वर्णे (राहौ) रोगोल्बणता = रोगप्राचुर्यम्, सस्यानां = धान्यानाम्, ईतिभिः = अतिवृष्टिप्रभृतिभिः उपद्रवैः च, विध्वंसः = विनाशो भवति। कपिले = पिंङ्गलवर्णे, (राहौ), शीघ्रगसत्त्व = शीघ्रमानाम्, उष्ट्रादिजन्तूना (तथा) म्लेच्छध्वंसो = म्लेच्छानां विनाश, दुर्भिक्ष अवृष्टिः च भवति। अथशब्दः स्वार्थे।

अरुणकिरणानुरूपे = अरुणरश्मिसदृशे ईषत् (किञ्चत्) लोहितवर्णः वा, दुर्भिक्षावृष्टयो= जलाभावम् अवृष्टिश्च, विहगपीडा= पक्षिणां पीडा च भवति। आधूम्रे= धूम्रवर्णे, क्षेमं = सुभिक्षं च आदिशेत् = वदेत्, मन्दवृष्टिं च = स्वल्पां च वृष्टिं (वदेत्)

कापोतः = कपोतवर्णः (तस्मिन् तथा) अरुणे = लोहितवर्णे, कपिले = कपिलवर्णे, श्यावे = श्याववर्णे, क्षुद्भयं = दुर्भिक्षभयं, विनिर्देश्यं = वक्तव्यम्। कापोतः = कपोतवर्णः, कृष्णवर्णश्च = तथा च कृष्णवर्णः, शूद्राणां = शूद्रजातीनां, व्याधिकरः = पीडावहः भवति।

विमलकमणिपीताभो = विमलकमणेः इव पीता आभा (कान्तिः) यस्य सः, नीलपीत इत्यर्थः। एवं विधे वैश्यध्वंसी = वैश्यहन्ता, भवेत् = स्यात्। सुभिक्षाय भवेत् = सुभिक्षकृद्भवेत्। सार्चिष्मति = सज्वाले, (राहौ) अग्निभयं = अग्निना भयं (भवति) तथा गैरिकरूपे = गैरिकसदृशे रूपे तु युद्धानि = संग्रामाः भवन्ति।

दूर्वाकाण्डश्यामे = दूर्वाकाण्डवत् श्यामे, शाद्वलप्रणालतुल्यवर्णे, हारिद्रे = अतीपीतवर्णे वा अपि मरणं = मृत्युः, निर्दिशेत् = वदेत्। राहुः (यदि) पाटलकुसुमोपमः = पाटलपुष्पसदृशः श्वेतलोहित इत्यर्थः (तथाभूतो) अशनिभयसम्प्रदायी = अशनिभयप्रदायकः भवति, अत्र अशनि उल्कायाः विशेषप्रकारः भवति।

पांशुरूपः = मृत्तिका (रजः) विशेषरूपसदृशः विलोहितरूपः = व्यामिश्रवर्णः, क्षत्रध्वंसाय = क्षत्रियाणां नाशाय, वृष्टेश्च = वृष्टिनाशाय च (भवति)। तथा बालरविः = बालार्कः उदितसूर्यस्य वर्णसदृशरूपं, कमल = पद्मसदृशः, सुरचापरूप = इन्द्रधनुषः, सदृशं = तुल्यं, रूपं = कान्तिं (यदा) धारयति तदा) शस्त्रकोपाय = शस्त्रेण भयं, युद्धस्य भयं वा भवति।

व्याख्या – एतेषु श्लोकेषु सूर्यग्रहणे चन्द्रग्रहणे वा राहोः वर्णस्य दर्शनवशात् फलानि वर्णितानि सन्ति। यदि ग्रहणकाले श्वेतवर्णस्य राहुः दृश्यते तदा कल्याणं सुभिक्षं भवति परन्तु ब्राह्मजातीनां पीडा भवति यदि राहो अग्निसदृशं वर्णं भवति तदा अग्निना ये आजीविकां प्राप्नुवन्ति यथा- लोहकारसुवर्णकारपाचकाः ते पीडिताः भवन्ति।

शुकसदृशे हरिणवर्णे राहौ दृष्टे रोगाणां प्राचुर्यं भवति। महामारीसदृशाः रोगाः प्रसरन्ति। तथा च सस्यानाम् ईतिभिः विध्वंसः भवति। ईतीनां विषये पूर्वस्मिन् श्लोके भवता पठितं यत् अतिवृष्टिः अनावृष्टिः मूषकाः शलभाः शुकाः अत्यासन्नाः राजानः च षड् ईतयः भवन्ति। कपिलवर्णस्य राहुः यदा दृश्यते तदा शीघ्रगतिना ये जन्तवः चलन्ति यथा उष्ट्रादि ते पीडिताः भवन्ति। तथा म्लेच्छजातीनां विनाशः दुर्भिक्षं च भवति।

अरुणसदृशे राहौ दृष्टे दुर्भिक्षम् अवृष्टिः च भवति। विहगानां च पीडा भवति। अरुणवर्णः किञ्चित् रक्तवर्णीयः भवति। धूम्रवर्णसदृशे राहौ दृष्टे अल्पवृष्टिः भवति परन्तु सुभिक्षं भवति जनानां कल्याणं भवति।

यदि कपोतवर्णस्य राहोः दर्शनं भवति अथवा रक्तवर्णस्य, कपिलवर्णस्य श्याववर्णस्य राहोः दर्शनं भवति तदा खाद्यान्नस्य लोके अभावः भवति, अवृष्टिः भवति, जनाः क्षुधया पीडिताः भवन्ति लोके दुर्भिक्षं क्षुद्भयं च भवति। कपोतवर्णस्य कृष्णवर्णस्य च राहुः शूद्राणां हानिकरः पीडाकरश्च भवति।

निर्मलमणेः इव पीता कान्तिः यदि राहोः भवति तदा वैश्यजातीनां विनाशः भवति परन्तु लोके सुभिक्षं कल्याणं च भवति। यदि ज्वालासहितः राहुः दृश्यते तदा लोके अग्निभयं करोति। यदि गैरिकसदृशः राहुः दृश्यते तदा संग्रामाः युद्धानि वा भवन्ति।

यदि राहुः दूर्वाकाण्डवत् श्यामे शाद्वलप्रणालतुल्यवर्णस्य अथवा हरिद्रा इव अतिपीतवर्णस्य भवति तदा लोके मरणं भवति अर्थात् जनाः म्रियन्ते। यदि राहुः पाटलपुष्पसदृशः श्वेतलोहितवर्णयुक्तो वा दृश्येत तदा लोके अशनिभयं भवति अर्थात् उल्कापत्तनादिद्वारा जनाः पीडिताः भवन्ति।

पांशुरूपसदृशः, व्यामिश्रवर्णसदृशः राहु क्षत्रियाणां नाशाय वृष्टेश्च नाशाय भवति। तथा बालरविवर्णसदृशः अर्थात् उदितस्य सूर्यस्य वर्णसदृशः कमलसदृशः, इन्द्रधनुपसदृशः राहुः

यदि दृश्यते तदा लोके शस्त्रेण भयं युद्धस्य वा भयं भवति।

७.९ ग्रहणकालिकचन्द्रसूर्ययोरुपरि ग्रहदृष्टिफलम्

इतः पूर्वं भवान् ग्रहणस्य द्वादशराशिषु फलानि, नक्षत्रेषु फलानि, दशविधग्रासानां लक्षणानि च पठितानि। इदानीं ग्रहणकाले चन्द्रस्य सूर्यस्योपरि वा ग्रहाणां दृष्टिवशात् फलानि पठामः। आचार्य वराहमिहिरेण ग्रहाणां ग्रहणोपरि दृष्टिविषये वर्णितम्।

पश्यन् ग्रस्तं सौम्यो धृतमधुतैलक्षयाय राज्ञां च।
भौमः समरविमर्दं शिखिकोपं तस्करभयं च॥

शुक्रः सस्यविमर्दं नानाक्लेशांश्च जनयति धरित्र्याम्।
रविजः करोत्यवृष्टिं दुर्भिक्षं तस्करभयं च॥

अन्वयः – सौम्यो ग्रस्तं (चन्द्रम् अर्कं वा) पश्यन् धृतमधुतैलानां राज्ञां च क्षयाय (भवति) भौमः (पश्यति तदा) समरविमर्दं शिखिकोपं तस्करभयं च (करोति)।

शुक्रः (पश्यति तदा) सस्यविमर्दं धरित्र्यां नानाक्लेशान् जनयति। रविजः (पश्यति तदा) अवृष्टिं दुर्भिक्षं तस्करभयं च करो।

प्रतिपदार्थः – सौम्यो = बुधः, ग्रस्तं =ग्रसितं (चन्द्रं सूर्यं वा) पश्यन् घृतमधुतैलानां = घृतस्य मधुद्रव्यस्य तैलस्य च क्षयाय= नाशाय (भवति) भौमः = मङ्गलः (पश्यति तदा) समरविमर्दं = युद्धं, शिखिकोपम् = अग्निप्रकोपं, तस्करभयं = चौरभयं च करोति।

शुक्रः =शुक्रग्रहः (पश्यति तदा) सस्यविमर्दं = सस्यविनाशं, धरित्र्यां = भूमौ, नानाक्लेशान् = अनेकान् कष्टान् कृच्छ्रान् वा, जनयति= उत्पादयति। रविजः = शनैश्चरः (पश्यति तदा) अवृष्टिम्=अवर्षणं, दुर्भिक्षं, तस्करभयं = चौरभयं च (करोति)।

व्याख्या – ग्रसितं चन्द्रं सूर्यं वा यदि बुधः पश्यति तदा घृतस्य, मधुद्रव्यस्य, तैलस्य च विनाशः भवति। अतः बुधदृष्टे द्रव्यपदार्थानां विशेषरूपेण हानिः भवति। यदि भौमः (मंगलः) यदि ग्रस्तं सूर्यं चन्द्रं वा पश्यति तदा युद्धं अग्निप्रकोपं, चौरभयं च करोति।

यदि ग्रहणे ग्रसितं चन्द्रं सूर्यं वा यदि शुक्रः पश्यति तदा सस्यानां धान्यानां वा विनाशः भवति। भूमौ अनेकान् कष्टान् उत्पादयति। यदि शनैश्चरः पश्यति तदा अवर्षणं दुर्भिक्षं तथा च चौराणां भयं करोति। अत्र बुधभौमशुक्रशनैश्चरादिचतुर्णां ग्रहाणां दृष्टेः फलानि निर्दिष्टानि एतेषां फलानि च अशुभानि एव सन्ति। एतेषां चतुर्णां ग्रहाणां दृष्टिवशात् दुष्टफलानि एव भवन्ति।

परन्तु ग्रस्तबिम्बे ग्रहाणां दृष्टिवशात् सर्वदा अशुभफलम् एव न भवति अपितु शुभफलमपि भवति। तद्विषये अग्रे पठामः।

७.९.१० शुभदृष्टेः विशेषफलम्

ग्रहणकाले ग्रसितबिम्बोपरि गुरोः फलमेव शुभं विहितम्-

यदशुभमवलोकनाभिरुक्तं ग्रहजनितं ग्रहणे प्रमोक्षणे वा।
सुरपतिगुरुणावलोकिते तच्छममुपयाति जलैरिवाग्निरिद्धः॥

अन्वयः – अवलोकनाभिः ग्रहजनितं यत् अशुभं ग्रहणे प्रमोक्षणे वा उक्तं (तत्सर्वं) सुरपतिगुरुणा आलोकिते शमम् उपयाति (यथा) अग्निविद्धः जलैः (शममुपयाति) इव प्रतिपदार्थः अवलोकनाभिः = दृष्टिभिः, ग्रहजनितं =ग्रहोत्पादितं यत् अशुभं =अशुभफलं,

---

ग्रहणे = ग्रहणकाले, प्रमोक्षणे =मोक्षकाले वा उक्तं = वर्णितम् (तत्सर्वं) सुरपतिगुरुणा = बृहस्पतिना, आलोकिते = दृष्टे, शमं = शान्तिम्, उपयाति = गच्छति (यथा) जलै: = अम्बुभि:, अग्निरिद्ध: = प्रज्वलितोऽग्नि: इव।

व्याख्या – ग्रस्तस्य सूर्यबिम्बस्य चन्द्रबिम्बस्य वा उपरि बुधादिग्रहाणां दृष्टिभि: यत् अशुभफलं पूर्वं भवता पठितं तत्सर्वं बृहस्पति दृष्टे शान्तिं प्राप्नोति। अर्थात् बृहस्पति: अन्यग्रहाणां दृष्टिजनितानाम् अशुभफलानां नाशं करोति तथा शुभफलं उत्पादयति। जातकग्रन्थेषु अपि गुरो: दृष्टिवशात् सर्वेषाम् अरिष्टयोगानां नाश: भवतीति निर्दिष्टमस्ति। यथा प्रज्वलित: अग्नि: जलेन पूर्णतया शान्तिमुपयाति तथैव बृहस्पते: दृष्टिवशात् सर्वेषाम् अशुभफलानाम् उपशमनं भवति। अतएव सर्वेष्वपि ग्रहेषु बृहस्पति सर्वाधिकशुभग्रह: कथित: अस्ति।

७.१० ग्रहणकाले उत्पातस्य दर्शनेन अन्यग्रहणस्य ज्ञानम्

एकस्य ग्रहणस्य दर्शनानन्तरं पुन: द्वितीयं ग्रहणं कदा भविष्यतीति आचार्याणां जिज्ञासा जाता। तदानीं ग्रहणकाले विविधोत्पातानां दर्शनवशात् अन्यग्रहणस्य पूर्वानुमानं कृतम्–

ग्रस्ते क्रमान्निमितैः पुनर्ग्रहो मासषट्कपरिवृद्ध्या।
पवनोल्कापातरजः क्षितिकम्पतमोऽशनिनिपातैः॥

अन्वय: – (अर्के चन्द्रे वा) ग्रस्ते पवनो उल्कापाते रजसा क्षितिकम्पेन तमसा अशनिनिपातेन (एतै:) निमित्तैः क्रमात् मासषट्के परिवृद्धया पुन: ग्रहो (भवति)

प्रतिपदार्थ: – (अर्के चन्द्रे वा) ग्रस्ते = गृहीते सति पवनो = वायु:, उल्कापातेन = उल्कानां पात:, रजसा =पांशुवर्षेण, क्षितिकम्पेन = भूचलनेन, तमसा = अन्धकारेण, अशनिपातेन = उल्काविशेषाणां पातेन (एतै:) निमितै: = उत्पातै: क्रमात् मासषट्कपरिवृद्ध्या = षड्भि: षड्भि: मासै: वृद्धिक्रमेण पुन: ग्रहो =ग्रहणं भवति।

व्याख्या – अर्के चन्द्रे वा ग्रस्ते यदि उत्पाता: दृश्यन्ते तदा पुन: ग्रहणस्य काल- निर्धारणं कथं क्रियते इति श्लोके निर्दिष्टमस्ति। तत्र वायु-उल्कापात-रज-क्षितिकम्प-तम-अशनिनिपातादि उत्पातानां दर्शनेन क्रमेण मासषट्कवृद्ध्या उत्पाता: भवन्ति। ग्रहणकाले यदि प्रवला वायु: वहति तदा तेन उत्पातेन पुन: षड्भि: मासै: ग्रहणं भवति। एवम् ग्रहकाले यदि उल्कापातेन पुन: द्वादशमासानन्तरं वर्षानन्तरं वा ग्रहणं भवति। ग्रहकाले पांशुवर्षेण अष्टादशमासानन्तरं पुन: ग्रहणं भवति। यदि ग्रहणकाले भूकम्पनं भवति तदा चतुर्विंशतिमासानन्तरं वर्षद्वयानन्तरं वा पुन: ग्रहणं भवति। तथा च यदि ग्रहणकाले तम: जायते तदा त्रिंशत् मासानन्तरं पुन: ग्रहणं भवति। पट्त्रिंशत् मासानन्तरं पुन: ग्रहणं भवति।

आचार्य पराशरेण प्रत्येकस्योत्पातविषये श्लोके विस्तरेण उल्लिखितम् –

उपरक्ते यदा सूर्ये प्रबलाद्वाति मारुत:।
मासषट्के तदा विन्द्याद्राहोरागमनं ध्रुवम्॥
उल्कायां द्वादशे मासे रजसाष्टादशे तथा।
भूकम्पे च चतुर्विंशे त्रिंशे तमसि निर्दिशेत्।
पट्त्रिंशेऽशनिपाते स्यात् सर्वेपु स्यात् षडुत्तरे।

बोधप्रश्ना:

१. आरोहणग्रहणं कदा भवति?

१०. तमोऽन्यग्रहणे किं फलं भवति?

११. हरितवर्णे राहौ किं फलं भवति?

१२. ग्रहकाले गुरोः दृष्टे फलं किम्?

१३. ग्रहणकाले क्षितिकम्पे सति पुनः ग्रहणं कदा भवति?

१४. दूर्वाकाण्डसदृशे राहौ किं फलं भवति?

ग्रन्थस्य मूलपाठः

द्विजनृपतीनुदगयने विट्शूद्रान् दक्षिणायने हन्ति।
राहुरुदगादिदृष्टः प्रदक्षिणं हन्ति विप्रादीन्॥

म्लेच्छान् विदिक्स्थितो यायिनश्च हन्याद्धुताशसक्तांश्च।
सलिलचरदन्तिघाती याम्येनोदग्गवामशुभः॥

पूर्वेण सलिलपूर्णां करोति वसुधां समागतो दैत्यः।
पश्चात् कर्षकसेवकबीजविनाशाय निर्दिष्टः॥

पाञ्चालकलिङ्गशूरसेनाः काम्बोजोड्रकिरातशस्त्रवार्त्ताः।
जीवन्ति च ये हुताशवृत्त्या ते पीडामुपयान्ति मेषसंस्थे॥

गोपाः पश्वोऽथ गोमिनो मनुजा ये च महत्त्वमागताः।
पीडामुपयान्ति भास्करे ग्रस्ते शीतकरेऽथवा वृषे ॥

मिथुने प्रवराङ्गना नृपा नृपमात्र बलिनः कलाविदः।
यमुनातटजाः सबाह्लिका मत्स्याः सुह्मजनैः समन्विताः॥

आभीराञ्छरान् सपह्लवान् मल्लान् मत्स्यकुरुच्छकानपि।
पाञ्चालान् विकलांश्च पीडयत्यन्नं चापि निहन्ति कर्कटे॥

सिंहे पुलिन्दगणमेकलसत्त्वयुक्तान्।
राजोपमान्नरपतीन् वनगोचरांश्च॥

षष्ठे तु सस्यकविलेखकगेयसक्तान्।
हन्त्यश्मकत्रिपुरशालियुतांश्च देशान्॥

तुलाधरेऽवन्त्यपरान्त्यसाधूनवणिग्दशार्णान् मरूकच्छपांश्च।
अलिन्यथोदुम्बरमद्रचोलान् द्रुमान् सयौधेयविषायुधीयान्॥

धन्विन्यमात्यवरवाजिविदेहमल्लान्
पाञ्चालवैद्यवणिजो विषमायुधज्ञान्।
हन्यान्मृगे तु झषमन्त्रिकुलानि नीचान्
मन्त्रौपधीषु कुशलान् स्वविरायुधीयान्॥

कुम्भेऽन्तर्गिरिजान् सपश्चिमजनान् भारोद्वहांस्तस्करा-
नाभीरान् दरदाऽऽर्यसिंहपुरकान् हन्यात्तथा बर्बरान्।
मीने सागरकूलसागरजलद्रव्याणि वन्यान् जनान्
प्राज्ञान् वार्युपजीविनश्च भफलं कूर्मोपदेशाद्वदेत्॥

सव्यापसव्यलेहग्रसननिरोधावमर्दनारोहाः।
आघ्रातं मध्यतमस्तमोऽन्त्य इति ते दश ग्रासाः॥

सव्यगते तमसि जगज्जप्लुतं भवति मुदितमभयं च।
अपसव्ये नरपतितस्करावमर्दैः प्रजानाशः॥

जिह्वोपलेढि परितस्तिमिरनुदो मण्डलं यदि स लेहः।
प्रमुदितसमस्तभूता प्रभूततोया च तत्र मही॥

ग्रसनमिति यदा त्र्यंशः पादो वा गृह्यतेऽथवाऽप्यर्द्धम्।
स्फीतनृपवित्तहानिः पीडा च स्फीतदेशानाम्॥

पर्यन्तेषु गृहीत्वा मध्ये पिण्डीकृतं तमस्तिष्ठेत्।
स निरोधो विज्ञेयः प्रमोदकृत् सर्वभूतानाम्॥

अवमर्दनमिति निःशेषमेव सञ्छाद्य यदि चिरं तिष्ठेत्।
हन्यात् प्रधानभूपान् प्रधानदेशांश्च तिमिरमयः॥

वृत्ते ग्रहे यदि तमस्तत्क्षणमावृत्य दृश्यते भूयः।
आरोहणमित्यन्योऽन्यमर्दनैर्भयकरं राज्ञाम्॥

पय्येर्यन्तेष्वतिबहुलं स्वल्पं मध्ये तमस्तमोऽन्त्याख्ये।
सस्यानामीतिभयं भयमस्मिस्तस्कराणां च॥

श्वेते क्षेमसुभिक्षं ब्राह्मणपीडां च निर्दिशेद्राहौ।
अग्निभयमनलवर्णे पीडा च हुताशवृत्तीनाम्॥

हरिते रोगोल्बणता सस्यानामीतिभिश्च विध्वंसः।
कपिले शीघ्रगसत्त्वम्लेछध्वंसोऽथ दुर्भिक्षम्॥

अरुणकिरणानुरूपे दुर्भिक्षावृष्टयो विहगपीडा।
आधूम्रे क्षेमसुभिक्षमादिशेन्मन्दवृष्टिं च॥

कापोतारुणकपिलश्यावाभे क्षुद्भयं विनिर्देश्यम्।
कापोतः शूद्राणां व्याधिकरः कृष्णवर्णश्च॥

विमलकमणिपीताभो वैश्यध्वंसी भवेत् सुभिक्षाय।
सार्चिष्मत्यग्निभयं गैरिकरूपे तु युद्धानि॥

दूर्वाकाण्डश्यामे हारिद्रे वापि निर्दिशेन्मरकम्।
अशनिभयसम्प्रदायी पाटलकुसुमोपमो राहुः।

पांशुविलोहितरूपः क्षत्रध्वंसाय भवति वृष्टेश्च।
बालरविकमलसुरचापरुपभृच्छस्त्रकोपाय॥

पश्यन् ग्रस्तं सौम्यो घृतमधुतैलक्षयाय राज्ञां च।
भौमः समरविमर्दं शिखिकोपं तस्करभयं च॥

शुक्रः सस्यविमर्दं नानाक्लेशांश्च जनयति धरित्र्याम्।
रविजः करोत्यवृष्टिं दुर्भिक्षं तस्करभयं च॥

यदशुभमवलोकनाभिरुक्तं ग्रहजनितं ग्रहणे प्रमोक्षणे वा।
सुरपतिगुरुणावलोकिते तच्छममुपयाति जलैरिवाग्निरिद्धः॥

ग्रस्ते क्रमान्निमितैः पुनर्ग्रहो मासषट्कपरिवृद्धया।
पवनोल्कापातरजः क्षितिकम्पतमोऽशनिनिपातैः॥

७.११ सारांशः

अस्मिन् पाठे भवान् राहुचाराध्यायस्य विविधविषयान् पठितवान्। ग्रहणकाले सूर्यबिम्बोपरिचन्द्रबिम्बस्योपरि वा यः तमसः भाग भवति तस्यैव राहुः संज्ञा कृता। तयोः बिम्बोपरि तमः भूमेः चन्द्रस्य वा छायावशात् भवति। भूमेः चन्द्रस्य वा छाया एव सूर्यचन्द्रयोः ग्रहणं करोति अतः तयोः छाया एव 'राहुः' उक्तम्। छायया यदा सूर्यचन्द्रयोः बिम्बस्य ग्रहणं भवति तदा बिम्बः राहुणा ग्रसितः इति उच्यते। उत्तरायणे ग्रहणं ब्राह्मणवैश्योः दक्षिणायने च वैश्यशूद्रयोः विनाशं करोति। उत्तरदिशि ग्रहणे ब्राह्मणानां पूर्वस्यां क्षत्रियाणां, दक्षिणे वैश्यानां पश्चिमे च शूद्राणां विनाशः भवति। विशेषफलविवेचितं यत् दक्षिणोत्तरपूर्वपश्चिमदिक्षु राहु क्रमेण जलचराणां हस्तिनां विनाशं, गवां विनाशः, तोयाधिक्यं कृषकभृत्यबीजानां च विनाशं करोति। तदनन्तरं द्वादशराशिषु ग्रहणस्य फलानि पठितानि। विविधराशिषु ग्रहणे सति विविध प्रदेशानां, जातीना, वस्तूनां च विनाशः भवति। तेषां विषये विस्तरेण भवता पठितम्। लक्षणस्वरूपवशात् च ग्रहणस्य दशभेदाः प्रकिर्तिताः - 1. सव्यः 2. अपसव्यः 3. लेहः 4. ग्रसनम् 5. निरोधः, 6. अवमर्दनम् 7. आरोहः, 8. आघ्रातम् 9. मध्यतमः 10. तमोऽन्त्यः एतेषां लक्षणानि फलानि भवता पाठे पठितानि। तदनन्तरं ग्रहणस्य वर्णदर्शनवशादपि फलानि वर्णितानि। हरितवर्णे रोगप्राचुर्यं, कपिले शीघ्रगानां जन्तूनां म्लेच्छानां च विनाशः, अरुणवर्णे दुर्भिक्षावृष्टयः पक्षिणां च पीडा, धूम्रवर्णे सुभिक्षं स्वल्पावृष्टिः, कपोते, कपिले, अरूणे, श्यावे च वर्णे क्षुद्भयं दुर्भिक्षं, विमलकमणिरिव वर्णे वैश्यानां विनाशः, गैरिके संग्रामाः, हरिद्रावर्णे मरकं, पाटले अशनिभयं, पांशुरूपे क्षत्रियाणां नाशाय बालरवि कमल अथवा इन्द्रधनुषसदृशे ग्रहणे दृष्टे शस्त्रकोपं युद्धानि च भवन्ति। ग्रहणकाले सूर्यचन्द्रयोपरि बुधभौमशुक्रशनैश्चरादिचतुर्णां ग्रहाणां दृष्टिवशात् तु अशुभफलानि भवन्ति यदि गुरोः अपि दृष्टि तत्र चेत् स्यात् सर्वेषाम् अशुभफलानां विनाशं करोति। ग्रहणकाले उत्पातानां दर्शनेन पुनः ग्रहणस्य कालज्ञानं पठितम्। वायु-उल्कापात-रज-क्षितिकम्प-'तम अशनिपातानां दर्शनेन क्रमात् मासषट्कवृद्धया पुनः ग्रहणं भवति। इत्येताः विषयाः मुख्यतया पाठेऽस्मिन् भवता पठिताः।

७.१२ शब्दावली

विट् = वैश्य, हुताशसक्ताः = अग्निना येषां जीविका भवति ते सुवर्णकार-लौहकारपाचकादयः, दैत्यः = राहुः, गोमिन् = गावो विद्यन्ते येषां ते, स्थविरान् = वृद्धान्, सागरकूल = सागरस्य तटम्, स्फीता = अतिविभवयुक्ताः, आमयभयं = रोगभयं, रोगोल्बणता = रोगप्राचुर्यम्, सार्चिष्मति = ज्वालासहिता, शिखिकोपं = अग्निप्रकोपं, वार्युपजीविनः = जलेन येषाम् आजीविका भवति, यथा- धीवरनाविकमस्त्यपालकाः।

७.१३ सन्दर्भग्रन्थाः

१. **बृहत्संहिता**, वराहमिहिरविरचिता, चौखम्बा विद्याभवन, वाराणसी।

७.१४ सहायकग्रन्थाः

१. **बृहत्संहिता**, भट्टोत्पलटीकासहिता, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, वाराणसी
बृहत्सहिता, व्याख्या-सुरेशचन्द्रमिश्र, रंजन पब्लिकेशन, नई दिल्ली।

२. **बृहत्संहिता**, व्याख्या- एम. रामकृष्णभट्ट, मोतीलालबनारसीदास, नई दिल्ली।

७.१५ बोधप्रश्नोत्तराणि

१. ब्राह्मणान् क्षत्रियान् च।

२. शूद्रान्।

३. म्लेच्छान् अग्निरतान् अग्निहोत्रिन् च निहन्ति।

४. पाञ्चालजनाः, कलिङ्गाः, शूरसेनाः, काम्बोजाः, उड्राः, किराताः, शस्त्रोपजीविनश्च पीडिताः भवन्ति।

५. प्रसिद्धाः कवयः, पण्डिताः, धान्याः, लेखकाः, गायकाः, अश्मकाः, शालियुताः देशाः पीडिताः भवन्ति।

६. कूर्मचक्रोक्तविभागानुसारं फलं वदेत्।

७. दशविधम्।

८. शस्यवृद्धि भवति पृथिवी जलेन परिपूर्णा भवति।

९. सूर्यस्य चन्द्रस्य वा ग्रहणानन्तरं तस्मिन् काले एव पुनः राहोः दर्शनं भवति तदा आरोहग्रहणं भवति।

१०. संस्यानाम् ईतिभयं, चौराणं च भयं वर्धयति।

११. रोगाणां प्राचुर्यं भवति।

१२. अन्यग्रहाणां दृष्टिवशात् जातानाम् अशुभानां विनाशः भवति।

१३. चतुर्विंशतिमासानन्तरं पुनः ग्रहणं भवति।

१४. लोके मरकं भवति।

७.१६ अभ्यासप्रश्नाः

१. अयनवशात् ग्रहणफलं लिखत?

२. कन्यातुलाराशयोः ग्रहणफलं लिखत?

३. मीनराशौ ग्रहणे सति किं फलं भवति?

४. दशविधग्रासानां नामानि लिखत?

५. ग्रसनग्रहणस्य लक्षणं फलञ्च प्रतिपादयत?

६. निरोधावमर्दनग्रहणयोः लक्षणफलानि लिखत?

७. राहोर्वर्णशात् फलानि विवेचयत।

८. ग्रहणे ग्रहाणां दृष्टिफलं विवेचयत।

९. ग्रहणकाले विविधोत्पातानां दर्शनवशात् फलानि लिखत।

◆

अष्टमः पाठः (राहुचारः)

पाठसंरचना

८.१ प्रस्तावना
८.२ उद्देश्यम्
८.३ ग्रस्तग्रहफलानि
८.३.१ बुधजीवयोः ग्रस्तफलम्
८.३.२ शुक्रशनैश्चरयोः ग्रस्तफलम्
८.४ ग्रहणस्य मासफलम्
८.४.१ मार्गशीर्षादिमासेषु ग्रहणफलम्
८.४.२ फाल्गुनादिमासेषु ग्रहणफलम्
८.४.३ ज्येष्ठादिमासेषु ग्रहणफलम्
८.४.४ भाद्रपदादिमासेषु ग्रहणफलम्
बोधप्रश्नाः
८.५ सूर्यचन्द्रयोर्दशमोक्षाणां लक्षणं फलञ्च
८.५.१ कुक्षिहन्वादिमोक्षाणां लक्षणं फलञ्च
८.५.२ वामकुक्ष्यादिमोक्षाणां लक्षणं फलञ्च
८.५.३ जरणादिमोक्षाणां लक्षणं फलञ्च
८.५.४ भास्करस्य मोक्षाः
८.६ मोक्षात् सप्तदिनाभ्यन्तरे दृष्टस्य उत्पातस्य फलम्
८.७ चन्द्रग्रहणानन्तरं सूर्यग्रहणस्य फलम्
८.८ सूर्यग्रहणानन्तरं चन्द्रग्रहणस्य फलम्
बोधप्रश्नाः
८.९ सारांशः
८.१० शब्दावली
८.११ सन्दर्भग्रन्थाः
८.१२ सहायकग्रन्थाः
८.१३ बोधप्रश्नोत्तराणि
८.१४ अभ्यासप्रश्नाः

८.१ प्रस्तावना

बृहत्संहिताग्रन्थस्य द्वितीयखण्डे भवान् पूर्वस्मिन् सप्तमे षष्ठे च पाठे राहुचाराध्यायस्य विविधविषयान् पठितवान्। पूर्वस्मिन् सप्तमे पाठे ग्रहणस्य अयनवशात् दिग्वशाच्च फलानि, द्वादशराशिषु सूर्यचन्द्रयोः ग्रहणस्य फलानि, सूर्यचन्द्रयोः दशविधग्रासानां लक्षणानि फलानि च पठितानि। ग्रहणस्य विविधवर्णवशात् फलानि, ग्रहणकाले सूर्यचन्द्रयोरुपरि ग्रहाणां दृष्टिवशात् फलानि, ग्रहणकाले उत्पातानां दर्शनेन अन्यग्रहणस्य पूर्वानुमानं च पठितवान्। तेन ज्ञातं यत् प्राचीनाचार्यैः षष्ठशताब्दीतः पूर्वमेव ग्रहणस्य सूक्ष्मेक्षिकाया अध्ययनं तु आवश्यकमेव कृतम्। अतः प्राचीनाचार्याणां दीर्घकालस्य उत्कृष्टाध्ययनपरंपरायाः स्वरूपं पूर्वपाठे दर्शितम्। अस्मिन् अष्टमे पाठे ग्रहणकाले सूर्येण चन्द्रेण वा सह भौमादिग्रहाणां संयोगेन ग्रहणफलं पठिष्यति। मार्गशीर्षादिमासेषु ग्रहणस्य फलं पठिष्यति। आचार्यैः न केवलं दशविधग्रासानाम् अपितु दशमोक्षाणामपि विवेचनं कृतम्, तेषां विषये च पाठेऽस्मिन् वर्णितमस्ति ग्रहणात् सप्तदिवसाभ्यन्तरे दृष्टानां उत्पातानां फलानि, चन्द्रग्रहणे सति किं फलं भवतीति पठिष्यति। इत्यनेन ग्रहणसंबंधिताः सर्वे विषयाः समाप्ताः भविष्यन्ति राहुचाराध्यायश्च पाठेऽस्मिन् समाप्तः भविष्यति।

८.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् –

- ग्रहणकाले ग्रहाणां युतिवशात् फलानि प्रतिपादने समर्थः भविष्यति
- भौमादिग्रहाणां ग्रस्तफलविवेचने पटुः भविष्यति।
- मार्गशीर्षादिद्वादशमासेषु ग्रहणस्य फलानि प्रतिपादने कुशली भविष्यति।
- सूर्यचन्द्रयोः ग्रहणे दशविधमोक्षाणां लक्षणं फलं च प्रतिपादने प्रवीणः भविष्यति
- ग्रहणात् सप्तदिनाभ्यन्तरे दृष्टस्य उत्पातस्य फलबोधने समर्थः भविष्यति।
- चन्द्रग्रहणानन्तरं सूर्यग्रहणे, सूर्यग्रहणानन्तरं च चन्द्रग्रहणे सति फलप्रतिपादने दक्षः भविष्यति।

८.३ भौमादीनां ग्रस्तानां फलम्

यदि ग्रहणकाले सूर्येण चन्द्रेण वा सह कोऽपि ग्रहः एकराशौ अत्यल्पांशान्तरे अत्यल्पशरयुक्तः भवति तदा सः ग्रहः अपि छादनात् ग्राहकस्य ग्रस्त एव उच्यते। अर्थात् यस्मिन् राशौ सूर्यस्य चन्द्रस्य वा ग्रहणं भवति तस्मिन् राशौ एव कश्चित् ताराग्रहः सूर्यस्य चन्द्रस्य वा अत्यधिकं समीपं भवति तथा च तस्य शरः अपि अत्यल्पः भवति तदा सः ग्रहः अपि राहुणा ग्रस्तः एव उच्यते। अनया रीत्या ग्रस्तानां भौमादिपञ्चताराग्रहाणां ग्रस्तवशात् फलानि आचार्येण विहितानि। ताराग्रहेषु प्रथमं भौमे ग्रस्ते सति फलं वर्णितम्–

आवन्तिका जनपदाः कावेरीनर्मदातटाश्रयिणः।
दृप्ताश्च मनुजपतयःपीड्यन्ते क्षितिसुते ग्रस्ते॥

अन्वयः – प्रतिपदार्थवर्णने एव स्पष्टः भवति

प्रतिपदार्थः – क्षितिसुते=अङ्गारके (भौमे), ग्रस्ते = ग्रसिते, आवन्तिका = अवन्तिदेशभवा जनपदाः। तथा कावेरी = कावेरीनदी, नर्मदा = नर्मदा नदी, तयोः तटाश्रयिणः = तटं =तीरं ये समाश्रिताः= तन्निवासिनः अर्थात् तटवर्तिप्रदेशस्य निवासिनः, (तथा) दृप्ता = दर्पिष्ठा गर्वयुक्ताः वा (ये) मनुजपतयो= मनुष्याणां पतयो राजानः (एते सर्वे) पीड्यन्ते = पीडिताः भवन्ति।

व्याख्या – यदि ग्रहणकाले सूर्येण चन्द्रेण वा सह भौम अपि राहुणा ग्रस्तः भवति तदा अवन्तिदेशस्य जनाः, कावेरीनद्याः नर्मदानद्याः च तटवर्तीप्रदेशस्य निवासिनः, तथा गर्वयुक्ताः ये राजानः, एते सर्वे पीडिताः भवन्ति। अन्येषां ग्रहाणां ग्रस्ततावशात् फलं च अग्रे वर्णितम्।

८.३.१ बुधजीवयोः ग्रस्तफलम्

इदानीं बुधे बृहस्पतौ च ग्रस्ते फलानि पठामः। बुधजीवयोः ग्रस्ते एवं फलविवेचितम्–

अन्तर्वेदीं सरयूं नेपालं पूर्वसागरं शोणम्।
स्त्रीनृपयोधकुमारान् सह विद्वद्भिर्बुधो हन्ति।
ग्रहणोपगते जीवे विद्वन्नृपमन्त्रिगजहयध्वंसः।
सिन्धुतटवासिनामप्युदग्दिशं संश्रितानां च॥

अन्वयः – प्रतिपदार्थवर्णने एव स्पष्टः भवति।

प्रतिपदार्थः – अन्तर्वेदी = गङ्गायमुनयोः मध्यप्रदेशम्, सरयूं = सरयूनदीं, नेपालं = नेपालदेशं पूर्वसागरं = पूर्वसमुद्रं, शोणं = शोणनदीं, स्त्रियो = योषितः, नृपा = राजानः, योधाः = संग्रामकुशलाः, कुमारा = बालाः प्रथमवयसः वा, (एतान् सर्वान्) विद्वद्भिः = पण्डितैः, सह, बुधो ग्रस्तो हन्ति = घातयन्ति।

जीवे = बृहस्पतौ, ग्रहणोपगते = ग्रहणं प्राप्ते, विदुषां = पण्डितानां, नृपाणां = राज्ञां, मन्त्रिणां = सचिवानां, गजानां = हस्तिनां, हयानाम् अश्वानां च ध्वंसो = विनाशो (भवति तथा) सिन्धुतटवासिनाम् = सिन्धुर्नाम नदी तत्तटवासिना ये (तेषामपि) उदग्दिशं संश्रितानाम् = उत्तरदिग्वासिनां जनानां च (ध्वंसः भवति)

व्याख्या – गङ्गायमनुयोर्मध्यवर्तीप्रदेशः, सरयूनदी, नेपालदेशः, पूर्वसमुद्रः, शोणनदी, स्त्रियः, राजानः, संग्रामकुशलाः, जनाः, बालाः, प्रथमवयश्च एतान् सर्वान् पण्डितैः सह ग्रस्तः बुधः घातयति। अर्थात् बुधे ग्रस्ते एते सर्वे पीडिताः भवन्ति।

यदि ग्रहणकाले सूर्येण चन्द्रेण वा सह बृहस्पति अपि ग्रस्तः भवति तदा पण्डितानां, राज्ञां, मन्त्रिणां, सचिवानां, हस्तिनाम् अश्वानां च विनाशः भवति। तथा सिन्धुनद्याः तटवासिनः ये जनाः तेषामपि विनाशः भवति। तथा उत्तरदिग्वासिनां जनानां च विनाशः भवति।

८.३.२ शुक्रशनैश्चरयोः ग्रस्तफलम्

शुक्रशनैश्चरयोः ग्रहणसमये ग्रासवशात् फलानि बृहत्संहिता ग्रन्थे एवं वर्णितानि–

भृगुतनये राहुगते दाशेरककैकयाः सयौधेयाः।
आर्यावर्त्ताः शिबयः स्त्रीसचिवगणाश्च पीड्यन्ते॥

सौरे मरुभवपुष्करसौराष्ट्रिकधातवोऽर्बुदान्त्यजनाः।
गोमन्तपारियात्राश्रिताश्च नाशं व्रजन्त्याशु॥

अन्वयः – प्रतिपदार्थवर्णने अन्वयः स्पष्टः भवति

प्रतिपदार्थः – भृगुतनये = शुक्रे, राहुगते = ग्रस्ते (सति) दाशेरका = दाशेरका जनाः, कैकयाः = कैकप्रदेशस्य जनाः, सयौधेयाः = यौधेयैः जनैः सह, आर्यावर्त्ताः = प्रधानदेशजनाः, शिबयः = शिबिप्रदेशस्य जनाः, स्त्रियः, सचिवाः = मन्त्रिणः, गणाः = समूहाः (एते सर्वे) पीडिताः भवन्ति, उपतप्यन्ते वा। सौरे = शनैश्चरे, (ग्रस्ते), मरुभवा = मरुभूमौ उत्पत्तिः येषां ते, मरुस्थलनिवासिनः, पुष्कर = पुष्करनिवासिनः, सौराष्ट्रिकाः = सौराष्ट्रप्रदेशनिवासिनः, धातवो = धातुद्रव्याणि, अर्बुदा = अर्बुदजनाः, अर्बुदपर्वतः तत्र ये निवसन्ति, अन्त्यजनाः = निकृष्टजनाः, गोमन्तो = गोमिनः, गोनन्दाः जनाः, पारियात्राश्रिताः = पारियात्रः पर्वतः तत्र ये आश्रिताः = स्थिताः जनाः (एते सर्वे) आशु = क्षिप्रमेव नाशं, व्रजन्ति = गच्छन्ति।

व्याख्या – ग्रहणकाले यदि शुक्रः सूर्यस्य चन्द्रस्य वा संयोगेन ग्रस्तः भवति तदा दाशेरका जनाः, यौधेयैः जनैः सह कैकयप्रदेशस्य जनाः च पीडिताः भवन्ति। तथा आर्यावर्त्तप्रदेशस्य जनाः, शिबिप्रदेशस्य जनाः, स्त्रियः, मन्त्रिणः समूहाः च पीडिताः भवन्ति।

ग्रहणकाले सूर्येण चन्द्रेण वा सह युतिवशात् यदि शनैश्चरः ग्रस्तः भवति तदा मरुस्थलनिवासिनः, पुष्करनिवासिनः, सौराष्ट्रप्रदेशनिवासिनः, धातुद्रव्याणि, अर्बुदपर्वतनिवासिनः, निकृष्टजनाः, गोनन्दा जनाः, पारियात्रपर्वते स्थिताः जनाः एते सर्वे क्षिप्रमेव नाशं व्रजन्ति।अर्थात् ग्रहणकाले शनैश्चरे ग्रस्ते एते सर्वे पीडिताः भवन्ति।

भौमादिपञ्चग्रहाणां ग्रस्ते फलानि भवता पठितानि। वर्णने आवन्ति, दाशेरक कैकय, यौधेय, आर्यावर्त, शिबि, सौराष्ट्र, अर्बुदादिप्रदेशानां नामानि पठितानि। एतेषां प्रदेशानां वर्तमानस्थितेः ज्ञानं अग्रे नक्षत्रव्यूहाध्याये च भविष्यति। एतेषां प्रदेशानां नामानि तेषु अध्यायेषु विस्तरेण वर्णितानि सन्ति।

ग्रहणकाले ग्रस्तानां भौमादिपञ्चताराग्रहाणां वर्णनानन्तरं राहुचाराध्याये चैत्रादिद्वादशमासेषु ग्रहणस्य फलं वर्णितमस्ति। तद्विषये इदानीं पठामः।

८.४ मासवशात् ग्रहणफलम्

चैत्रादिद्वादशमासेषु सूर्यग्रहणस्य चन्द्रग्रहणस्य च फलम् आचार्येण वर्णितमस्ति। तेषु द्वादशमासेषु सर्वप्रथमं कार्तिकमासे ग्रहणस्य फलम् एवं वर्णितम् –

कार्तिक्यामनलोपजीविमगधान् प्राच्याधिपान् कोशलान्।
कल्माषानथ शूरसेनसहितान् काशींश्च सन्तापयेत्।।

हन्यादाशु कलिङ्गदेशनृपतिं सामात्यभृत्यं तमो
दृष्टं क्षत्रियतापदं जनयति क्षेमं सुभिक्षान्वितम्।।

अन्वयः – प्रतिपदार्थवर्णने एव स्पष्टः भविष्यति।

प्रतिपदार्थः – कार्तिक्याम् = कार्तिकमासे (पौर्णमास्याम् अमावास्यां वा), तमो = राहुः, दृष्टं = यदि दृश्यते तदा लौहकारसुवर्णकारपाचकप्रभृतयः, मगधाः = मगधदेशस्य जनाः, प्राच्याधिपान् = पूर्वस्यां दिशि ये अधिपतय = राजानः तान्, कोशलान् = कोशलप्रदेशस्य ये जनाः तान्, कल्माषान् = कल्माषप्रदेशस्य जनान्, (तांश्च) शूरसेनसहितान् = शूरसेना जनाः तैः सहितान (तथा) काशीन् = काशीप्रदेशस्य जनान्। (एतान् सर्वान्) सन्तापयेत् = उपतापयेत्। कलिङ्गदेशनृपतिं = कलिङ्गदेशे यः राजा तं, सामात्यभृत्यम् अमात्यैः = मन्त्रिभिः भृत्यैः = सर्वकर्मकरैः च सहितम्, आशु = क्षिप्रम् एव हन्यात् = नाशयेत्। (तथा) क्षत्रियतापदं = क्षत्रियाणां राजन्यानां तापं ददाति, क्षेमं = कल्याणं, सुभिक्षान्वितं = सुभिक्षसंयुक्तं, जनयति = उत्पादयति।

व्याख्या – कार्तिकमासे यदि राहुः दृष्टः भवति अर्थात् कार्तिकमासस्य पौर्णमास्याम् अमावस्यायां यदि सूर्यग्रहणं चन्द्रग्रहणं वा भवति तदा सः राहुः अग्निना ये आजीविकां प्राप्नुवन्ति तान् निहन्ति। यथा लौहकारा, सुवर्णकाराः, पाचकाः, अग्निशलाकादीनां निर्मातारः अनलोपजीविनः भवन्ति। तथा च मगधदेशस्य जनाः पूर्वस्यां दिशि स्थितानां देशानां राजानः कोशलदेशनिवासिनः, कल्माषप्रदेशस्य जनाः शूरसेनादेशस्य जनैः सह काशीप्रदेशस्य जनाः पीडिताः भवन्ति। अर्थात् कार्तिकमासे ग्रहणे सति राहुः एतान् सर्वान् सन्तापयति। परन्तु कार्तिकमासे ग्रहणस्य अशुभफलमात्रं न भवति अपितु शुभफलानि अपि भवन्ति। श्लोकान्ते वर्णितं यत् जगति कल्याणं सुभिक्षं च भवति। परन्तु ततः पूर्वम् अशुभफलानि एव विहितानि। कार्तिकमासे ग्रहणे सति कलिङ्गदेशस्य राजा मन्त्रिभिः सह सर्वकर्मकरैश्च सह नाशम् उपयाति। तथा च क्षत्रियाणां राजन्यानां च तापं ददाति। इत्येवं प्रकारेण कार्तिकमासे ग्रहणस्य शुभाशुभफलानि ग्रन्थे वर्णितानि। इदानीं अन्यमासेषु ग्रहणफलानि पठामः।

८.४.१ मार्गशीर्षादिमासेषु ग्रहणफलम्

मार्गशीर्षमासे ग्रहणस्य फलम् आचार्येण एवं निर्दिष्टम् –

काश्मीरकान् कौशलकान् सपुण्ड्रान् मृगांश्च हन्यादपरान्तकांश्च।
ये सोमपास्तांश्च निहन्ति सौम्ये सुवृष्टिकृत् क्षेमसुभिक्षकृच्च।।

अन्वयः – प्रतिपदार्थवर्णने एव स्पष्टः भविष्यति।

प्रतिपदार्थः – सौम्ये = मार्गशीर्षमासे (दृष्टः राहुः) काश्मीरकान् = काश्मीरदेशस्य जनान्, कौशलकान् =कौशलदेशस्य जनान्, सपुण्ड्रान् = पुण्ड्रप्रदेशस्य जनैः सहितान्, मृगांश्च = अरण्यप्राणिनः तान् अपि, अपरान्तकान् = अपरान्तप्रदेशसस्य जनान् च, हन्यात् = नाशयेत् (तथा ये) सोमपाः = सोमं पीतं यैः ते, तान् च निहन्ति = घातयन्ति, सुवृष्टिकृत् = शोभनां वृष्टिं करोति, क्षेमसुभिक्षकृच्च = क्षेमं सुभिक्षं च करोति।

व्याख्या – मार्गशीर्षमासे यदि (पौर्णमास्याम् अमायां वा) ग्रहणं भवति तदा काश्मीरदेशस्य जनाः पुण्ड्रदेशस्य जनैः सह पीडिताः भवन्ति। तथा अरण्यप्राणिनः अपरान्तप्रदेशस्य जनाः च पीडिताः भवन्ति। मार्गशीर्षमासे चन्द्रग्रहणं सूर्यग्रहणे वा सति ये पीतसोमाः (सोमं पीतं यैः) कृतयज्ञाः (कृताः यज्ञाः यैः) तान् च राहुः निहन्ति। न केवलम् अशुभफलं करोति अपितु लोके सुवृष्टिकृत्, क्षेमकृत्, सुभिक्षकृत् च भवति।

पौषमासे ग्रहणस्य फलम् एवं वर्णितम् –

पौषे द्विजक्षत्रजनोपरोधः ससैन्धवाख्याः कुकुरा विदेहाः।
ध्वंसं व्रजन्त्यत्र च मन्दवृष्टिं भयं च विन्द्यादसुभिक्षयुक्तम्॥

प्रतिपदार्थः – पौषे = पौषमासे, (राहुदृष्टे), द्विजानां = ब्राह्मणानां, क्षत्रजनानां = क्षत्रियाणां च उपरोधः = उपद्रवः भवति (तथा) ससैन्धवाख्याः = सैन्धव इति नाम येषां तैः सह (सैन्धावाः जनाः), कुकुरा = कुकुरप्रदेशस्य जनाः, विदेहाः = विदेहजनाः, (एते सर्वे) ध्वंसं = विनाशं, व्रजन्ति = गच्छन्ति, अत्र च, मन्दवृष्टिम् = अल्पां वृष्टिं (तथा) असुभिक्षयुक्तं = दुर्भिक्षसहितं, भयं = भीतिः च विन्द्यात् = जानीयात्।

व्याख्या – पौषमासे ग्रहणे सति ब्राह्मणानां क्षत्रियाणां च उपद्रवः भवति (तथा) सैन्धवजनैः सह कुकुरप्रदेशस्य जनानां, विदेहजनानां च विनाशः भवति। अर्थात् पौषमासस्य पूर्णिमायाम् अमावस्यायां वा सूर्यग्रहणे चन्द्रग्रहणे वा सञ्जाते ब्राह्मणाः, क्षत्रियाः, सैन्धवाः, कुकुराः, विदेहजनाश्च पीडिताः भवन्ति। तथा अल्पा एव वृष्टिः भवति, दुर्भिक्षसहितं भयं भवति। वृष्ट्याभावः, खाद्यान्नस्य अभावः, क्षुद्भयं इत्यादय दुर्भिक्षशब्देन व्यवह्रियन्ते।

पुनश्च श्लोकेषु वर्णितानां विदेह-सैन्धव-कुकुर-पुण्ड्र-कौशल- काश्मीरादि-प्रदेशानां परिचयः आधुनिकप्रदेशानुसारेण अग्रे कूर्मचक्रग्रहभक्तिनक्षत्रव्युहादीनां वर्णनसन्दर्भे भविष्यति। माघमासे ग्रहणफलं ग्रन्थे एवं वर्णितम्-

माघे तु मातृपितृभक्तवसिष्ठगोत्रान्
स्वाध्यायधर्मनिरतान् करिणस्तुरङ्गान्
वङ्गाङ्गकाशिमनुजांश्च दुनोति राहु-
र्वृष्टिञ्च कर्षकजनाभिमतां करोति॥

अन्वयः – माघे राहुः मातृपितृभक्तान् वसिष्ठगोत्रान् (तथा) स्वाध्याये धर्मे च निरतान्, करिणः, तुरङ्गान्, वङ्गान्, अङ्गान्, काशिमनुजान् च दुनोति (तथा) कर्षकजनानाम् अभिमतां वृष्टिं च करोति।

प्रतिपादर्थः – माघे = माघमासे (दृष्टः) राहुः = ग्रहणं, मातृपितृभक्तान् = जननीजनकतत्परान्, वसिष्ठगोत्रान् = वसिष्ठगोत्रं येषां द्विजानां तान् (तथा) स्वाध्याये = पाठे, धर्मे च निरतान् = सक्तान्, करिणो = हस्तिनः, तुरङ्गान् = अश्वान्, वङ्गान् = वङ्गप्रदेशस्य जनान्, अङ्गान् = अङ्गदेशस्य जनान्, काशिमनुजान् = काशिदेशस्य मनुष्यान् च, दुनोति = उपतापयति, (तथा) कर्षकजनानां = कृषिकराणाम्, अभिमताम् = अभीष्टां वृष्टिं च करोति।

व्याख्या – माघमासे पूर्णिमायाम् अमावस्यायां वा यदि ग्रहणं भवति तदा मातृपितृभक्तान् जनान्, वसिष्ठगोत्रस्य विप्रान्, स्वाध्याये धर्मे च सक्तान्, हस्तिनः, अश्वान्, वङ्गप्रदेशस्य अङ्गप्रदेशस्य च जनान्, काशिदेशनिवासिनः उपतापयति। अर्थात् एते सर्वे जनाः माघमासे राहोः दृष्टे पीडिताः भवन्ति। माघमासे ग्रहणस्य सर्वेषाम् अशुभफलं न भवति अपितु कर्षकजनानां शुभफलमपि भवति यत् राहुः कृषिकराणाम् अभीष्टां वृष्टिं करोति, येन कृषकाः प्रसन्नाः भवन्ति। फाल्गुनादिमासेषु ग्रहणफलं पठामः।

८.४.२ फाल्गुनादिमासेषु ग्रहणफलम्

आचार्येण फाल्गुनमासे ग्रहणस्य फलम् एवं विहितम्–

पीडाकरं फाल्गुनमासि पर्व वङ्गाश्मकावन्तिकमेकलानाम्।
नृत्यज्ञसस्यप्रवराङ्गनानां धनुष्करक्षत्रतपस्विनां च॥

अन्वयः – फाल्गुनमासि पर्व वङ्गाश्मकावन्तिमेकलानाम्, नृत्यज्ञसस्यप्रवराङ्गनानां, धनुष्करक्षत्रतपस्विनां च पीडाकरं भवति।

प्रतिपदार्थः – फाल्गुनमासि = फाल्गुनमासे, पर्व = ग्रहणं, वङ्गप्रदेशनिवासिनां, अश्मकानाम् = अश्मकप्रदेशस्य जनानाम्, अवन्तिकानाम् = अवन्तिदेशस्य जनानां, मेकलानां = मेकलप्रदेशनिवासिनां, पीडाकरम् = उपतापजनकम्। (तथा) नृत्यज्ञानां = नाट्यविदां, सस्यानां = धान्यानां, प्रवराङ्गनानां = प्रधानस्त्रीणां, धनुष्कराणां = शिल्पिनां, क्षत्राणां = क्षत्रियाणां, तपस्विनां = तपोनिरतानाम् (एतेषां सर्वेषां) पीडाकरं = पीडाकारकं भवति।

व्याख्या – फाल्गुनमासे यदि ग्रहणं भवति तदा वङ्गप्रदेशनिवासिनाम्, अश्मकप्रदेशस्य जनानाम्, अवन्तिदेशस्य जनानां, मेकलप्रदेशस्य जनानाम् उपतापजनकं भवति। अर्थात् फाल्गुनमासे सूर्यग्रहणे चन्द्रग्रहणे वा सति एतेषां देशानां जनाः पीडिताः भवन्ति। तथा नाट्यविदां, सस्यानां एतेषां सर्वेषां फाल्गुनमासस्य ग्रहणं पीडाकरं भवति। मासेऽस्मिन् ग्रहणं किमपि शुभफलं न करोति।

फाल्गुनमासस्यफलानन्तरं चैत्रमासस्य ग्रहणस्य फलं ग्रन्थे वर्णितम् –

चैत्र्यां तु चित्रकरलेखकगेयसक्तान्
रूपोपजीविनिगमज्ञहिरण्यपण्यान्।

पौण्ड्रोड्रकैकयजनानथ चाश्मकांश्च
तापः स्पृशत्यमरपोऽत्र विचित्रवर्षी॥

अन्वयः – चैत्र्यां तु चित्रकराः, लेखकाः, गेयसक्ताः एतान् (तथा) रुपोपजीविनः निगमाः हिरण्यपण्याः (एतानापि। तथा) पौण्ड्रा औड्राः कैकया (एते सर्वे एव) जनान् अथ च अश्मकान् च (एतान् सर्वान्) तापः स्पृशति। अत्र अमरपः विचित्रवर्षी (भवति)

प्रतिपदार्थः – चैत्र्यां = चैत्रमासस्य अमावस्यां पौर्णमास्यां वा, चित्रकराः = चित्रज्ञाः शिल्पज्ञाः च, लेखकाः = लिपिज्ञाः, गेयसक्ता = गीतरताः (एतान्, तथा) रुपोपजीविनः = रूपप्रदर्शनेन येषाम् आजीविका भवति, वेश्याजनाः, निगमाः = वेदपाठकाः, हिरण्यपण्याः = सुवर्णविक्रयिणः (एतानपि, तथा) पौण्ड्राः = पुण्ड्रप्रदेशस्य जनाः, औड्राः = उड्रप्रदेशस्य जनाः, कैकया = कैकयप्रदेशस्य जनाः, (एते सर्वे एव) अथशब्दः अत्र श्लोकस्य छन्दपूरणे प्रयुक्त, अश्मकाः = अश्मकप्रदेशनिवासिनः (एतान् सर्वान्) तापः = सन्तापः, स्पृशति = स्पर्शं करोति,

पीडिताः भवन्ति इत्यर्थः। अत्र = अस्मिन् वर्षे, अमरप = इन्द्रः, विचित्रवर्षी = विचित्रम् अर्थात् नानाप्रकारं वर्षति, क्वचित् न वर्षति क्वचित् वर्षति इत्यर्थः।

व्याख्या – यदि चैत्रमासस्य अमावस्यायां पूर्णिमायां वा ग्रहणं भवति तदा चित्रज्ञाः, शिल्पज्ञाः, लेखका, गीतरताः जनाः पीडिताः भवन्ति। तथा रूपप्रदर्शनेन येषाम् आजीविका भवति ते वेश्याजनाः, वेदपाठकाः, सुवर्णविक्रयिणः, एतानापि पीडयति। तथा पुण्ड्रदेशस्य जनाः, उड्रदेशस्य जनाः, कैकयप्रदेशस्य जनाः, अश्मकप्रदेशस्य जनाः, एतान् सर्वान् सन्तापः भवन्ति, एते पीडिताः भवन्ति इत्यर्थः, अस्मिन् वर्षे इन्द्रः विचित्रवर्षी भवति। विचित्रम् अर्थात् नानाप्रकारेण वर्षति। कुत्रचित् वर्षति कुत्रचित् च न वर्षति इत्यर्थः। चैत्रमासे अपि ग्रहणस्य अशुभफलानि एव मुख्यत्वेन विहितानि।

चैत्रमासानन्तरं वैशाखमासे ग्रहणस्य फलं निर्दिष्टम् –

वैशाखमासे ग्रहणे विनाश-
मायान्ति कर्पासतिलाः समुद्गाः।
इक्ष्वाकुयौधेयशकाः कलिङ्गाः
सोपप्लवाः किन्तु सुभिक्षमस्मिन्॥

अन्वयः – वैशाखमासे ग्रहणे कर्पासाः तिलाः समुद्गाः (एते) विनाशम् आयान्ति। (तथा) इक्ष्वाकवाः यौधेयाः शकाः कलिङ्गाः (एते सर्वे) सोपप्लवाः। किन्तु (पुनः) अस्मिन् (ग्रहणे) सुभिक्षं (च भवति)।

प्रतिपदार्थः – वैशाखामासे, ग्रहणे = सूर्यग्रहणे चन्द्रग्रहणे वा सति, कर्पासाः, तिलाः, समुद्गाः = मुद्गसहिताः (एते) विनाशम्, आयान्ति =गच्छन्ति। (तथा) इक्ष्वाकवाः = इक्ष्वाकुजनाः, यौधेयाः = यौधेयाः जनाः, शकाः = शकप्रदेशस्य जनाः, कलिङ्गाः = कलिङ्गदेशस्य जनाः, (एते सर्वे) सोपप्लवाः =सोपद्रवाः, किन्तु (पुनः) अस्मिन् (ग्रहणे) सुभिक्षं = सस्यवृद्धिः (च भवति)।

व्याख्या – यदि वैशाखमासे सूर्यग्रहणं चन्द्रग्रहणं वा भवति तदा कर्पासाः मुद्गलसहिताः तिलाश्च विनाशमायान्ति, नष्टाः वा भवन्ति। (तथा) इक्ष्वाकुजनाः यौधेयाः जनाः, शकप्रदेशस्य जनाः, कलिङ्गदेशस्य जनाः उपद्रवैः पीडिताः भवन्ति। वैशाखमासे ग्रहणस्य अशुभफलानां वर्णनानन्तरं शुभफलमपि च वर्णितं यत् लोके सुभिक्षमपि भवति। सुभिक्षं शब्देन सस्यवृद्धिः सुखवृद्धि, लोककल्याणं च ज्ञायते। तथा श्लोके वर्णितानां कलिङ्गशकयोधेयादिदेशानां वर्णनम् अग्रे ग्रहभक्तिनक्षत्रकूर्मादिपठनकाले भविष्यति।

अन्यमासेषु ग्रहणस्य फलविषये अग्रे पठामः।

८.४.३ ज्येष्ठादिमासेसु ग्रहणफलम्

ज्येष्ठमासे ग्रहणे सति फलं ग्रन्थे एवं वर्णितम्–

ज्येष्ठे नरेन्द्रद्विजराजपत्न्यः सस्यानि वृष्टिश्च महागणाश्च।
प्रध्वंसमायान्ति नराश्च सौभ्याः साल्वैः समेताश्च निषादसङ्घाः॥

अन्वयः – ज्येष्ठे (ग्रहणे) नरेन्द्राः, द्विजाः, राजपत्न्यः सस्यानि वृष्टिः च महागणाःच (एते सर्वे) प्रध्वंसम् आयान्ति। (तथा च ये) नराः सौभ्याः (ते) साल्वैः समेताः च निषादानां सङ्घाः (प्रध्वंसमायान्ति)

प्रतिपदार्थः – ज्येष्ठे = ज्येष्ठमासे (ग्रहणे), नरेन्द्राः = राजानः, द्विजाः= ब्राह्मणाः, राजपत्न्यः = राजस्त्रियः, सस्यानि = धान्याः, वृष्टिः = वर्षणं च महागणाः =

महासमूहाः च (एते सर्वे) प्रध्वंसं = नाशम्, आयान्ति = प्राप्नुवन्ति (तथा च ये) नराः = मनुष्याः, सौम्याः = दर्शनीयाः (ते) साल्वैः = साल्वदेशस्य जनैः, समेताः = सहिता च निषादानां = साल्वदेशस्य जनैः, समेताः = समूहाः (प्रध्वंसमायान्ति)।

व्याख्या – ज्येष्ठमासे ग्रहणे सति राजानः, ब्राह्मणाः, राजस्त्रियः, सस्यानि, धान्याः, महासमूहा च विनाशं प्राप्नुवन्ति तथा वृष्टेः च विनाशं भवति। तथा च ये दर्शनीयाः मनुष्याः उत्तरदिग्वासिनः सन्ति ते च नाशमुपयान्ति। तथा साल्वप्रदेश जनैः सहिताः प्राणिघातकानां निषादानां समूहाः च प्रध्वंसम् आयान्ति अर्थात् तेषां विनाशः भवति। एवं प्रकारेण ज्येष्ठमासे ग्रहणस्य अशुभफलानि निर्दिष्टानि।

इदानीम् आषाढमासे ग्रहणस्य फलं पठामः। आषाढमासे ग्रहणस्य फलं ग्रन्थे एवं वर्णितम्–

आषाढपर्वण्युदपानवप्रनदीप्रवाहान् फलमूलवार्त्तान्।
गान्धारकाश्मीरपुलिन्दचीनान् हतान् वदेन्मण्डलवर्षमस्मिन्॥

अन्वयः – आषाढपर्वणि उदपानं वप्रः नदीप्रवाहः फलमूलवार्त्ताः (ते, तथा) गान्धाराः काश्मीराः पुलिन्दाः चीनाः (एतान् सर्वान्) हतान् वदेत् अस्मिन् मण्डलवर्षं (भवति)

प्रतिपदार्थः – आषाढपर्वणि = आषाढमासे, (ग्रहणे)उदपानं = जलाधाराः वापीकूपतडागादिः (तस्य) वप्रः = तटः, नदीप्रवाहः = पुलिनविस्तरम्, फलमूलवार्त्ताः = फलानि मूलानि वार्त्ता वर्त्तनं वृत्तिः येषां ते फलविक्रेतारः, गान्धाराः = गान्धारदेशस्य जनाः, काश्मीराः = कश्मीरप्रदेशस्य जनाः, पुलिन्दाः = पुलिन्ददेशस्य जनाः, चीनाः= चीनप्रदेशस्य जनाः (एतान् सर्वान्) हतान् = नष्टान् इति वदेत्, अस्मिन् = पर्वणि, मण्डलवर्षं = क्वचित् क्वचित् वर्षति (भवति)।

व्याख्या – आषाढमासे सूर्यग्रहणे चन्द्रग्रहणे वा जाते, जलाधाराः वापीकूपतडागादि नश्यन्ति। तेषां तटाश्च नश्यन्ति। नदीप्रवाहः खण्डितः भवति। फलमूलविक्रयेण उत्पादनेन च येषाम् आजीविका भवति तेषां च विनाशः भवति। गान्धारप्रदेशस्य जनाः, कश्मीरदेशस्य जनाः, पुलिन्ददेशवासिनः, चीनदेशस्य जनाः एते सर्वे विनष्टाः भवन्ति। तथा आषाढमासे ग्रहणे सति मण्डलवर्षं भवति अर्थात् क्वचित् क्वचित् वर्षति इत्यर्थः। आषाढमासे ग्रहणस्य फलवर्णनानन्तरं श्रावणमास्य फलं वर्णितम्–

काश्मीरान् सपुलिन्दचीनयवनान् हन्यात् कुरुक्षेत्रजान्
गान्धारानपि मध्यदेशसहितान् दृष्टो ग्रहः श्रावणे।
काम्बोजैकशफांश्च शारदमपि त्यक्त्वा यथोक्तानिमा
नन्यत्र प्रचुरान्नहृष्टमनुजैर्धात्रीं करोत्यावृताम्॥

प्रतिपदार्थः – श्रावणे = श्रावणमासे, दृष्टः = दर्शितः, ग्रहः = ग्रहणं, काश्मीरान् = कश्मीरदेशस्य मनुष्यान्, सपुलिन्दचीनयवनान् = यावनाः तैः सहितान् पुलिन्द प्रदेशस्य चीनदेशस्य च जनाः, (तथा) कुरुक्षेत्रजनान् = कुरुक्षेप्रदेशे उत्पन्नाः मनुष्याः, गान्धारान् = गान्धरप्रदेशनिवासिनः, मध्यदेशसहितान् कम्बोजाः एकशफान् = अश्वगर्दभान् च, शारदम = शारदधान्यादिकान्, अपि = एतान् अपि (हन्ति) इमान् यथोक्तान् = काश्मीरादीन्, त्यक्त्वा=विहाय, अन्यत्र (देशेषु) प्रचुरेण = प्रभूतेन, अन्नेन = धान्येन, (ये) हृष्टाः = प्रहर्षिताः, मनुजाः = नराः (तैः) धात्रीं = भूमिम्, आवृतां = व्याप्तां करोति।

व्याख्या – श्रावणमासे दृष्टं ग्रहणं काश्मीरदेशस्य जनान्, यवनैः सहितान् चीनदेशस्य जनान्, पुलिन्दप्रदेशस्य जनान् च पीडयति। तथा कुरुक्षेत्रजनान् गान्धारदेशस्य जनान् च पीडयति। श्रावणमासस्य ग्रहणे कूर्मचक्रानुसारं मध्यदेशस्य जनैः सह काम्बोजदेशस्य मनुष्यान् निहन्ति। अश्वान् गर्दभान् च हन्ति। शरदृतौ ये धान्यादिका उत्पन्नाः भवन्ति तान् च नश्यति। श्रावणमासस्य ग्रहणं काश्मीरयवनचीनपुलिन्दगान्धारकाम्बोजमध्यदेशानाम् एव विनाशः करोति, परन्तु एतान् काश्मीरादिदेशान् विहाय अन्यदेशेषु प्रचुरेण अन्नं भवति तथा भूमिः हर्षितैः जनैः व्याप्ता भवति। अर्थात् पूर्वोक्तप्रदेशेभ्यः भिन्नप्रदेशस्यजना धान्याधिक्येन प्रसन्नाः हर्षिताः वा भवन्ति।

८.४.४ भाद्रपदादिमासेषु ग्रहणफलम्

भाद्रपदमासे ग्रहणस्य फलं ग्रन्थे एवं वर्णितम्–

कलिङ्गवङ्गान् मगधान् सुराष्ट्रान्
म्लेच्छान् सुवीरान् दरदाश्मकांश्च।
स्त्रीणां च गर्भानसुरो निहन्ति
सुक्षिभकृद् भाद्रपदेऽभ्युपेतः॥

अन्वयः – श्लोके समाससन्ध्यादियुक्तानि पदानि अल्पान्येव सन्ति अतः प्रतिपदार्थवर्णने अन्वयः स्पष्टः भविष्यति।

प्रतिपदार्थः – असुरो = राहुः, भाद्रपदे = भाद्रपदमासे, अभ्युपेतः = आगतः, कलिङ्गान् = कलिङ्गदेशस्य जनान्, वङ्गान् = वङ्गप्रदेशस्य मनुष्यान्, मगधान् = मगधप्रदेशस्य जनान्, सुराष्ट्रान् = सौराष्ट्रदेशस्य जनान्, म्लेच्छान् = म्लेच्छजातिविशेषस्य जनान्, सुवीरान् = सुवीरप्रदेशस्य जनान्, दरदान् = दरददेशस्य मनुष्यान्, अश्मकान् = अश्मकदेशस्य जनान्, (एतान् सर्वान्) निहन्ति = घातयति, (तथा) स्त्रीणां = योषितां, गर्भान् (निहन्ति) सुभिक्षकृत् = सुभिक्षं च करोति।

व्याख्या – यदि भाद्रपदमासे राहुः दृष्टः भवति अर्थात् भाद्रपदमासस्य पूर्णिमायाम् अमावस्यायां वा यदि ग्रहणं भवति तदा कलिङ्गदेशस्य वङ्गप्रदेशस्य, मगधदेशस्य मनुष्याः पीडिताः भवन्ति। तथा भाद्रपदमासस्य ग्रहणं म्लेछजनान् निहन्ति। सुवीरप्रदेशवासिनः, दरददेशस्य जनान्, अश्मकदेशस्य जनान् च भाद्रपदमासे दृष्टः राहुः निहन्ति। तथा स्त्रीणां गर्भान् च घातयति, परन्तु पूर्वोक्तप्रदेशेभ्यः भिन्नप्रदेशेषु सुभिक्षं कल्याणं च करोति। सुवीरदरदकलिङ्गमगध ादिदेशानां परिचयः तु अग्रिमाध्यायेषु प्राप्स्यति।

भाद्रपदमासे ग्रहणस्य फलपठनानन्तरम् आश्विनमासे ग्रहणस्य फलं पठामः। द्वादशमासेषु ग्रहणस्य फलवर्णनकाले ग्रन्थे अन्तिमे आश्विनमासे ग्रहणस्य फलम् एवं निर्दिष्टम्–

काम्बोजचीनयवनान् सह शल्यहद्भि
र्बाह्लीकसिन्धुतटवासिजनांश्च हन्यात्।
आनर्त्तपौण्ड्रभिषजश्च तथा किरातान्
दृष्टेऽसुरोऽश्वयुजि भूरिसुभिक्षकृच्च॥

अन्वयः – असुरो अश्वयुजि दृष्टः काम्बोजान् चीनान् (एतान् सर्वान्) सह शल्यहद्भिः (तथा) बाह्लीकान् सिन्धुतटवासिजनान् च हन्यात्। आनर्त्ताः पौण्ड्राः भिषजः च तथा किरातान् (हन्यात् तथा) भूरिसुभिक्षकृत् च (भवति)

प्रतिपदार्थः – असुरो = राहुः, अश्वयुजि = आश्विनमासे, दृष्टः = दर्शितः, काम्बोजान् = कम्बोजप्रदेशस्य जनान्, चीनान् = चीनदेशस्य मनुष्यान्, (एतान् सर्वान्),

---

शल्यहद्भिः = शल्यहर्तृभिः व्रणचिकित्सकैः, सह = सहितं, (तथा) बाह्लीकप्रदेशस्य जनान्, सिन्धुतटवासिजनान् = सिन्धोः नद्याः तटे ये निवसन्ति जनाः तान्, च = अपि, हन्यात् = घातयेत्। आनर्त्तः = आनर्त्तप्रदेशनिवासिनः, पौण्ड्राः = पुण्ड्रप्रदेशनिवासिनः, भिषजः = वैद्याः, तथा किरातान् = किराताः जनाः तान् (एतान् सर्वान् हन्यात् तथा), भूरिसुभिक्षकृच्च = भूरिशब्दः बाहुल्यद्योतकः अतः बाहुल्येन सुभिक्षं च करोति इत्यर्थः।

व्याख्या – यदि आश्विनमासे राहुः दृष्टः भवति अर्थात् यदि आश्विनमासे चन्द्रग्रहणं सूर्यग्रहणं वा भवति तदा कम्बोजप्रदेशस्य जनान्, चीनदेशस्य जनान् च राहुः हन्ति। तथा च ये जनाः शल्यचिकित्सां कुर्वन्ति तादृशाः व्रणचिकित्सकाः तैः सह बाह्लीकप्रदेशस्य मनुष्याः च पीडिताः भवन्ति तथा सिन्धुनद्याः तटे ये जनाः निवसन्ति तान् च घातयति। आश्विमासे ग्रहणे सति आनर्त्तप्रदेशनिवासिनः पुण्ड्रप्रदेशनिवासिनः, वैद्याः तथा किराताः जनाः पीडिताः भवन्ति। तथा च श्लोके पूर्वोक्तप्रदेशेभ्यः भिन्नप्रदेशेषु बाहुल्येन सुभिक्षं करोति। अत्रापि वर्णितानां विविधप्रदेशानां नामानि अग्रे भवान् पठिष्यति।

बोधप्रश्नाः

१. भौमे ग्रस्ते के जनाः पीडिताः भवन्ति?

२. भृगुतनयः कस्य संज्ञा वर्तते?

३. पारियात्रपर्वताश्रिताः कदा पीडिताः भवन्ति?

४. मार्गशीर्षमासे ग्रहणे सति केषां प्रदेशानां जनाः पीडिताः भवन्ति?

५. मातृपितृभक्तान् राहुः कदा पीडयति?

६. कस्मिन् मासे ग्रहणे सति मण्डलवर्षं भवति?

७. बाह्लीकप्रदेशवासिनः कदा पीडिताः भवन्ति?

८.५ सूर्यचन्द्रयोः दशमोक्षाणां लक्षणं फलञ्च

पूर्वस्मिन् पाठे भवता सूर्यचन्द्रयोः ग्रहणे दशविधग्रासाः पठिताः। यथा ग्रहणे दशविध ग्रासाः भवन्ति तथैव दशविधमोक्षाः अपि भवन्ति। ग्रहणस्य निवृत्ति एव मोक्ष शब्देन उच्यते। दशमोक्षाणां नामानि आचार्येण ग्रन्थे एवं विहितानि–

हनुकुक्षिपायुभेदा द्विर्द्विः सञ्छर्दनं च जरणं च।
मध्यान्तयोश्च विदरणमिति दश शशिसूर्ययोर्मोक्षाः॥

अन्वयः – हनुकुक्षिपायुभेया द्विर्द्विः सञ्छर्दनं जरणं च मध्यान्तयोः च विदरणम् इति शशिसूर्ययोः मोक्षाः।

प्रतिपदार्थः – हनुकुक्षिपायुभेदा = हनुभेदौ कुक्षिभेदौ पायुभेदौ, द्विर्द्विः = द्वौ द्वौ वारौ, सञ्छर्दनं = सञ्छर्दनसंज्ञकः मोक्षः, च, जरणं = जरणं नाम मोक्षः, चकारः समुच्चये, मध्यान्तयोश्च विदरणम् = मध्यविदरणम् अन्त्याविदरणं च, इति = एवं प्रकाराः, शशिसूर्ययोः = चन्द्रार्कयोः, दश = दशसंख्यकाः मोक्षाः = ग्रहणनिवृत्तयः (भवन्ति)।

व्याख्या – श्लोकेऽस्मिन् ग्रहणस्य मोक्षाणां दशभेदानां नामानि विहितानि सन्ति। तत्र मोक्षाणां हनुकुक्षिपायुभेदा द्विर्द्विः विहिताः। अतः द्वौ हनुभेदौ-दक्षिणहनुः वामहनुश्च। कुक्षिभेदौ द्वौ दक्षिणकुक्षिः वामकुक्षिश्च। पायुभेदौ च द्वौ-दक्षिणपायुः वामपायुश्च। इति षट्भेदाः। तथा

सञ्छर्दनं जरणं च मोक्षस्य भेदौ स्तः। तथा मध्यविदरणम् अन्त्यविदरणं च मोक्षस्य भेदौ भवतः। इत्येवं प्रकारेण शशिसूर्ययोः दशमोक्षाः विहिताः १. दक्षिणहनुमोक्षः २. वामहनुमोक्षः ३. दक्षिणकुक्षिमोक्षः ४. वामकुक्षिमोक्षः ५. दक्षिणपायुमोक्षः ६. वामपायुमोक्षः ७. सञ्छर्दनमोक्षः ८. जरणमोक्षः ९. मध्यविदरणमोक्षः १०. अन्त्यविदरणमोक्षः। एतेषां लक्षणविषये फलविषये च इदानीं विस्तरेण पठामः।

८.५.१ दक्षिणहन्वादिमोक्षाणां लक्षणं फलञ्च

मोक्षाणां भेदवर्णने आदौ दक्षिणहनुभेदस्य लक्षणं सफलं ग्रन्थे एवं विहितम्–

आग्नेय्यामपगमनं दक्षिणहनुभेदसंज्ञितं शशिनः।
सस्यविमर्दो मुखरुग् नृपपीडा स्यात् सुवृष्टिश्च॥

अन्वयः – आग्नेय्यां (दिशि यदि) अपगमनं (तमः करोति तदा) शशिनः (स मोक्षः) दक्षिणहनुभेदसंज्ञितं (भवति)। अस्मिन् मोक्षे) सस्यविमर्दः, मुखरुग् नृपपीडा सुवृष्टिः च स्यात्।

प्रतिपदार्थः – आग्नेय्यां = पूर्वदक्षिणस्यां दिशि (यदि) अपगमनम् = निवर्तनं (तमः करोति तदा) शशिनः = चन्द्रस्य (स मोक्षः) दक्षिणहनुभेदसंज्ञितः = दक्षिणहनुभेद इति तस्य संज्ञा भवति। अस्मिन् (मोक्षे) सस्यविमर्दः = सस्यनाशः, मुखरुक् = वदनपीडा, नृपपीडा = राज्ञः पीडा, स्यात् = भवेत् सुवृष्टिः = शोभना वृष्टिः च (भवेत्)।

व्याख्या – यदि पूर्वदक्षिणस्यां दिशि अर्थात् आग्नेय्यां दिशि राहुः यदि निवर्त्तनं करोति तदा चन्द्रमण्डलस्य सः मोक्षः दक्षिणहनुभेदसंज्ञितः भवति। श्लोके 'शशिनः' इति शब्दः लिखितः वर्तते अनेन चन्द्रग्रहणमात्रमेव उपलक्षितं भवति। परन्तु पूर्वस्मिन् श्लोके 'शशिसूर्ययोर्मोक्षाः' इति शब्देन ज्ञायते यत् एते दशमोक्षाः सूर्यस्य सन्ति चन्द्रस्यापि च। अतः भट्टोत्पलेन टीकायाम् उल्लिखितं यत् ' एते सर्वे मोक्षा भास्करस्यापि वक्तव्या' इति। अतः अस्मिन् श्लोके 'शशिनः' शब्देन न केवलं चन्द्रस्य अपितु सूर्यस्यापि बोधः भवति। सर्वेऽपि मोक्षाः द्वयोः ग्रहणे ज्ञेयाः। अतः सूर्यमण्डलस्य चन्द्रमण्डलस्य वा आग्नेय्यां दिशि तमसः निर्वत्तनं भवति तथा दक्षिणहनुसंज्ञकः मोक्षः भवति। अस्मिन् मोक्षे राज्ञः पीडा, सस्यानां विनाशः, वदनपीडा तथा सुवृष्टिः भवति। अतः अस्मिन् मोक्षे शुभफलानि अशुभफलानि च भवन्ति। परन्तु कश्यपेन अशुभफलानि एव निर्दिष्टानि–

दक्षिणो हनुभेदः स्याच्चाग्नेय्यां यदि गच्छति।
सस्यनाशं च कुरुते नृपभङ्गं सुदारुणम्॥

तदनन्तरं सफलं वामहनुभेदमोक्षं ग्रन्थे एवं विहितम्–

पूर्वोत्तरेण वामो हनुभेदो नृपकुमारभयदायी
मुखरोगं शस्त्रभयं तस्मिन् विन्द्यात् सुभिक्षं च॥

अन्वयः – पूर्वोत्तरेण (अपगमनं राहोः यदि भवति तदा सः) वामो हनुभेदो (नाम 'मोक्षः' स च) नृपकुमाराणां भयदायी (भवति) तस्मिन्)मोक्षे मुखरोगं शस्त्रभयं सुभिक्षं च विन्द्यात्।

प्रतिपदार्थः – पूर्वोत्तरेण = पूर्वोत्तरस्यां दिशि, ऐशान्यां दिशि वा, (राहोः यदि अपमगनं भवति तदा सः) वामो हनुभेदो = वामहनुभेदसंज्ञकः (मोक्षः भवति) स च नृपकुमाराणां = नृपपुत्राणां, भयदायी = भीतिप्रदायकः (भवति) तस्मिन् (मोक्षे) मुखरोगं = वक्त्रपीडां, शस्त्रभयं = संग्रामभीतिं च, विन्द्यात् = जानीयात्। सुभिक्षं = धनधान्यबाहुल्यं च भवति)।

व्याख्या – सूर्यग्रहणे चन्द्रग्रहणे वा यदि राहोः निवर्तनं यदि ऐशान्यां दिशि भवति तदा सः मोक्षः वामहनुभेदसंज्ञकः मोक्षः भवति। स च मोक्षः राजपुत्राणां भीतिप्रदायकः भवति। तस्मिन् (मोक्षे) मुखरोगं, युद्धानि, शस्त्रभयं च जानीयात्। एतानि अशुभफलानि भवन्ति। मोक्षऽस्मिन् न केवलम् अशुभफलानि भवन्ति अपितु सुभिक्षमपि भवति। 'सुभिक्ष' शब्दस्य व्युत्पतिः भवति 'भिक्षाणां समृद्धिः' अर्थात् यदा जनाः भिक्षादाने समर्थाः भवन्ति, भिक्षादाने च तेषां सामर्थ्यं वर्धते तदा सुभिक्षमित्युच्यते। एतादृशी स्थितिः तदैव सम्भवति यदा लोके धनधान्यादीनां वृद्धिः भवति, सुवृष्टिः, सस्यानां वृद्धिश्च भवति।

वामहनुभेदसंज्ञकग्रासस्य वर्णनानन्तरं दक्षिणकुक्षिसंज्ञकस्य ग्रासस्य वर्णनं ग्रन्थे एवं विहितम्–

दक्षिणकुक्षिविभेदो दक्षिणपार्श्वेन यदि भवेन्मोक्षः।
पीडा नृपपुत्राणामाभियोज्या दक्षिणा रिपवः॥

अन्वयः – दक्षिणपार्श्वेन यदि मोक्षः भवेत् (सः) दक्षिणकुक्षिविभेदो (नाम मोक्षः। तस्मिन् मोक्षे) नृपपुत्राणां पीडा (भवति तथा) दक्षिणा रिपवः अभियोज्या।

प्रतिपदार्थः – दक्षिणपार्श्वेन = दक्षिणभागेन यदि, मोक्षः = ग्रहणनिवृत्तिः, भवेत् (तदा सः) दक्षिणकुक्षिविभेदो = दक्षिणकुक्षिविभेदसंज्ञकः मोक्षः भवति। तस्मिन् (मोक्षे) नृपपुत्राणां = राजसुतानां, पीडा = दुःखं (भवति तथा) दक्षिणा रिपवः = दक्षिणदिक्स्थाः शत्रवः, अभियोज्याः = तेषाम् उद्योगः कार्यः इत्यर्थः।

व्याख्या – चन्द्रबिम्बस्य सूर्यबिम्बस्य वा दक्षिणभागेन यदि मोक्षः भवेत् तदा सः मोक्षः, दक्षिणकुक्षिविभेदसंज्ञकः भवति। तस्मिन् मोक्षे राजपुत्राणां पीडा भवति। तथा च दक्षिणदिशि स्थितानां शत्रूणां युद्धं भवति। टीकायां भट्टोत्पलेन वर्णितं यत् सिद्धान्ताचार्यानुसारं ग्रहणस्य मोक्षः दक्षिणादिशि तु असम्भवः। गणितगोलवासनया दक्षिणोत्तरयोः दिशोः ग्रासमोक्षौ न भवतः। यदि एतादृशी स्थितिः भवति तदा सः उत्पातस्वरुप एव मन्यते इति उक्तम्।

८.५.२ वामकुक्ष्यादिमोक्षाणां लक्षणं फलञ्च

वामकुक्षिसंज्ञकमोक्षस्य लक्षणं फलञ्च ग्रन्थे एवं वर्णितम् –

वामस्तु कुक्षिभेदो यद्युत्तरमार्गसंस्थितो राहुः।
स्त्रीणां गर्भविपत्तिः सस्यानि च तत्र मध्यानि॥

अन्वयः – राहुः यदि उत्तरमार्गसंस्थितः (तदा सः)तु वामः कुक्षिभेदो (नाम मोक्षः। तस्मिन् मोक्षे) स्त्रीणां गर्भविपत्तिः (तथा) च तत्र सस्यानि मध्यानि (भवन्ति)

प्रतिपदार्थः – राहुः यदि उत्तरमार्गसंस्थितः = उत्तरस्यां दिशि स्थितः भवति (तदा सः) तु वामः कुक्षिभेदौ = वामकुक्षिभेदसंज्ञकः (मोक्षः भवति। तस्मिन् मोक्षे) स्त्रीणां = योषितां, गर्भविपत्तिः = गर्भविनाशः (भवति तथा) च तत्र सस्यानि = धान्यानि, मध्यानि = नाल्पानि न बहूनि (भवन्ति)।

व्याख्या – राहुः यदि उत्तरस्यां दिशि संस्थितः भवति अर्थात् ग्रहणस्य मोक्षः यदि उत्तरदिशि भवति तदा वामकुक्षिसंज्ञकः मोक्षः भवति। तस्मिन् मोक्षे स्त्रीणां गर्भविनाशः भवति तथा धान्यानि न तु अल्पानि भवन्ति न बहूनि अर्थात् मध्यानि भवन्ति। न तु अन्नाधिक्यं भवति न च न्यूनता भवति यावत् अपेक्षितं तावदेव अन्नं भवति। एषः मोक्ष अपि उत्पातस्वरुप एव भवति। यतो पूर्वस्मिन् श्लोके पठितं यत् गणितगोलवासनया दक्षिणोत्तरयोः दिशोः ग्रासमोक्षौ न भवतः।

तदनन्तरं ग्रन्थे दक्षिणवामौ पायुभेदौ मोक्षौ श्लोकेनेकेनैव वर्णितौ। तद्यथा-

नैर्ऋतवायव्यस्थौ दक्षिणवामौ तु पायुभेदौ द्वौ।
गुह्यरुगल्पा वृष्टिर्द्वयोस्तु राज्ञीक्षयो वामे॥

अन्वयस्तु श्लोके स्पष्ट एव पुनश्च प्रतिपदार्थवर्णने स्पष्टतरः भविष्यति-

प्रतिपदार्थः – नैर्ऋतवायव्यस्थौ = नैर्ऋत्यां = दक्षिणपश्चिमायां दिशि, वायव्यस्थे = पश्चिमोत्तरस्याम् अवस्थिते, दक्षिणवामौ = दक्षिणश्च वामश्च, पायुभेदौ = पायुशब्देन अपानस्थानम् उच्यते तस्य द्वौ भेदौ, (अनयोः द्वयोरपि) गुह्यरुग् = गुदरोगः, गुह्यं लिङ्गं वा तत्र रोगः, अल्पा = स्वल्पा, वृष्टिः = वर्षणं (भवति) वामे = वामकुक्षिभेदे, राज्ञीक्षयो – राज्ञ्या = राजपत्न्याः, क्षयः = मरणं भवति।

व्याख्या – मोक्षकाले यदि नैर्ऋत्यां दक्षिणपश्चिमायां वा दिशि व्यवस्थिते राहौ दक्षिणपायुसंज्ञकः मोक्षः भवति। अर्थात् यदि ग्रहणस्य मोक्षः नैर्ऋत्यादिशि भवति तदा दक्षिणपायुमोक्षः भवति। तथा वायव्यस्थे पश्चिमोत्तरस्यां दिशि वा स्थिते राहौ वामपायुभेदसंज्ञकः मोक्षः भवति अर्थात् ग्रहणस्य मोक्षः वायव्यदिशि भवति। अनयोः द्वयोरपि मोक्षयोः जनाः गुह्यरोगेण (गुदारोगेण लिङ्गरोगेण वा) पीडिताः भवन्ति। तथा वृष्टि अपि अल्पा एव भवति। वामकुक्षिभेदस्य विशेषफलं वर्णितं यत् वामकुक्षि मोक्षे राजपत्न्याः मरणं भवति। अर्थात् प्रधानराज्ञ्या मृत्युः भवति। इत्येन द्वौ कुक्षिभेदमोक्षौ वर्णितौ। एतदनन्तरं सञ्छर्दनमोक्षस्य विषये पठामः। सञ्छर्दनमोक्षस्य विषये ग्रन्थे एवं विहितम् –

पूर्वेण प्रग्रहणं कृत्वा प्रागेव चापसर्पेत।
सञ्छर्दनमिति तत्क्षेमसस्यहार्दिप्रदं जगतः॥

अन्वयः – पूर्वेण प्रग्रहणं कृत्वा प्रागेव (यदि) च अपसर्पेत (सः मोक्षः) सञ्छर्दनमिति। (तच्च) जगतः क्षेमप्रदं सस्यप्रदं हार्दिप्रदं (च भवति)

प्रतिपदार्थः – पूर्वेण = पूर्वस्यां दिशि, प्रग्रहणं कृत्वा, प्रागेव = पूर्वस्याम् एव (यदि) च अपसर्पेत = गमनं करोति (सः मोक्षः) सञ्छर्दनमिति = सञ्छर्दनसंज्ञकः भवति। तच्च जगतः = लोकस्य, क्षेमप्रदं = कल्याणप्रदं, सस्यप्रदं = धान्यप्रदं, हार्दिप्रदं = तुष्टिप्रदं (च भवति)।

व्याख्या – यदि राहुः पूर्वस्यां दिशि बिम्बस्य ग्रहणं करोति पुनश्च यदि पूर्वस्याम् एव दिशि गमनवशात् मोक्षः भवति तदा सञ्छर्दनसंज्ञकः मोक्षः भवति। सः मोक्षः लोकस्य कल्याणप्रदः, सस्यप्रदः, तुष्टिप्रदः च भवति। इत्यनेन ज्ञायते यत् सञ्छर्दनमोक्षस्य शुभफलानि एव भवन्ति।

कश्यपेन अपि तथैव विहितम् –

ग्रासमोक्षौ यदा पूर्वे छर्दनं तु तदा भवेत्।
क्षेमहार्दिप्रदं ज्ञेयं सस्यनिष्पत्तिकारकम्॥

जरणादिमोक्षाणां विषये च अग्रे पठामः।

८.५.३ जरणादिमोक्षाणां लक्षणं फलञ्च

जरणमोक्षस्य लक्षणं फलञ्च ग्रन्थे एवं विहितम् –

प्राक्प्रग्रहणं यस्मिन् पश्चादपसर्पणं तु तज्जरणम्।

क्षुच्छस्त्रभयोद्विग्ना न शरणमुपयान्ति तत्र जनाः।।

अन्वयः – यस्मिन् (प्रग्रहणे) प्राक् ग्रहणं (कृत्वा) पश्चात् अपसर्पणं (करोति तदा)तत् (जरणं) नाम मोक्षः। तस्मिन् मोक्षे जनाः क्षुच्छस्त्रभयोद्विग्नाः शरणम् (अपि) न उपयान्ति।

प्रतिपदार्थः – यस्मिन् (प्रग्रहणे) प्राक् = पूर्वस्यां दिशि, ग्रहणं = प्रगहणं (कृत्वा) पश्चात् = पश्चिमायां दिशि, अपसर्पणं = गमनं (करोति तदा) तत् जरणं = जरणं नाम मोक्षः (भवति) तस्मिन् मोक्षे जनाः, क्षुच्छस्त्रभयोद्विग्नाः – क्षुद्भयं = दुर्भिक्षभयं, शस्त्रभयं = संग्राम-भीतिः, तेन, उद्विग्नाः = दुःखिताः, शरणम् = आश्रयम् (अपि) न उपयान्ति = प्राप्नुवन्ति।

व्याख्या – यस्मिन् ग्रहणे राहुः पूर्वस्यां दिशि ग्रहणं कृत्वा पश्चिमायां दिशि गमनं करोति तथा पश्चिमदिशि मोक्षः भवति तदा सः जरणसंज्ञकः मोक्षः भवति। तस्मिन् मोक्षे जनाः दुर्भिक्षभयं, संग्रामभीतिं च प्राप्नुवन्ति। तेन ते जनाः दुःखिताः भवन्ति क्वचिदपि आश्रयं न प्राप्नुवन्ति। अतः जरणसंज्ञकमोक्षस्य अशुभफलम् एव भवति।

जरणमोक्षानन्तरं मध्यविदरणसंज्ञकमोक्षस्य विषये ग्रन्थे एवं वर्णितम् –

मध्ये यदि प्रकाशः प्रथमं तन्मधयविदरणं नाम।
अन्तः कोपकरं स्यात् सुभिक्षदं नातिवृष्टिकरम्।।

अन्वयः – प्रथमं यदि प्रकाशः मध्ये (तत्) मध्यविदरणं नाम (मोक्षः) तत् अन्तः कोपकरं स्यात् सुभिक्षदं (स्यात्) न अतिवृष्टिकरं (भवति)।

प्रतिपदार्थः – प्रथमम् = आदौ, यदि, मध्ये = मध्यभागे, प्रकाशः = बिम्बस्य प्राकाश्यमुत्पद्यते (तत्) मध्यविदरणं, नाम = संज्ञकं (मोक्षः) तत् अन्तःकोपकरम्– अन्तः = अभ्यन्तरे राजगृहे कोपकरं, स्वयमेव सैन्यक्षोभकरं, स्यात् = भवेत् (तथा) सुभिक्षदं = सुभिक्षं ददाति, न अतिवृष्टिकरं = प्रभूतं न वर्षति इत्यर्थः।

व्याख्या – यदि आदौ बिम्बस्यमध्यभागे प्राकाश्यमुत्पद्यते तदा सः मोक्षः मध्यविदरणं नाम मोक्षः भवति। परन्तु एतादृशः मोक्ष अपि सर्वदा न सम्भवति। अतः अस्य मोक्षस्य उत्पातरूपेण स्वीकृति अस्ति। अतः भट्टोत्पलेन एतत् औत्पातिकमिति उक्तम्। यतो हि एषः मोक्षः गोलगणितविरुद्धमस्ति। मोक्षकाले बिम्बस्य मध्यभागे प्राकाश्यं न संभवति। तस्मिन् मोक्षे राजगृहे सेनायां परस्परम् एव युद्धं भवति। परन्तु लोके धनधान्यादिवृद्धिः सुभिक्षं च भवति। तस्मिन् मोक्षे अधिका वृष्टिः न भवति।

मध्यविदरणमोक्षानन्तरम् अन्तिमः मोक्षः भवति अन्त्यविदरणसंज्ञकः। तस्य मोक्षस्य लक्षणं फलञ्च आचार्येण एवं विहितम्–

पर्यन्तेषु विमलता बहुलं मध्ये तमोऽन्त्यदरणाख्यः।
मधयाख्यदेशनाशः शारदसस्यक्षयश्चास्मिन्।।

अन्वयः – पर्यन्तेपु यदि विमलता, मध्ये बहुलं तमः (तत्) अन्त्यदरणाख्यः (मोक्षः)। (अस्मिन् मोक्षे) मध्याख्यदेशनाशः शारदसस्यक्षयः च भवति।

प्रतिपदार्थः – पर्यन्तेपु = बिम्बान्तभागेपु, यदि विमलता = निर्मलत्वं (भवति) मध्ये = मध्यभागे, बहुलं = सन्ततं, तमः = राहुः, अन्धकारः, (सः) अन्त्यविदरणाख्यः = अन्त्यविदरणसंज्ञकः मोक्षः अस्मिन् मोक्षे मध्याख्यदेशनाशः = मध्याख्यस्य देशस्य नाशः (भवति), शारदासस्यक्षयः = शारदानां सस्यानां च क्षयः (भवति)

व्याख्या – यदि बिम्बस्य अन्तभागेषु निर्मलत्वं भवति तथा बिम्बस्य मध्यभागे बहुलम् तमः अर्थात् श्यामलता अंधकारः वा भवति तदा सः अन्त्यविदरणसंज्ञकः मोक्षः भवति। अस्मिन् मोक्षे मध्यदेशस्य विनाशः भवति। अत्र मध्यदेशस्य निर्णयः तु नक्षत्रकूर्मचक्रानुसारं करणीयः। कूर्मस्य मध्यभागे स्थितः प्रदेशः मध्यदेशः नाम्ना ज्ञायते। तथा अस्मिन् ग्रहणे शारदानां (शरदृतौ उत्पन्नानां) सस्यानां च विनाशः भवति। एषः मोक्ष अपि गणितगोलविरुद्धः वर्तते। अत एषः मोक्षः भट्टोत्पलेन उत्पातस्वरुपः औत्पातिकः वा निर्दिष्टः वर्तते। कश्यपेनापि अस्य मोक्षस्य विषये उल्लिखितम्–

पर्यन्ते विमलत्वं स्यात्तमो मध्ये यदा भवेत्।
मध्याख्यदेशनाशः स्याच्छरत्सस्यं विनश्यति॥

एते सर्वे मोक्षाः तु विशेषरुपेण चन्द्रस्यैव वर्णिताः सन्ति। परन्तु वराहमिहिराचार्येण सूर्यस्य मोक्षाणां विषये किञ्चित् भिन्नं निर्दिष्टम्। तत् इदानीं पठामः।

८.५.४ भास्करस्य मोक्षाः

सिद्धान्तग्रन्थेषु वर्णितमस्ति यत् चन्द्रग्रहणे चन्द्रबिम्बस्य ग्रासः पूर्वदिशि भवति तथा मोक्षः पश्चिमायां दिशि भवति। सूर्यग्रहणे तु विपरीतं भवति। अर्थात् सूर्यग्रहणे सूर्यबिम्बस्य ग्रासः पश्चिमदिशि भवति तथा मोक्षः पूर्वदिशि भवति अतः सूर्यस्य मोक्षाणां सन्दर्भे विशेषरुपेण वर्णितम्–

एते सर्वे मोक्षा वक्तव्या भास्करेऽपि किन्त्वत्र।
पूर्वा दिक् शशिनि यथा तथा रवौ पश्चिमा कल्प्या॥

अन्वयः – एते सर्वे मोक्षा (ये शशिन उक्ताः ते सर्वे) भास्करे अपि वक्तव्याः। किन्तु अत्र (विशेषः) यथा शशिशि पूर्वादिक् (तथा) रवौ पश्चिमा कल्प्या।

प्रतिपदार्थः – एते सर्वे मोक्षाः (ये शशिनः उक्ताः ते सर्वे) भास्करे = सूर्ये, आदित्ये वा, अपि वक्तव्याः = कथनीयाः। किन्तु अत्र (विशेषः) यथा शशिनि = चन्द्रे, पूर्वा दिक् = पूर्वदिशा (तथा) रवौ = आदित्ये, पश्चिमा = पश्चिमदिशा कल्प्या = कल्पनीया।

व्याख्या – एते ये दक्षिणहन्वादिदशमोक्षाः पूर्वं पठिता ते सर्वे चन्द्रग्रहणस्य मोक्षाः सन्ति। एते एव दशमोक्षाः सूर्यग्रहणेऽपि कथनीयाः। अर्थात् सूर्यस्यापि एते एव दक्षिणहन्वादिदशमोक्षाः भवन्ति। परन्तु यतो हि सूर्यग्रहणे बिम्बस्य ग्रासः मोक्षश्च चन्द्रग्रहणस्य ग्रासमोक्षाभ्यां विपरीतदिशि भवति अतः एतेषु दशमोक्षेषु यत्र कुत्रापि पूर्वादिशा लिखिता अस्ति तत्र सूर्यस्य मोक्षसन्दर्भे पश्चिमादिक् ज्ञेया। तथा च यत्र दक्षिणादिक् अस्ति तत्र सूर्यस्य मोक्षे उत्तरादिक् ज्ञेया। तथैव विदिक्षु च वक्तव्यः।

यथा– दक्षिणकुक्षिभेदसंज्ञकमोक्षे भवता पठितं यत् चन्द्रबिम्बस्य दक्षिणदिशि मोक्षः भवति। परन्तु यदि सूर्यबिम्बस्य उत्तरदिशि मोक्षः भवति तदा तस्य सूर्यग्रहणे दक्षिणकुक्षिभेदसंज्ञकः मोक्षः भवति। एवमेव सर्वेष्वपि मोक्षेषु चन्द्रस्य विपरीतदिक्षु मोक्षवशात् सूर्यस्य मोक्षः ज्ञेयः।

सूर्यचन्द्रयोः दशविधमोक्षाणां वर्णनानन्तरं मोक्षदिवसात् सप्तदिनाभ्यन्तरे दर्शितानाम् उत्पातानां फलानि वर्णितानि। तेषां विषये अग्रे पठामः।

८.६ मोक्षात् सप्तदिनाभ्यन्तरे दृष्टस्य उत्पातस्य फलम्

ग्रहणे मुक्ते सप्तदिनाभ्यन्तरे दृष्टानाम् उत्पातानां फलविषये ग्रन्थे एवं वर्णितम्–

मुक्ते सप्ताहान्तः पांशुनिपातोऽन्नसंक्षयं कुरुते।
नीहारो रोगभयं भूकम्पः प्रवरनृपमृत्युम्॥

उल्का मन्त्रिविनाशं नानावर्णा घनाश्च भयमतुलम्।
स्तनितं गर्भविनाशं विद्युन्नृपदंष्ट्रिपरिपीडाम्॥

परिवेषो रुक्पीडां दिग्दाहो नृपभयं च साग्निभयम्।
रूक्षो वायुः प्रबलश्चौरसमुत्थं भयं धत्ते॥

निर्घातः सुरचापं दण्डश्च क्षुद्भयं सपरचक्रम्।
ग्रहयुद्धे नृपयुद्धं केतुश्च तदेव सन्दृष्टः॥

अविकृतसलिलनिपातैः सप्ताहान्त सुभिक्षमादेश्यम्।
यच्चाशुभं ग्रहणजं तत्सर्वं नाशमुपयाति॥

अन्वयः – मुक्ते (ग्रहणे) सप्ताहान्तः (यदि) पांशुनिपातो (दृश्यते तदा) अन्नसंक्षयं कुरुते। तथा नीहारो रोगभयं भूकम्पः प्रवरनृपमृत्युं (करोति)।

उल्का (पतिता) मन्त्रिविनाशं (करोति) नानावर्णाः घनाः च अतुलं भयं (कुर्वन्ति) स्तनितं गर्भविनाशं (करोति) विद्युत् नृपदंष्ट्रिपरिपीडां करोति।

परिवेषः रुक्पीडां (करोति) दिग्दाहो साग्निभयं नृपभयं च (करोति) रुक्षः प्रबलः वायुः चौरसमुत्थं भयं धत्ते।

निर्घातः सुरचापं दण्डश्च सपरचक्रं क्षुद्भयं (करोति) ग्रहयुद्धे नृपयुद्धं (करोति) केतुः च सन्दृष्टः तदेव (करोति)।

सप्ताहान्तः अविकृतसलिलनिपातैः सुभिक्षम् आदेश्यम्। यत् च ग्रहणजम् अशुभं तत्सर्वं नाशम् उपयाति।

प्रतिपदार्थः – मुक्ते = मोक्षप्राप्ते (ग्रहणे) सप्ताहान्तः = दिनसप्तकमध्ये (यदि) पांशुनिपातो = पांशुवर्षणं (दृश्यते, तदा) अन्नसंक्षयं = दुर्भिक्षं कुरुते = करोति (तथा) भूकम्पः = भूमेः कम्पनं, प्रवरनृपमृत्युं = प्रवरस्य = प्रधानस्य नृपस्य = राज्ञो, मृत्युं = मरणं (करोति)।

उल्का (पतिता) मन्त्रिविनाशं = मत्रिणः विनांश (करोति) नानावर्णा = विविधाकान्तयः, घनाः = मेघाः च अतुलम् = अतिभयं (कुर्वन्ति), स्तनितं = मेघशब्दः, (तच्च गर्भविनाशं = स्त्रीणां गर्भस्य अजाताशिशोः वा मृत्युः (करोति) विद्युत् = तडित्, नृपदंष्ट्रिपरिपीडाम् – नृपो = राजा, दंष्ट्रिणः = सर्पादयः, तेभ्यः परिपीडां = उपतापनं कष्टं वा (करोति)।

परिवेषः = सूर्यविम्वस्य चन्द्रबिम्बस्य वा परितः मण्डलसदृशी आकृतिः, रुक्पीडां = रोगव्यथां रोगजनितां पीडां (करोति) दिग्दाहो = दिशां दाहो, साग्निभयम् = अग्निभयेन सहितं, नृपभयं = राजपक्षतः भयं (बन्धनादिदण्डं) च (करोति), रूक्षः = परुषः, प्रबलः = प्रचण्डः, वायुः, चौरसमुत्थं = तस्करोत्पन्नं, भयं, धत्ते = ददाति।

निर्घातः = पवनः पवनाभिहतेन यदा भयंकर शब्दः भवति तस्य निर्घात संज्ञा प्रदत्ता। सुरचापमिन्द्रधनुः, दण्डः = रविकिरणजलदमरुतां संघातः(एतेषाम्) अन्यतमं सपरचक्रकं = परचक्रभयसहितं, क्षुद्भयं = दुर्भिक्षभयं (करोति), ग्रहयुद्धे = ग्रहयोः युद्धे नृपयुद्धं = राज्ञां युद्धं (भवति) केतुः = शिखी च सन्दृष्टः = दर्शिते, तदेव = तद्वत् एव (नृपयुद्धं करोति)।

सप्ताहान्तः = दिनसप्तमध्ये, अविकृतसलिलनिपातै अविकृतस्य = अविकारस्य, सलिलस्य = जलस्य, निपातैः = पतनवशात्, सुभिक्षं = धनधान्यादीनां वृद्धिं, आदेश्यम् =

वक्तव्यम्। यत् च ग्रहणजं = ग्रहणजनितम् अशुभफलं, तत् सर्वं, नाशमुपयति = नश्यति इत्यर्थः।

व्याख्या – ग्रहणस्य मोक्षप्राप्त्यानन्तरं सप्तदिवसाभ्यन्तरे यदि पांशुवर्षणं रजोवर्षणं वा भवति तदा खाद्यान्नस्य अभावः दुर्भिक्षं च भवति। तथा यदि मोक्षस्य सप्ताहाभ्यन्तरे यदि हिमवर्षणं भवति तदा रोगभयं भवति। तथैव यदि भूकम्पनं भवति तदा प्रधाननृपस्य मृत्युः भवति।

यदि सप्तदिवसाभ्यन्तरे उल्कापातः भवति तदा मन्त्रिणः विनाशं करोति। विविध वर्णयुक्ताः मेघाः यदि दृश्यन्ते तदा अतिभयं कुर्वन्ति। यदि मेघशब्दः भवति तदा स्त्रीणां गर्भस्य अजातशिशोः वा विनाशकः भवति। यदि विद्युत् दृश्यते तदा राजा, सर्पसूकरादिभ्यः परिपीडां करोति।

यदि सप्तदिवसाभ्यन्तरे परिवेषः दृश्यते तदा रोगैः जनाः पीडिताः भवन्ति। सूर्यन्द्रयोः परितः मण्डलरुपा आकृतिः परिवेषः संज्ञया ज्ञायते। यदि दिग्दाहः दृश्यते तदा लोके नृपभयम् अग्निभयं च भवति। क्षितिजे यदि दिक्षुः दाहः दृश्यते तदा तस्य दिग्दाहः संज्ञा भवति। यदि रूक्षः प्रबलश्च वायुः मोक्षस्य सप्तदिवसाभ्यन्तरे दृश्यते तदा लोके तस्करोत्पन्नं भयं भवति अर्थात् चौरैः जनाः पीडिताः भवन्ति।

यदि ग्रहणस्य मोक्षानन्तरं सप्तदिवसाभ्यन्तरे निर्घातशब्दः भवति, इन्द्रधनुषः दर्शनं भवति अथवा दण्डस्य दर्शनं भवति तदा लोके क्षुद्भयं परचक्रभयसहितं दुर्भिक्षं च भवति। परचक्रं शब्दस्य आशयः भवति अन्येषाम् आधिपत्यं। यस्मिन् देशे मोक्षानन्तरम् एते उत्पाताः दृश्यन्ते तत्र शत्रोः आक्रमणम् आधिपत्यं च भवति। तत्र खाद्यान्नस्य अल्पताकारणात् जनाः पीडिताः भवन्ति। यदा पवनः पवनेन अभिहतः दीर्घशब्दाः भवन्ति तेषां निर्घात संज्ञा प्रदत्ता। यथोक्तं पवनः पवनाभिहतः इति। तथा रविकिरणजलदमरुतां च संयोगेन दण्डः वायुमण्डले परिदृश्यते। तस्यापि उत्पातरुपेण परिगणना कृता अस्ति।

पञ्चताराग्रहाणां परस्परं युद्धं भवति। ग्रहाणां चत्वारि युद्धानि भवन्ति– १. भेदः २. उल्लेखः ३. अंशुविमर्दनं ४. अपसव्यः। ग्रहयुद्धाध्याये विस्तरेण एतेषां विषये भवान् पठिष्यति। इत्येवं प्रकारेण मोक्षस्य सप्तदिवसाभ्यन्तरे उत्पातदर्शनस्य अशुभफलानि निर्दिष्टानि।

परन्तु निर्मलजलस्य यदि वृष्टिः भवति तदा शुभफलमपि वर्णितम्। ग्रहणकाले दशविधग्रासानां वर्णने भवता अशुभफलानि पठितानि, तथा दशविधामोक्षणां च अशुभफलानि पठितानि। यदि सप्तदिनाभ्यन्तरे निर्मलजलस्य वृष्टिः भवति तदा तेषां सर्वेषाम् अशुभफलानां नाशः करोति। तथा च लोके धनधान्यादिवृद्धिद्वारा सुभिक्षं भवति। वृद्धगर्गस्य मते च एतानि एव फलानि उत्पातानां विहितानि सन्ति–

अथेन्दुग्रहनिर्मुक्ते सप्ताहान्तर्भवेद्यदि।
पांशुवर्षोऽन्ननाशः स्यान्नीहारो रोगवृद्धये॥

नृपनाशाय भूकम्प उल्का मन्त्रिविपत्तये।
रोगाय परिवेषः स्याद्भयायैवाभ्रसम्प्लवः॥

विद्युद्गर्भविनाशाय दिग्दाहोऽग्निविवृद्धये।
निर्घातेन्द्रधनुर्दण्डा दुर्भिक्षाय भयाय च॥

पवनः प्रबलो रुक्षश्चौरोपद्रवसूचकः।
सर्वोपद्रवनाशः स्यात् सम्यग्वृष्टिभवेद्यदि॥

यद्राहुचरितं प्रोक्तं चन्द्रग्रहणहेतुकम्।
तदेव सकलं सूर्ये वेदितव्यं शुभाशुभम्॥

उत्पानां फलविवेचनानन्तरं चन्द्रग्रहणपश्चात् सूर्यग्रहणे सति किं फलं भवतीति विवेचितम्।

८.७ चन्द्रग्रहणानन्तरं सूर्यग्रहणस्य फलम्

यदि चन्द्रग्रहणानन्तरं पञ्चदशदिवसात्परतः सूर्यग्रहणस्य फलं वराहमिहिराचार्येण एवं विहितम्–

सोमग्रहे निवृत्ते पक्षान्ते यदि भवेद् ग्रहोऽर्कस्य।
तत्रानयः प्रजानां दम्पत्योर्वैरमन्योन्यम्॥

अन्वयः – सोमग्रहे निवृत्ते पक्षान्ते यदि अर्कस्य ग्रहो (भवति) तत्र प्राजानाम् अनयः दम्पत्योः अन्योन्यं वैरं (भवति)

प्रतिपदार्थ – सोमग्रहे = चन्द्रग्रहणे, निवृत्ते = अतीते, पक्षान्ते = पञ्चदशदिनात् परतः, यदि, अर्कस्य = सूर्यस्य, ग्रहो = ग्रहणं (भवति) तत्र = तस्मिन्, प्राजानां = लोकानां, अनयः = दुर्नयो अनीतिः वा, दम्पत्योः= पत्निपत्योः, अन्योन्यं = परस्परं, वैरं = द्वेषः भवति।

व्याख्या – यदि चन्द्रग्रहणस्य निवृत्यानन्तरं पक्षान्ते यदि सूर्यग्रहणं भवति तदा लोकानाम् अनीतिः वर्धते। अर्थात् जनाः नीतिमार्गं सदाचारं च त्यक्त्वा नीतिविरुद्धं कार्यं कुर्वन्ति। तथा च पतिपत्न्योर्मध्ये वैरं भवति। परिवारे जायापत्योः परस्परं वैरं भवति।

यदि सूर्यग्रहणानन्तरं चन्द्रग्रहणं भवति तदा तस्यापि फलम् अग्रे विहितम्।

८.८ सूर्यग्रहणानन्तरं चन्द्रग्रहणस्य फलम्

यदि सूर्यग्रहणानन्तरं पञ्चदशदिनान्ते चन्द्रग्रहणं भवति शुभफलमेव ग्रन्थे विहितम्–

अर्कग्रहात्तु शशिनो ग्रहणं यदि दृश्यते ततो विप्राः।
नैकक्रतुफलभाजो भवन्ति मुदिताः प्रजाश्चैव॥

अन्वयः – अर्कग्रहात् तु (पक्षान्ते) यदि शशिनो ग्रहणं दृश्यते ततो विप्राः नैकक्रतुफलभाजो भवन्ति (तथा) प्रजाः च मुदिताः (भवन्ति) एव।

प्रतिपदार्थ – अर्कग्रहात् = आदित्यग्रहणानन्तरं (पक्षान्ते) यदि शशिनो = चन्द्रस्य, ग्रहणं, दृश्यते = अवलोक्यते। तदा विप्राः = ब्राह्मणाः, नैकक्रतुफलभाजोनैकानां = बहूनां क्रतूनां = यज्ञानां, फलभागिनो = फलभोक्तारः भवन्ति (तथा) प्रजाः = जनाः च मुदिताः = हर्षिताः (भवन्ति) एव = निश्चयार्थकः

व्याख्या – यदि सूर्यग्रहणानन्तरं पञ्चदशदिवसान्ते चन्द्रस्य ग्रहणं दृश्यते तदा ब्राह्मणाः बहूनां यज्ञानां सम्पादनं कुर्वन्ति। तथा यज्ञानां फलभागिनः भवन्ति। प्रजाः च हर्षिता भवन्ति। धनधान्यादीनां वृद्धि, सुवृष्टिः, राज्ञां सन्तोषः च भवति।

बोधप्रश्नाः

८. कस्यां दिशि दक्षिणहनुसंज्ञकः मोक्षः भवति?

९. दक्षिणकुक्षिसंज्ञकः मोक्षः कदा भवति?

१०. सञ्छर्दनमोक्षे किं फलं भवति?

११. बिम्बस्य पर्यन्तेषु विमलत्वे सति कः मोक्षः भवति?

१२. भास्करस्य मोक्षे कः विशेषः?

१३. मोक्षस्य सप्ताहाभ्यन्तरे भूकम्पस्य किं फलं भवति!

१४. सूर्यग्रहणानन्तरं पक्षान्ते चन्द्रग्रहणस्य फलं किम्?

८.९ सारांशः

प्राचीनाचार्यैः ग्रहणविषये अत्यन्तसूक्ष्मेक्षिकया शोधकार्यं कृतमिति राहुचाराध्यायः पठनेन भवता ज्ञातम्। ग्रहणस्य मानवजीवने प्रभावः भवतीति च ज्ञातवान्। ग्रहणस्य प्रभावं दृष्ट्वा एव भारतवर्षे सिद्धान्तज्योतिषाचार्यैः सूर्यचन्द्रयोः ग्रहणकालनिर्धारणे महानतमः प्रयासः कृतः। तथा च ग्रहणस्य सूक्ष्मकालनिर्धारणे ग्रहणस्य प्रमाणस्य सूक्ष्मगणनायां ते समर्थाः अभूवन्। तेषां सूक्ष्मदृष्ट्याः परिचयः पाठेऽस्मिन् प्राप्तः। सूर्यचन्द्रयोः ग्रहणे अन्येषां ग्रहाणां युतिवशात् ते ग्रहाः अपि ग्रस्ताः भवन्ति। अतः भौमादिग्रहाणां ग्रासवशात् केषां प्रदेशानां जनानां, केषां वस्तूनां च विनाशः भवतीति पाठेऽस्मिन् पठितम्। तदनन्तरं द्वादशमासेषु ग्रहणस्य फलानि च पठितानि। तत्रापि विविधप्रदेशेषु जनानां विनाशः, विविधजातिविशेषाणां विनाशः, विविधवस्तूनां च विनाशः भवति। परन्तु केषुचित् मासेषु ग्रहणस्य शुभफलं च भवति। पूर्वस्मिन् पाठे दशविधमोक्षाः पठिताः। तेषां नामानि एवं सन्ति–

१. दक्षिणहनुमोक्षः
२. वामहनुमोक्षः
३. दक्षिणकुक्षिमोक्षः
४. वामकुक्षिमोक्षः
५. दक्षिणपायुमोक्षः
६. वामपायुमोक्षः
७. सञ्छर्दनमोक्षः
८. जरणमोक्षः
९. मध्यविदरणमोक्षः
१०. अन्त्यविदरणमोक्षः।

एतेषां लक्षणं फलञ्च पठितम्। सूर्यस्य ग्रासः मोक्षञ्च चन्द्रस्य ग्रासमोक्षयोः विपरीतदिशि भवति। अतः वर्णितदशमोक्षेषु सूर्यस्य मोक्षे विपरीतदिशा ज्ञेया। तदनन्तरं मोक्षस्य सप्ताहाभ्यन्तरे उत्पातानां दर्शनवशात् अशुभफलानि पठितानि। परन्तु यदि निर्मलजलस्य वृष्टिः भवति तदा पूर्वपठितानां मोक्षाणाम् अशुभफलानां विनाशः भवति। चन्द्रग्रहणानन्तरं पञ्चदशदिवसान्ते सूर्यग्रहणे सति अशुभफलं तथा सूर्यग्रहणस्य पञ्चदशदिवसान्ते चन्द्रग्रहणे सति शुभफलानि भवन्ति। इत्येवं प्रकारेण ग्रहणसंबंधिताः विषयाः भवता विस्तरेण पठिताः।

८.१० शब्दावली

१. क्षितिसुतः = पृथिव्याः पुत्रः, भौमः।

२. अनलोपजीविनः = अग्निना येषाम् आजीविका भवति ते लौहकार-सुवर्णकारपाचकप्रभृतयः।

३. सुभिक्षं = भिक्षाणां समृद्धि अर्थात् यस्मिन् काले जनाः भिक्षादाने समर्थाः भवन्ति। धनधान्यादीनां वृद्धिः।

४. दुनोति = सन्तापयति।

५. धनुष्कराः = शिल्पिनः।

६. निगमाः = वेदपाठकाः।

७. कापसि = येन तन्तूनां निर्माणं भवति। हिन्दीभाषायां 'कपास'।

८. निषादाः = प्राणिघातकः वन्यवासिनः जनाः।

९. मण्डलवर्षे = विचित्रवृष्टिः, क्वचित् भवति क्वचित् न भवति।

१०. एकशफान् = पादे येषां शक नाम्ना अङ्गुली भवति ते अश्वाः गर्दभाः।

११. शल्यहृत् = व्रणचिकित्सकः।

१२. मुखरुक् = मुखसंबंधिताः रोगाः।

१३. अपसर्पेत = गमनं करोति।

१४. पांशुवर्षणं = रजोवर्षणं।

१५. दंष्ट्रिण = दंशं कुर्वन्ति ते प्राणिनः, सर्पादयः।

१६. क्रतुः = यज्ञः।

८.११ सन्दर्भग्रन्थाः

१. बृहत्संहिता, आचार्यवराहमिहिरविरचिता, चौखम्बासंस्कृत प्रतिष्ठान, नई दिल्ली।

८.१२ सहायकग्रन्थाः

१. बृहत्संहिता, भट्टोत्पलटीकासहिता समपूर्णानन्दसंस्कृतविश्वविद्यालय, वाराणसी।

२. बृहत्संहिता, व्याख्या– सुरेशचन्द्रमिश्र रंजनं पब्लिकेशन, नई दिल्ली।

८.१३ बोधप्रश्नोत्तराणि

१. अवन्तिदेशस्य जनाः, कावेरीनद्याः, नर्मदानद्याः च तटवर्तीप्रदेशस्य निवासिनः।

२. शुक्रग्रहस्य।

३. ग्रहणकाले शनैश्चरे ग्रस्ते सति।

४. पुण्ड्रदेशस्य जनैः सह काश्मीरदेशस्य कौशलदेशस्य च निवासिनः पीडिताः भवन्ति।

५. माघमासे ग्रहणे सति।

६. आषाढमासे।

७. भाद्रपदमासे ग्रहणे सति बाह्लीकाः पीडिताः भवन्ति।

८. आग्नेय्यां दिशि।

९. दक्षिणभागेन यदि ग्रहणनिवृतिः भवति तदा दक्षिणकुक्षिसंज्ञकः मोक्षः भवति।

१०. लोकस्य कल्याणप्रदः, सस्यप्रदः, तुष्टिप्रदः च भवति।

११. अन्त्यविदरणसंज्ञकः मोक्षः।

१२. चन्द्रस्य मोक्षाणां विपरीतदिशि सूर्यस्य मोक्षाः भवन्ति

१३. प्रधाननृपस्य मृत्युः।

१४. ब्राह्मणां बहूनां यज्ञानां फलभागिनः भवन्ति, प्रजाः च हर्षिताः भवन्ति।

८.१४ अभ्यासप्रश्नाः

१. बुधजीवयोः ग्रस्तफलं लिखत।

२. चैत्रवैशाखमासयोः ग्रहणफलं लिखत।

३. ज्येष्ठाषाढमासयोः ग्रहणफलं लिखत।

४. जरणसञ्छर्दनमोक्षयोः लक्षणं फलञ्च लिखत।

५. वामकुक्ष्यादीनां त्रयाणां मोक्षाणां लक्षणं लिखत।

६. मोक्षात् दिनाभ्यन्तरे दृष्टानाम् उत्पातानां फलानि विवेचयत।

७. सूर्यग्रहणानन्तरं पक्षान्ते चन्द्रग्रहणस्य फलं लिखत।

◆

नवमः पाठः (भौमचारः)

पाठसंरचना

९.१ प्रस्तावना
९.२ उद्देश्यम्
९.३ उष्णमुखमङ्गलस्य लक्षणं तत्फलञ्च
९.४ अश्रुमुखमङ्गलस्य लक्षणं तत्फलञ्च
९.५ अश्रुमुखमङ्गलस्य लक्षणं तत्फलञ्च
९.६ रुधिराननभौमस्य लक्षणं तत्फलञ्च
९.७ असिमुशलं, भौमलक्षणं तत्फलञ्च
बोधप्रश्नाः
९.८ नक्षत्रेषु सञ्चरणात् भौमस्य विशेषयोगफलम्
  ९.८.१ भौमसंचारात् प्रथमविशेषयोगफलम्
  ९.८.२ भौमसंचारात् द्वितीयविशेषयोगफलम्
  ९.८.३ भौमसंचारात् तृतीयविशेषयोगफलम्
  ९.८.४ भौमसंचारात् चतुर्थविशेषयोगफलम्
  बोधप्रश्नाः
  ९.८.५ भौमसंचारात् पञ्चमविशेषयोगफलम्
  ९.८.६ भौमस्य नक्षत्रसंचारवशात् मेघनाशकयोगाः
  ९.८.७ भौमस्य नक्षत्रसंचारवशात् शुभफलम्
९.९ भौमस्य वर्णवशात् फलम्
बोधप्रश्नाः
मूलपाठः
९.१० सारांशः
९.११ शब्दावली
९.१२ सन्दर्भग्रन्थाः
९.१३ बोधप्रश्नोत्तराणि
९.१४ अभ्यासप्रश्नाः

९.१ प्रस्तावना

प्रियच्छात्र! बृहत्संहितायाः पाठेऽस्मिन् भवान् पूर्वपाठे राहुचारानुसारेण तस्य लक्षणस्य फलस्य च विषये पठितवान्। तत्र राहोः ग्रहणकालिकं दशग्रासानां लक्षणं फलं तथा दशमोक्षणां लक्षणं फलञ्च पठितवान्। इदानीं षष्ठपाठेऽस्मिन् भौमचारस्य लक्षणं फलञ्च पठिष्यति। भौमः इत्युक्ते भूमेः पुत्रः भौमः। चारस्यार्थं चलनम् गतिश्चेति। अर्थात् यथा यथा भूमिपुत्रः द्वादशराशीनां भोगं करोति तथा तथा आकाशे तस्य स्वरूपः दृश्यते, तस्य स्वरूपस्य लक्षणं फलञ्च भौमचाररूपेण कथ्यते। अतः भौमचारस्य लक्षणं फलञ्च विषयेऽस्मिन् पराशर-गर्गादिमुनीनां मतमत्र भवान् पठिष्यति। पाठेऽस्मिन् भौमस्य पञ्चमुखानि कथ्यन्ते। तद्यथा-

उष्णमश्रुमुखं व्यालं रुधिराननमेव च।
निस्त्रिंशमुशलं चेति पञ्चवक्त्राणि भूसुते।

अर्थात् १. उष्णमुखभौमः, २. अश्रुमुखभौमः, ३. व्यालमुखभौमः, ४. रुधिराननभौमः, ५. असिमुशलमुखभौमश्चेति पञ्चमुखानि। अत्र भवान् एतेषां लक्षणानि सफलानि पठिष्यति। अनन्तरं भौमस्य विषेशयोगान् ज्ञात्वा तस्य फलं ज्ञातुं प्रभविष्यति। तदुपरान्तं भौमस्य संचारवशात् शुभाशुभफलं, वर्णवशात् च शुभाशुभफलं ज्ञातुं शक्ष्यति।

९.२ उद्देश्यम्

इमं पाठं पठनेन भवान् –

- बृहत्संहिताग्रन्थे वर्णितं भौमचाराध्यायस्याध्यनं करिष्यति।
- भौमस्य उष्णमुख-अश्रुमुख-व्यालमुख-रुधिरानन-असिमुसलमुखानि पञ्चलक्षणानि ज्ञातुं प्रभविष्यति।
- एतेषां पञ्चमुखानां मङ्गलानां फलानि ज्ञातुं शक्ष्यति।
- भौमस्य योगविषयकं ज्ञानं तथा तस्य फलविषयकं ज्ञानं प्राप्सयति।
- भौमस्य संचारवशात् शुभाशुभफलज्ञानं प्राप्सयति।
- भौमस्य वर्णवशात् च शुभाशुभफलं ज्ञातुं शक्ष्यति।

९.३ उष्णमुखमङ्गलस्य लक्षणं तत्फलञ्च

अत्र मङ्गलस्य उदयनक्षत्रात् अस्तनक्षत्रात् वा वक्रगतिं दृष्ट्वा पञ्चविधमङ्गलानां लक्षणमालोच्यते। ग्रहः कदा वक्री भवति इति प्रश्नस्य समाधानाय उच्यते-यदा ग्रहः अग्रनक्षत्रं न गत्वा पश्चान्नक्षत्रं प्रति आगच्छति तदा ग्रहस्य वक्रत्वम्। अर्थात् श्वस्तनग्रहराश्यादितः अद्यतनग्रहराश्यादिमानं-अधिकं भवति चेत् ग्रहः वक्री भवति। यथा ग्रहाणां वक्रगतित्वे कारणं सूर्यसिद्धान्ते उच्यते–

दूरस्थितः स्वशीघ्रोच्चाद् ग्रहः शिथिलरश्मिभिः।
सव्येत्तराकृष्टतनुर्भवेद् वक्रगतिस्तदाः॥ (सू.सि.स्प.अ.श्लो.-५२)

कश्चिदपि ग्रहो यदा स्वशीघ्रोच्चाद् त्रिभाधिकान्तरे अर्थात् स्वशीघ्रनीचोन्मुखो गच्छति तदा शिथिलरश्मिभिः वामभागस्तत्राकृष्टा वक्रगतिः भवति। वस्तुतः सर्वएव ग्रहाः स्वस्वकक्षासु क्रमगतिका एव। परन्तु सूर्यमभितो गच्छन्तो भूवासिजनैः कदाचिद् ग्रहाः वक्रत्वमापन्नाः दृश्यन्ते। अनन्तरं ग्रहः कदा अस्तं गच्छति? कदा उदयं गच्छति? इत्यनयोः प्रश्नयोः समाधानाय उच्यते-सूर्यसान्निध्यात् ग्रहस्य अदर्शनवशात् अस्तत्वम्। सूर्याद्दूरे अस्तमयत्वं यच्च तस्मादन्तरिते ग्रहदर्शने उदयत्वम्।

कथितेषु पञ्चविधमङ्गलेषु उष्णमुखभौमः प्रथमः वर्तते। अत्र अस्य उष्णमुखभौमस्य लक्षणं फलञ्च वराहमिहिरेण सम्यक्तया लिखितम्। तद्यथा–

यद्युदयार्क्षद्वक्रं करोति नवमाष्टसप्तमेषु।
तद्वक्रमुष्णमुदये पीडाकरमग्निवार्त्तानाम्॥१॥

अन्वयः – यदि (भौमः) उदयार्क्षाद् नवमाष्टसप्तमेषु वक्रं करोति (तर्हि) तद् वक्रमुष्णमुदये अग्निवार्त्तानां पीडाकरम् (भवति)।

प्रतिपदार्थः – यदि = भौमः, उदयार्क्षाद् = यदि उदयनक्षत्रात्, नवमाष्टसप्तमेषु = नवमस्थाने अष्टमस्थाने सप्तमस्थाने वा, वक्रं = वक्रगतिं, करोति = प्राप्नोति, तर्हि तद्वक्रम् = सः वक्रगतिकः भौमः, उष्णमुदये = तस्य संज्ञा उष्णमुखः, सः अग्निवार्त्तानाम् = अग्निना ये आजीविका निर्वहन्ति तेषां कृते, पीडाकरम् = पीडामुत्पादयति।

व्याख्या – भो छात्र! भूमिपुत्रः मङ्गलः यस्मिन् नक्षत्रे उदेति तस्मात् सप्तमनक्षत्रे अष्टमनक्षत्रे नवमनक्षत्रे वा गत्वा यदि वक्रं गच्छति तर्हि सः मङ्गलः उष्णमुखनाम्ना कथ्यते।

आकाशे दृश्यमानस्य उष्णमुखभौमस्य फल यथा– ये अग्निना आजीविका निर्वहन्ति ते तस्मिन् काले महत्कष्टस्य भोगं कुर्वन्ति। अर्थात् उष्णमुखभौमलक्षणं विलक्षिते तदा लौहकार:, स्वर्णकार:, अग्निर्वापकवाहिन्य:, सैनिकाश्च पीडां प्राप्नुवन्ति।

लक्षणम् – यस्मिन् नक्षत्रे स्थित: मङ्गल: आदित्यमण्डलादुदयं करोति। तदुदयनक्षत्रात् सप्तम-अष्टम-नवमनक्षत्रे वा यदि वक्रं प्रति गमनं करोति तर्हि तद्वक्रम् उष्णं नाम।

फलम् – तदा ये अग्निना जीविका निर्वहन्ति ते सुवर्णकारलोहकारादय: तदानीं कष्टं पीडां च प्राप्नुवन्ति।

वि.द्र. – वक्रादनन्तरं यदाऽर्कमण्डले अस्तेष्यधति तदैतत्फलमेषां सर्वेषां ज्ञेयम्। तथा च वृद्धगर्गेण उच्यते–

उदयात् नवमे कुर्यादष्टमे सप्तमेऽपि वा।
निवृतिं लोहिताङ्गस्तु तदुष्णं वक्त्रमुच्यते।
नरोऽग्निजीविनो ये च पचन्ति च दहन्ति च।
तेषामुत्पद्यते तापो जायते धनसंक्षय:॥

९.४ अश्रुमुखमङ्गलस्य लक्षणं तत्फलञ्च

कथितेषु पञ्चविधमङ्गलेषु उष्णमुखभौम: प्रथम: वर्तते। तदनन्तरं द्वितीयमङ्गल: अश्रुमुखभौम इत्युच्यते। विषयेऽस्मिन् वराहमिहिरेण लक्षणं फलञ्च लिखितम्। तद्यथा–

द्वादशदशमैकादशनक्षत्राद्वक्रिते कुजेऽश्रुमुखम्।
दूषयति रसानुदये करोति रोगानवृष्टिं च॥२॥

अन्वय: – यदि द्वादशदशमैकादशनक्षत्रात् कुजे वक्रिते अश्रुमुखम् इति। तच्च उदये रसान् दूषयति रोगान् अवृष्टिं च करोति।

प्रतिपदार्थ: – द्वादशदशमैकादशनक्षत्रात् = उदयनक्षत्रात् द्वादशनक्षत्रे, दशमनक्षत्रे, एकादशनक्षत्रे वा कुजे = भौमे वक्रिते = वक्रं गते, अश्रुमुखम् = अश्रुमुखसंज्ञक: मङ्गल: भवति। तच्चोदये रसान् = मधुराम्ललवणतिक्तकटुकषायान्, दूषयति = प्रदूषणं कृत्वा सदोषान् करोति, एवं रोगान् = दुष्टरसान् भक्षणमात्रात् पीडामुत्पादयन्ति। तथा अवृष्टि: = वृष्टिहीनं च करोति।

व्याख्या – यदि कुज: उदयनक्षत्रात् दशमे, एकादशे, द्वादशनक्षत्रे वा गत्वा वक्री भवति तर्हि स: अश्रुमुखभौम इति कथ्यते। अनेन लक्षणेन युक्त: भौम: संसारस्य मधुराम्ललवणतिक्तकटुकषायान् प्रत्येकरसान् दोषयति अर्थात् प्रदुषणं करोति। ते च दुष्टरसान् नराणां भक्षणमात्रात् पीडामुत्पादयन्ति। तथा अवृष्टिम् इत्युक्ते वृष्टि: न पतति। अर्थात् वृष्टिहीनतापि परिलक्षते।

लक्षणम् – यदि कुज: उदयनक्षत्रात् दशमे, एकादशे, द्वादशनक्षत्रे वा गत्वा वक्री भवति अर्थात् विलोमं गच्छति तर्हि स: अश्रुमुखभौम इति कथ्यते।

फलम् – दृश्यमाने अस्मिन् लक्षणे कुज: संसारस्य रसान् प्रदूषणं करोति। एवं वृष्टिहीनतापि परिलक्षते।

वि.द्र. – गर्गमुनिमतेन अश्रुमुखमङ्गलस्य दर्शने पर्जन्यो दूषयित्वा वर्षति। तेन कारणेन शुभरसान् दूषिता: भवन्ति। विषयेऽस्मिन् गर्गमुनिनाह–

दशमैकादशे वापि द्वादशे वापि वक्रिते।
लोहिताङ्गे ग्रहे ज्ञेयं वक्त्रमश्रुमुखं च तत्॥

तत्र वर्षति पर्जन्यो दूषयित्वा शुभान् रसान्।
ते दुष्टा दूषयन्त्याशु नृणां धातून् तथा भृशम्॥

बहवो व्याधयः क्रूरा उत्पद्यन्ते शरीरिणाम्।
बहुभिः कारणैरेतैस्ततो लोकः प्रलीयते॥

९.५ अश्रुमुखमङ्गलस्य लक्षणं तत्फलञ्च

अश्रुमुखभौमस्यधानन्तरं व्यालमुखभौमः भवति। विषयेऽस्मिन् वराहमिहिरेणोक्तम् यथा–

व्यालं त्रयोदशर्क्षाच्चतुर्दशाद्वा विपच्यतेऽस्तमये।
दंष्ट्रिव्यालमृगेभ्यः करोति पीडां सुभिक्षं च॥

अन्वयः – यदि (भौमः) त्रयोदशचतुर्दशार्क्षात् वा अस्तमये विपच्यते व्यालम्। दंष्ट्रिव्यालमृगेभ्यः पीडां सुभिक्षं च करोति।

प्रतिपदार्थः – यदि भौमः, त्रयोदशर्क्षाच्चतुर्दशाद्वा = त्रयोदशनक्षत्रात्, चतुर्दशनक्षत्रात् वा, वक्रीते व्यालं नाम वक्रम्। अस्तमये = यस्मिन् काले भौमोऽर्कमण्डले पुरस्तादस्तमेति, तदा विपच्यते = तत्र परिपाकमायिति। व्यालं = व्यालनामकमङ्गल इति। तदा दंष्ट्रिणः = सूकरकुक्कुरादयः, व्यालाः = सर्पाः, मृगाः = आरण्यजातयः। तेभ्यः = श्वानशृगालमृगादि- प्राणिसकाशात्, पीडां करोति = कष्टं जायते। च = एवं, तत्र सुभिक्षं = खाद्यसस्यसम्पत्तिमाधिक्यं भवति।

व्याख्या – यदि भौमः उदयापेक्षयधा अस्तनक्षत्रात् त्रयोदशनक्षत्रात् चतुर्दशनक्षत्रात् वा गत्वा वक्रिते व्यालं नाम वक्रम्। तच्च अस्तमये विपच्यते। अर्थात् यस्मिन् काले भौमोऽर्कमण्डले पुरस्तादस्तमेति तदा तत्र सः परिपाकमायिति। इत्येव व्यालनामकमङ्गलस्य लक्षणम्। तदा दंष्ट्रिणः सूकरकुक्कुरादयः, व्यालाः सर्पजातयः सरिसृपाः, मृगाः आरण्यजातयः। तेभ्यः श्वानशृगालमृगादिप्राणिसकाशात् पीडा जायते। एवं च संसारे सुभिक्षं खाद्यसस्यसम्पत्तिमाधिक्यं भवति। तथा च गर्गः –

त्रयोदशे च नक्षत्रे यदि वापि चतुर्दशे।
निवृत्तिं कुरुते भौमस्तद्वक्त्रं व्यालमुच्यते॥

भवन्ति प्रचुरा व्यालास्तेभ्यो लोकभयं वदेत्।
नृपाणामशुभं विन्द्यात् सस्यसम्पत्तिमादिशेत्॥

९.६ रुधिराननभौमस्य लक्षणं तत्फलञ्च

व्यालमुखभौमस्यनन्तरं चतुर्थभौमस्य नाम भवति रुधिराननम्। तस्य लक्षणं फलं च वराहमिहिराचार्येण स्वग्रन्थे उच्यते यथा–

रुधिराननमिति वक्रं पञ्चदशात् षोडशाच्च विनिवृते।
तत्काले मुखरोगं सभयं च सुभिक्षमावहति॥

अन्वयः – (भौमः) पञ्चदशात् षोडशनक्षत्रात् च वक्री विनिवृते रुधिराननम् इति। तत्काले मुखरोगं सभयं सुभिक्षं च आवहति।

प्रतिपदार्थः – यदि भौमः उदयापेक्षया अस्तनक्षत्रात्, पञ्चदशात् = पञ्चदशनक्षत्रात् षोडशाच्च = तथैव षोडशनक्षत्रात् वा, वक्री = विलोमगतिं विनिवृते = प्राप्नोति चेत् रुधिराननमिति = रुधिराननसंज्ञकः भौमोच्यते। तत्काले = तस्मिन् रुधिराननभौमदर्शनकाले, मुखरोगं = वक्त्रपीडितं, सभयं = भयेन सहितं, सुभिक्षमावहति = खाद्यसामग्र्यः उत्पादयति।

व्याख्या – प्रियच्छात्र् अत्र भौमस्य चतुर्थलक्षणं तथा फलं विषये कथ्यते- यदा भौमः उदयापेक्षया अस्तनक्षत्रात् पञ्चदशनक्षत्रे वा षोडशनक्षत्रे गत्वा वक्री भवति तदा रुधिराननमिति लक्षणं कथ्यते। तस्य फलं यथा – जनानां मुखे नानारोगाः भवन्ति। पुनः जनानां मनसि भयं जायते। अत्र जनाः भयेन सहितमपि खाद्यसामग्र्यः उत्पादयन्ति। यथा कुफलेनापि सुफलं भवति तथा संसारे भिक्षायाः अभावः न परिलक्षते। अर्थात् खाद्यशस्यादिनाम् उत्पादनम् अधिकं भवति।

लक्षणम् – यदा भौमः स्वास्तात्नक्षत्रात् पञ्चदशे वा षोडशनक्षत्रें गत्वा वक्री भवति तदा रुधिराननमिति लक्षणं कथ्यते।

फलम् – तेन कारणेन जनानां मुखे व्रणादिकं नानारोगाः भवन्ति। पुनः मनसि भयं जायते। अर्थात् नानाशङ्काभिः युक्तः मानवः सुभिक्षमावहति। गर्गस्य मतं यथा–

यदि पञ्चदशर्क्षे भूसुतः षोडशापि वा।
निवृत्तिं कुरुते वक्रस्तद्विदुर्लोपिताननम्॥

दीप्तिमन्तः पार्थिवाश्च भवन्ति प्रथिता भुवि।
क्षत्रकोपश्च सुमहान् मुखरोगाः भवन्ति च॥

९.७ असिमुशलं भौमलक्षणम् तत्फलम्

रुधिराननभौमस्यानन्तरं पञ्चमभौमस्य नाम भवति असिमुशलम्। तस्य लक्षणं तथा फलं वराहमिहिरेणोक्तम् यथा –

असिमुशलं सप्तदशादष्टादशतोऽपि वा तदनुवक्रे।
दस्युगणेभ्यः पीडां करोत्यवृष्टिं सशस्त्रभयम्॥

अन्वयः – यदा भौमः, सप्तदशाष्टादशतो वा तद्नुवक्रे असिमुशलं (कथ्यते)। (तत्काले) दस्युगणेभ्यः पीडां अवृष्टिं सशास्त्रभयं च करोति।

प्रतिपदार्थः – अस्तनक्षत्रात्, सप्तदशादष्टादशतोऽपि = सप्तदशनक्षत्रे अदष्टादशनक्षत्रे वा, अपि गत्वा, तदनुवक्रे = ततः अनुवक्रे कुजे, असिसमुसलं = असिमुशलं नामकं भवति। तदा, दस्युगणेभ्यः = चौरादिदुर्जनेभ्यः पीडा = कष्टं जायते। अवृष्टिं = वृष्टिमपि न करोति, सशस्त्रभयम् = अस्त्रघातजनितं भयं जायते।

व्याख्या – लक्षणम्- यदि भूमिपुत्रः सप्तदशे-अष्टादशे वा स्थाने गत्वा वामनक्षत्रं प्रति गच्छति तर्हि असिमूशललक्षणं कथ्यते। फलम्- आकाशे दृश्यमान असिमुशलभौमः चौराणां कृते पीडां ददाति। कष्टमपि भवति तथा अवृष्टिं वा वृष्टि न करोति। जनानां कृते अस्त्रभयं परिदृश्यते। यथा कस्यापि आक्रमणभयं परिलक्षते। विस्फोटकादिभिः भयं परिलक्ष्यते। तथा च गर्गः–

सप्तादशेऽष्टादशे वा लोहिताङ्ग निवर्तिते।
नास्त्रिंशमूशलं नाम तद्वक्त्रं परिकीर्तितम्॥

पशुपुत्रधनं धान्यमाहरन्ते तु दस्यवः।
प्राणिनां जीवनं हन्ति जायते शस्त्रसम्भ्रमः॥

पराशरस्य मतेन–

सप्तदशेऽष्टादशे वा दस्युगणैः प्रजानामुपद्रवमवृष्टिं शस्त्रभयं च॥

बोधप्रश्नाः

१. भौमस्य कतिलक्षणानि भवन्ति?

२. भौमस्य द्वितीयलीक्षणस्य नाम किम्?

३. रुधिराननभौमलक्षणं कदा भवति?

४. व्यालमुखभौमस्य फलं किम्?

९.८ नक्षत्रेषु सञ्चरणात् भौमस्य विशेषयोगफलम्

प्रियच्छात्र:! भवान् पूर्वश्लोकेषु उष्णमुख-अश्रुमुख-व्यालमुख-रुधिरानन-असिमुसलमुखानि इत्यादि पञ्चविधमङ्गलानां लक्षणं फलञ्च पठितवान्। इदानीमत्र मङ्गलस्य उदयनक्षत्रात् अस्तनक्षत्रात् वा वक्रगतिं दृष्ट्वा लक्षणं फलञ्चालोच्यते। रविमण्डलसन्निधौ अस्तं गच्छति भौमः, रविमण्डलनिर्गते उदयं गच्छति भौम इति। अतोऽत्र भवान् नक्षत्रेषु सञ्चारवशात् भौमस्य विशेषयोगस्य फलविषये पठिष्यते। विषयेऽस्मिन् वराहमिहिर- पराशर-गर्गादिमुनीनां मतमपि ज्ञातुं शक्ष्यति।

९.८.१ भौमसंचारात् प्रथमविशेषयधोगफलम्

भाग्यार्यामोदितो यदि निवर्तते वैश्वदैवते भौमः।
प्राजापत्येऽस्तमितस्त्रीनामपि लोकान्निपीडयति॥

अन्वयः – भाग्यार्यामोदितो भौमः यदि वैश्वदैवते निवर्तते तथा प्रजापत्ये अस्तमितः तदा त्रीलोकान अपि निपीडयति।

प्रतिपदार्थः – भाग्यं = पूर्वाफाल्गुनीनक्षत्रे, अर्यामा = उत्तराफाल्गुनीक्षत्रे, उदितो = रविमण्डलनिर्गतो भवति, भौमः = मङ्गलः, यदि वैश्वदैवते = उतराषढानक्षत्रे, गत्वा निवर्तते = वक्रं करोति, तथा प्रजापत्ये = रोहिणीनक्षत्रे अस्तमितः = अस्तं गच्छति, तदा त्रिलोकान् = स्वर्ग-मर्त्य-पातालान् (भूर्भुवःस्वराख्यांल्लोकान्) प्रत्येकजीवनजन्तुदेवताराक्षासानपि पीडयति = कष्टमुत्पादयति।

व्याख्या – यदि भाग्यं इत्युक्ते पूर्वाफाल्गुनीनक्षत्रे, अर्यामा इत्युक्ते उत्तराफाल्गुनीनक्षत्रे वा उदितो भौमः (अर्थात् रविमण्डलनिर्गतो भवति)। अग्रतो गत्वा वैश्वदैवते इत्युक्ते उतराषढानक्षत्रे वक्रं करोति। पुनरपि सः यदि प्रजापत्ये इत्युक्ते रोहिणीनक्षत्रे अस्तं गच्छति तर्हि भौमः अशुभ इति। सः अशुभभौमः स्वर्ग-मर्त्य-पातालत्रिलोकान् (भूर्भुवःस्वराख्यांल्लोकान्) पीडयति। अर्थात् देवताभ्यो-मनुष्येभ्यो-असुरेभ्यो प्रत्येकजीवजन्तु-देवताराक्षासानपि कष्टमुत्पादयति। तथा च पराशरमतेन–

श्रवणोदितस्य वक्रं पुष्ये मूर्धाभिषिक्तपीडाकृत्।
यस्मिन्नृक्षेऽभ्युदितस्तदिग् व्यूहान् जनान् हन्ति॥

अन्वयः – यदि श्रवणोदितस्य पुष्ये वक्रं (तर्हि) पीडाकृत् मूर्धाभिषिक्तानां। यस्मिन्नृक्षेऽभ्युदितः तत् दिग् व्युहान् जनान् हन्ति।

प्रतिपदार्थः – यदि श्रवणोदितस्य = श्रवणनामकनक्षत्रे उदितस्य भौमस्य। अग्रे गत्वा पुष्ये वक्रं = पुष्यनक्षत्रे अग्रे गमनमार्गात् वामं प्रति गच्छति। तदा पीडाकृत् = भौमः कष्टप्रदायकः भवति, मूर्धाभिषिक्तानां = राज्ञेभ्यः पीडां करोति। यस्मिन्नृक्षे = यस्मिन् नक्षत्रे, अभ्युदितः = उदित भवति, तदिग् = नक्षत्रस्य या दिक्। व्यूहान् जनान् = नक्षत्रकूर्मोक्ता व्यूहान् लोकन्, हन्ति = घातयन्ति।

व्याख्या – यदि श्रवणनामकनक्षत्रे उदितः भौमः अग्रे गत्वा पुष्यनक्षत्रे वक्रं प्रति गच्छति, तदा सः भौमः मूर्धाभिषिक्तानां राज्ञां कष्टप्रदायको भवति। तत्र सूर्यमण्डलस्थो यस्मिन्नक्षत्रे स्थितोः सः यस्मिन् नक्षत्रे उदितो भवति, तस्य नक्षत्रस्य या दिक् सा दिक् नाशयति। अर्थात् नक्षत्रकूर्मोक्ता व्यूहान् जनान् हन्ति। अर्थात् नक्षत्रोदितायां दिशायां यधे निवासं कुर्वन्ति तत्रत्यानां जनानां तथा राज्ञामपि सः भौमः कष्टं प्रयच्छति। पराशरस्य मतेन–

उदितः श्रवणो भौमः पुष्ये वक्रं चरेद्यदि।
मूर्द्धाभिषिक्ता राजानो विनश्येयुः परस्परम्॥

यथा जनप्व्युहे दिग्विभागः प्रदर्शितः।
तस्य वै मोहितं कुर्याल्लोहिताङ्गस्तथा मुखम्॥

९.८.३ भौमसंचारात् तृतीयविशेषयोगफलम्

अधुना भवान् नक्षत्रेषु सञ्चारवशात् भौमस्य अपरं एकस्य विशेषयोगस्य फलविषये पठिष्यते। विषयेऽस्मिन् वराहमिहिरस्य मतम् –

मध्ये न यदि मघानां गतागतं लोहितः करोति ततः।
पाण्ड्यनृपो विनश्यति शस्त्रोद्यगाद्भयमवृष्टिः॥

अन्वयः – यदि लोहितः मघानां मध्ये गतागतं न करोति ततः पाण्ड्यनृपो विनश्यति (तथा) शस्त्रोद्यगाद्भयमवृष्टिः (भवति)।

प्रतिपदार्थः – लोहितः = भौमः, मघानां मध्ये = मघानक्षेत्रे, गतागतं = गमनागमनं, न करोति चेत्, ततः = तस्माद्धेतोः सः भौमः, पाण्ड्यो = पाण्ड्यदेशस्य नृपो = राजा, विनश्यति = नाशं प्राप्नोति। शस्त्रोद्यगाद्भय = लोके च संग्रामभयम्, अवृष्टिम् = वर्षणं च न भवति।

व्याख्या – प्रियच्छात्र! अत्र विशेषयोगविषये कथ्यते यत्– यदि भौमः मघानक्षत्रं मध्ये गतागतं न करोति अर्थात् पृष्ठतारकाणां मध्ये गत्वा पुनर्वक्रगतेरागमनं नैव करोति चेत् तस्मात्कारणात् पाण्ड्यदेशे यो राजा स विनाशमायिति। तस्य प्रदेशस्य लोके च संग्रामभयं जायते। एवं तस्मिन् प्रदेशे अवर्षणं च भवति।

९.८.४ भौमसंचारात् चतुर्थविशेषयोगफलम्

अधुना भवान् नक्षत्रेपु सञ्चारवशात् भौमस्य अपरं एकस्य विशेषयोगस्य फलविषये पठिष्यति। विपयेऽस्मिन् वराहमिहिरस्य मतम्–

भित्वा मघां विशाखां भिन्दन् भौमः करोति दुर्भिक्षम्।
मारकं करोति घोरं यदि भित्वा रोहिणीं याति॥

अन्वयः – यदि भौमः मघां भिन्दन् विशाखां याति (तदा) दुर्भिक्षं करोति, (पुनः) रोहिणीं याति घोरं मारकं करोति।

प्रतिपदार्थः – यदि भौमः = भूमिजः, मघा = नामकनक्षत्रं, भिन्दन् = भित्वा भेदनं कृत्वा, विशाखां = नामकनक्षत्रं प्रति याति, तदा सः दुर्भिक्षम् करोति = खाद्यशस्यस्य अभावं कारयति। पुनः रोहिणी नामकनक्षत्रं प्रति गच्छति चेत्, घोरं = अधिकं, मरकं करोति = मृत्युं ददाति।

व्याख्या – यदि भूमिपुत्रः मघा नामकं नक्षत्रं भेदं कृत्वा विशाखा नक्षत्रं प्रति गच्छति तर्हि तस्मिन् काले खाद्यशस्यस्य अभावः परिलक्ष्यते। पुनः योगतारा रोहिणीनक्षत्रं भेदनं कृत्वा गच्छति चेत्तत्र जनानां कृते अधिकरूपेण मृत्युं विदधाति।

बोधप्रश्नाः

५. "त्रिलोकान्" इति शब्दस्य कोऽर्थ?

६. श्रवणनामकनक्षत्रे उदितः भौमः पुष्यनक्षत्रं गच्छति तर्हि किं फलम्?

७. लोहितशब्दस्यार्थः कः?

९.८.५ भौमसंचारात् पञ्चमविशेषयोगफलम्

अधुना भवान् नक्षत्रेषु सञ्चारवशात् भौमस्य अपरमेकस्य विशेषयोगस्य फलविषये पठिष्यति। विषयेऽस्मिन् वराहमिहिरस्य मतम्–

दक्षिणतो रोहिण्याश्चरन्महीजोऽर्घवृष्टिनिग्रहकृत्।
धूमायन् सशिखो वा विनिहन्यात् पारियात्रास्थान्॥

अन्वयः – (यदि) रोहिण्याः दक्षिणतश्चरन् महिजः (तदा) अर्घवृष्टिनिग्रहकृत। धूमायन् सशिखो वा पारियात्रास्थान् विनिहन्यात्।

प्रतिपदार्थः – यदि रोहिण्याः = रोहिणी नामकनक्षत्रस्य, दक्षिणतश्चरन् = दक्षिणभागेन गच्छन्, महिजः = अङ्गारकः, अर्घस्य निग्रहः = विभिन्नसामग्रीणां मूल्यवृद्धिं, वृष्टिनिर्ग्रहकृत् = वृष्टिञ्च विनाशयति। तथा तत्र धूमायन् = धूममुद्वहन्, सशिखि = विद्युत्युक्तो वा, दृश्यते तदा, पारियात्रस्थान् = पर्वते स्थितान् जनान् विनिहत्यात् = घातयेत्।

व्याख्या – योगतारकस्य रोहिणीनक्षत्रस्य दक्षिणभागे भौमः विचरणं करोति चेत् सः अर्घस्य निग्रहः वृष्टिञ्च विनाशयति। अत्र अर्घस्य निग्रह इत्युक्ते स्वल्पत्वम् तथा विभिन्नसामग्रीणां मूल्यं वृद्धिं करोति। एवं वृष्टेर्निग्रह इत्युक्ते वृष्टेश्चाभावः करोति। पुनश्च तत्र धूमेन युक्तः सशिखि भौमो वा, दृश्यते चेत्तदा परियात्रस्थान् पर्वते स्थितान् जनान् घातयेत्। अर्थात् ते पर्वतस्थाः नानाकारणैः मृत्युवरणं कुर्वन्ति।

९.८.६ भौमस्य नक्षत्रसंचारवशात् मेघनाशकयोगः

अत्र भवान् मङ्गलस्य नक्षत्रसंचारवशात् मेघस्य नाशं कथं भवति, तस्मिन् विषये ज्ञानं प्रास्यति।

प्रजापत्ये श्रवणमूले त्रिषु चोत्तरेषु शाके च।
विचरन् घननिवहानामुपघातकरः क्ष्मातनयः॥

अन्वयः – (यदि) क्षमातनयः प्रजापत्ये श्रवणे मूले त्रिषु चोत्तरेषु शाके च विचरन् (तर्हि) घननिवहानाम् उपघातकरः भवति।

प्रतिपदार्थः – यदि क्षमातनयः = मङ्गलः, प्रजापत्ये = रोहिणीनक्षत्रे, श्रवणनक्षत्रे, मूलनक्षत्रे, त्रिषु चोत्तरेषु = उत्तराफाल्गुनी-उत्तराषाढा-उत्तरभाद्रपदनामकनक्षत्रेषु, शाके = ज्येष्ठानक्षत्रे, विचरन् = संचरन्, घननिवहानां = मेघवृन्दानाम्, उपघातकरः = विनाशकर्ता भवति। क्षमायाः = पृथिव्याः, तनयः = पुत्रः, अर्थात् मङ्गलः।

व्याख्याः – यदि भौमः रोहिणी-श्रवण-मूलनक्षत्रेषु तथा उत्तराफाल्गुनी-उत्तराषाढा-उत्तरभाद्रपदा-ज्येष्ठानक्षत्रेषु च भ्रमणं करोति तर्हि मेघस्य विनाशकर्ता भवति। अर्थात् मेघस्यागमने सः प्रतिबन्धकः भवति। उपर्युक्तेषु नक्षत्रेषु गमनकाले भौमे यदि आकाशे मेघस्य गर्भसंञ्चारः जायते तर्हि सः गर्भः नष्टप्राय इति।

१.८.७ भौमस्य नक्षत्रसंचारवशात् शुभफलम्

मङ्गलस्य नक्षत्रसंचारवशात् शुभाशुभफलकथनकाले वराहमिहिराचार्येण नानामुनीनां मतं स्वीकृत्य अपवादविषयोऽपि कथितः। तद्यथा ''यस्मिन्नृक्षेऽभ्युदितस्तदिग्व्यूहान् जनान् हन्ति'' तथा ''प्राजापत्ये श्रवणे........'' इत्यस्यापवोदोऽयं श्लोक। अर्थात् पूर्वस्मिन् श्लोके कथितम् यत् – यदि भौमः रोहिणी-श्रवणनक्षत्रे च चलति तर्हि मेघस्य नाशं करोतीति, परन्तु श्लोकेऽस्मिन् तस्य विपरीतार्थः दृश्यते। भौमः यदा रोहिणी-श्रवणनरक्षत्रे च उदेति तदा शुभफलं स्यात्। अतोऽधुना भवान् नक्षत्रसंचारवशात् शुभफलं विषये ज्ञास्यति। तदाह–

चारोदयाः प्रशस्ताः श्रवणमघादित्यहस्तमूलेषु।
एकपदाश्विविशाखाप्रजापत्येषु च कुजस्य॥

अन्वयः – (यदि) कुजस्य श्रवण-मेघा-आदित्य-हस्त-मूलेषु (तथा) एकपद-अश्वि-विशाखा-प्रजापत्येषु चारोदयाः प्रशस्ताः (स्युः)।

प्रतिपदार्थः – कुजस्य = अङ्गारकस्य, श्रवणे, मघायाम्, आदित्ये = पुनर्वसौ, हस्ते, मूले, एकपदौ = पूर्वभद्रपदायाम्, अश्विन्यां, विशाखायां, प्राजापत्ये = रोहिण्याम् च, एतेपु नक्षत्रेपु, चारोदयाः = संचार-उदयाश्च, प्रशस्ताः = संसारेऽस्मिन् उत्तमफलदायकाः भवन्ति। श्रवणमघादित्यहस्तमूलेषुमूलादिनक्षत्रेषु। एकपदाश्विविशाखाप्रजापत्येषु-पूर्वाफाल्गुनी-अश्विनी-विशाखा-रोहिणी आदि नक्षत्रेषु च-मध्ये। कुजस्य-मङ्गलस्य।

व्याख्या – भौमस्य कृते श्रवण-मघा-पुनर्वसु-हस्त-मूल-पूर्वाफाल्गुनी-अश्विनी-विशाखा रोहिण्यादिशुभनक्षत्राणि भवन्ति। एतेषु नक्षत्रेषु भौमस्य सञ्चार-उदयाश्च भवन्ति चेत्तदा संसारे सर्वे प्रशस्ताः शोभनाः भवन्ति। सर्वे सुखेन जीवनं निर्वहन्ति इत्यर्थः।

१.९ भौमस्य वर्णवशात् फलम्

अधुना भवान् मङ्गलस्य तद् विषये ज्ञानं प्राप्स्यति।

विपुलविमलमूर्त्तिः किंशुकाशोकवर्णः।
स्फुटचिरमयूखस्तप्तताम्रप्रभाभः॥

विचरति यदि मार्गं चोत्तरं मेदिनीजः।
शुभकृदवनिपातानां हार्दिदश्च प्रजानाम्॥

अन्वयः – यदि मेदिनीजः विपुलविमलमूर्त्तिः किंशुकाशोकवर्णः स्फुटचिरमयूखस्तप्तताम्रप्रभाभः उत्तरमार्गं च विचरति (तदा) अवनिपातानां शुभकृद् (तथा) प्रजानां हार्दिदः च करोति।

प्रतिपदार्थः – यदि मेदिनीजः = भौमः, विपुला = विस्तीर्णा, विमला = निर्मला, मूर्त्तिः = किरणः। किंशुकः = पलाशपुष्पं तत्सदृशवर्णः, अशोकवर्णः = अशोकपुष्पविशेषः अतिलोहितवर्णः। स्फुटा = स्पष्टा, रुचिरा = दीप्तिमन्तो, मयूखाः = रश्मयो यस्य। तप्तताम्रप्रभाभः = गलितस्य ताम्रस्य यादृशी कान्तिस्तत्तुल्या बिम्बच्छया यस्य। यदि चोत्तरं मार्गं = यस्मिन्नक्षत्रे स्थितस्तस्योत्तरभागेन, विचरति = विचरणं करोति। तदा अवनिपातानां = राज्ञां कृते शुभकृद् = शुभं करोति, तथा प्रजानाम् = राज्यस्थजनानम्, हार्दिदश्च = सन्तोषमपि करोति।

व्याख्या – यदि भूस्तस्या जातो मेदिनीजः विस्तीर्णनिर्मलकिरणयुक्तः मूर्त्तिः स्यात्तदा राज्ञां कृते शुभकृद् एवं प्रजानामपि सन्तोषम्। तथा यदि मेदिनीजः पलाशपुष्पसदृशवर्णः एवम् अशोकपुष्पविशेषः अतिलोहितवर्णः स्यात्तदा राज्ञां प्रजानां कृते शुभकृद् सन्तोषश्च भवति। यदि स्पष्टा दीप्तिमन्तो रश्मयो युक्तः भौमः स्यात्तदा राज्ञां प्रजानां कृते शुभकृद् सन्तोषश्च भवति। यदि गलितस्य ताम्रस्य यादृशी कान्तिस्तत्तुल्या बिम्बच्छया मङ्गलस्य भवति तर्हि राज्ञां प्रजानां कृते शुभकृद् सन्तोषश्च भवति। यदि यस्मिन्नक्षत्रे स्थितस्तस्योत्तरभागेन मङ्गलः विचरणं करोति, तर्हि राज्ञां प्रजानां कृते शुभकृद् सन्तोषश्च भवति। अर्थात् राजा प्रजानां कृते मङ्गलं कार्यं कृत्वा सुखेन राज्यशासनं करोति। गर्गमतेन–

याम्यादिपितृपर्यन्तं नवर्क्षं मार्गमुत्तरम्।
भाग्यादिनैऋतान्तं तु मार्गमुच्यते।
आषाढाद्यश्विनान्तं तु दक्षिणं समुदाहृतम्।
सौम्यमार्गस्थितो भौमः प्रजानामुपकारकः॥

पराशरमतेन–

प्रदक्षिणगतिः कान्तः स्निग्श्च कलसोपमः।
तप्तकाञ्चनसङ्काशो भवेल्लोकविवृद्धये।

बोधप्रश्नाः

८. रोहिणीनक्षत्रस्यः दक्षिणभागे भौमः किं करोति?

९. कदा भौमः मेघनाशं करोति?

१०. कदा भौमः उत्तमफलं ददाति?

११. कीदृशः भौमवर्णः शुभकरो भवति?

१२. भौमः कस्यां क्रान्त्यां राजाप्रजानां हितं करोति?

मूलपाठः

रुधिराननमिति वक्रं पञ्चदशात् षोडशाच्च विनिवृते।
तत्काले मुखरोगं सभयं च सुभिक्षमावहति॥

असिसमुसलं सप्तदशादष्टादशतोऽपि वा तदनुवक्रे।
दस्युगणेभ्यः पीडां करोत्यवृष्टिं सशस्त्रभयम्॥

भाग्यार्यामोदितो यदि निवर्तते वैश्वदैवते भौमः।
प्रजापत्येऽस्तमितस्त्रीनामपि लोकान्निपीडयति॥

श्रवणोदितस्य वक्रं पुष्ये मूर्धाभिषिक्तपीडाकृत्।
यस्मिन्नृक्षेऽभ्युदितस्तदिग् व्युहाने जनान् हन्ति॥

मध्येन यदि मघानां गतागतं लोहितः करोति ततः।
पाण्ड्यनृपो विनश्यति शस्त्रोद्यगाद्भयमवृष्टिः॥

भित्वा मघां विशाखां भिन्दन् भौमः करोति दुर्भिक्षम्।
मरकं करोति घोरं यदि भित्वा रोहिणीं याति॥

यदि दक्षिणतो रोहिण्याश्चरन्महीजोऽर्ध्ववृष्टिनिर्ग्रहकृत्।
मरकं करोति घोरं वा विनिहत्योत् पारियात्रास्थान्॥

प्रजापत्ये श्रवणमूले त्रिषु चोत्तरेषु शाके च।
विचरन् घननिवहानामुपघातकरः क्षमातनयः॥

चारोदयाः प्रशस्ताः श्रवणमघादित्यहस्तमूलेषु।
एकपदाश्विविशाखाप्रजापत्येषु च कुजस्य॥

विपुलविमलमूर्त्तिः किंशुकाशोकवर्णः
स्फुटचिरमयूरखस्तप्तताम्रप्रभावः
विचरति यदि मार्गं चोत्तरं मेदिनीजः
शुभकृदवनिपातानां हार्दिदश्च प्रजानाम्॥

९.१० सारांशः

सारांशत्वेन भवान् अस्मिन् पाठे आचार्यवराहमिहिरकृतवृहत्संहितायाः भौमचाराध्यायं पठितवान्। तत्र भौमस्य पञ्चविधलक्षणं यथा (१) उष्णमुखभौमः, (२) अश्रुमुखभौमः, (३) व्यालमुखभौमः, (४) रुधिराननभौमः, (५) असिमुशलमुखभौमश्चेति पञ्चमुखानि। एतेषां लक्षणानि सफलानि ज्ञातवान्। अनन्तरं भौमस्य विशेषयोगान् ज्ञात्वा तस्य फलं ज्ञातवान्। तदुपरान्तं भौमस्य संचारवशात् शुभाशुभफलं, वर्णवशात् च शुभाशुभफलं ज्ञातुं प्रचेष्टितवान्। अर्थात् पाठेऽस्मिन् भौमचारवशात् कानि कानि शुभाशुभफलानि पतन्ति, तानि ज्ञानानि एव प्रतिपादितानि सन्ति। मङ्गलः उदयनक्षत्रयात् कस्मिन् स्थाने कीदृशं फलं प्रयच्छति इत्यस्मिन् विषये लिखितमस्ति। एतेपु विषयेपु ज्ञानं प्राप्य भौमचारस्य फलकथितुं समर्थोऽस्ति भवान्।

९.११ शब्दावली

१.	अर्क्षात्	–	नक्षत्रात्।
२.	वार्त्तानाम्	–	अग्न्याश्रिताः (अग्निना आश्रिताः) ये जीवन्ति तेषाम्।
३.	विच्यते	–	परिवर्त्तते।
४.	तदनुवक्रे	–	ततः वक्रं भवति।
५.	दस्युगणेभ्यः	–	चौरगणेभ्यः।

६. भौग्यार्यमोदितो – पूर्वाफान्गुनी-उत्तराफाल्गुनीनक्षत्रे।

७. वैश्वदैवते – उतराषाढानक्षत्रे।

८. प्राजापत्ये – रोहिणीनामकनक्षत्रे।

९. मूर्धाभिषिक्तः – नृपः।

१०. लोहितः – क्षमातनयः, भौमः, मङ्गलः।

११. विहन्यात् – हत्यां करोति।

१२. शाक्रे – ज्येष्ठानक्षत्रे।

१३. एकपद – पूर्वभाद्रपदा।

१४. अश्वि – अश्विनीनक्षत्रे।

१५. किंशुकः – पलाशः।

९.१२ सन्दर्भग्रन्थाः

१. बृहत्संहिता- सम्पादकः, डॉ. कृष्णचन्द्रद्विवेदी, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालय, वाराणसी।

२. बृहत्संहिता- सम्पादकः, डॉ. सुरकान्तझा, चौखम्बासंस्कृतसीरीजआफिस, वाराणसी।

३. बृहत्संहिता- सम्पादकः, श्री अच्युतानन्दझा, चौखम्बासंस्कृतप्रतिष्ठानम्, वाराणसी।

९.१३ बोधप्रश्नोत्तराणि

१. पञ्चलक्षणानि।

२. अश्रुमुखलक्षणम्।

३. यदा भौमः अस्तनक्षत्रात् पञ्चदशषोडशस्थानं वा गच्छति।

४. श्वान-शृगाल-सर्पादिप्राणिनां नाशं करोति तथा सुभिक्षं करोति।

५. त्रिलोकान्-स्वर्ग-मत्य-पातालमिति।

६. श्रवणनामकनक्षत्रे उदितः भौमः पुष्यानक्षत्रात् वक्रीं गच्छति तर्हि तद्दिशि राजानां पीडां ददाति।

७. मङ्गलः।

८. अनावृष्टिं तथा मूल्यवृद्धिं करोति।

९. भौमःयदा रोहिणी-श्रवण-मूल-उत्तराफाल्गुनी-उत्तरषाढा-उतरभाद्रपद-ज्येष्ठानक्षत्रेषु भ्रमति।

१०. श्रवण-मघा-पुनर्वसु-हस्त-मूलेषु (तथा) पूर्वाफाल्गुनी-अश्विनी-विशाखा-रोहिणीनक्षत्रेषु।

११. किंशुक-अशोकवर्णयुक्तभौमः।
१२. उत्तरक्रान्त्याम्।

९.१४ अभ्यासप्रश्नाः

१. असितमूलभौमलक्षणं लिखतु?
२. रुधिराननभौमस्य फलं लिखतु?
३. भौमस्योत्तमफलदायकयोगः विषये लिखतु?
४. भौमस्य वर्णलक्षणं तस्य फलञ्च लिखतु?
५. भौमस्य योगवषतः फलं लिखत?
६. नक्षत्रसंचारे भौमस्य शुभनक्षत्राणि कानि इति लिखत?
७. भौमस्य किंसुकपुष्पवर्णस्य लिखत?

◆

दशमः पाठः (बुधवारः)

पाठसंरचना
१०.१ प्रस्तावना
१०.२ उद्देश्यम्
१०.३ बुधस्य उदयफलम्
१०.४ नक्षत्रेषु बुधस्य संचारफलम्
  १०.४.१ श्रवणादिनक्षत्रेषु बुधचारस्य फलानि
  १०.४.२ हस्तादिनक्षत्रेषु बुधचारस्य फलानि
  १०.४.३ अश्विन्यादिनक्षत्रेषु बुधचारस्य फलानि
१०.५ बुधस्य सप्तगतयः
  १०.५.१ प्राकृतादिगतीनां लक्षणानि
  १०.५.२ योगान्तिकादिगतीनां लक्षणानि
बोधप्रश्नाः
१०.६ बुधस्य उदयास्तदिवसात् गतीनां लक्षणं फलञ्च
१०.७ बुधस्य ऋज्वादिगतीनां लक्षणं तत्फलञ्च
१०.८ मासवशात् बुधस्य उदयास्तफलम्
१०.९ उदयास्तवशात् बुधस्य फलम्
१०.१० बुधबिम्बस्य लक्षणं तत्फलञ्च
बोधप्रश्ना :
१०.११ सारांशः
१०.१२ शब्दावली
१०.१३ सन्दर्भग्रन्थाः
१०.१४ सहायकग्रन्थाः
१०.१५ बोधप्रश्नोत्तराणि
१०.१६ अभ्यासप्रश्नाः

१०.१ प्रस्तावना

आचार्यवराहमिहिरविरचितबृहत्संहितायाः दशमेऽध्यायेऽस्मिन् भवतः स्वागतम्। पूर्वस्मिन् अध्याये भवान् भौमचाराध्यायं पठितवान्। तस्मिन् भौमस्य उष्णमुखादिपञ्चमुखानां लक्षणं फलञ्च पठितवान्। तदनन्तरं भौमस्य विविधनक्षत्रेषु चारवशात् फलानि च पठितानि। तथा च भौमस्य विविधवर्णानां फलानि अपि पठितवान्। अस्मिन् अध्याये भवता ज्योतिषीयदृष्ट्या आधुनिकवैज्ञानिकानां मते च बुधस्य स्वरूपम्, श्रवणादिनक्षत्रेषु बुधचारस्य फलानि, हस्तादिनक्षत्रेषु बुधचारस्य फलानि, अश्विन्यादिनक्षत्रेषु बुधचारस्य फलानि, पठिष्यते, बुधस्य सप्तगतयः, तत्र प्राकृतादिगतीनां लक्षणानि, योगान्तिकादिगतीनां लक्षणानि, बुधस्य उदयास्तदिवसात् गतीनां लक्षणं फलञ्च, बुधस्य ऋज्वादिगतीनां लक्षणं फलस्य मासवशात् बुधस्य उदयास्तफलम्, उदयास्तवशात् बुधस्य फलम्, बुधबिम्बस्य लक्षणं तत्फलञ्च पठिष्यति। बुधः ग्रहेषु लघुतमः वर्तते च अस्य गति अपि तीव्रतरा भवति। अस्य अवस्थितिः सूर्यस्य निकटतमा वर्तते। प्राचीनानां मतानुसारं कक्षाक्रमे पृथिव्याः पार्श्वे चन्द्रस्य कक्षानन्तरं बुधस्य एव कक्षा भवति। अतः बुधस्य प्रभावमपि अधिकतरं भवति। आचार्येण बृहत्संहिताग्रन्थस्य बुधचाराध्याये बुधस्य उदयास्तवशात्, चारवशात्, वर्णपरिवर्तनवशाच्च फलानि विस्तरेण वर्णितानि। पाठेऽस्मिन् भवान् सम्पूर्णबुधचाराध्यायं पठिष्यति।

१०.२ उद्देश्यम्

प्रस्तुतपाठस्य अध्ययनेन भवान् –

- बुधग्रहस्य स्वरूपस्य व्याख्यानं कर्तुं समर्थो भविष्यति।
- अश्विन्यादिषु सप्तविंशतिनक्षत्रेषु बुधस्य सञ्चारफलस्य अवगमनं करिष्यति।
- बुधस्य प्राकृतादिसप्तगतीनां लक्षणविवेचने सामर्थ्यं प्राप्स्यति।
- प्राकृतादिगतिषु स्थितबुधस्य उदयास्तदिवसात् लक्षणफलानि विवेचने पटुः भविष्यति।
- देवलाचार्येण उक्तानां ऋज्वादिचतसृणां गतीनां लक्षणफलानि वक्तुं प्रभविष्यति।
- मासवशात् बुधस्य उदयास्तजफलवर्णयितुं दक्षतां प्राप्स्यति।
- बुधस्य उदयास्तकाले संसारे जायमानं फलं कथयितुं योग्यो भविष्यति।
- बुधग्रहस्य बिम्बस्य वर्णं ज्ञात्वा तत्फलं विवेचयितुं कुशलतां प्राप्स्यति।

१०.३ बुधस्य उदयफलम्

यदा कश्चिद ग्रहः स्वकक्षायां परिभ्रमणं कुर्वन् सूर्यस्य अत्यन्तनिकटे (अल्पांशभ्यन्तरे) आगच्छति, तदा स अस्तंगतो लुप्तप्रायो वा भवति। तथा च यदा सः ग्रहः सूर्यस्य अल्पांशप्रभावात् बहिरागच्छति, तदा तस्योदयः जायते। प्राचीनाचार्यैः ग्रहाणाम् अस्तसम्बन्धितकालांशाः निधारिताः सन्ति। तत्र बुधस्य कालांशाः त्रयोदशांशात्मकाः (13^0) सन्ति, अर्थात् बुधः सूर्यस्य एकस्यामेव राशौ त्रयोदशांशमध्ये भवतः, तदा बुधग्रहो अस्तं याति। किञ्चित् कालानन्तरञ्च सूर्यतः त्रयोदशांशात् बहिः आगते सति उदय याति।

यदा बुधस्य उदयो भवति तस्मिन् काले उदितस्य बुधस्य किं फलमिति वराहमिहिरेण एवं वर्णितम् यथा–

''नोत्पातपरित्यक्तः कदाचिदपि चन्द्रजो व्रजत्युदयम्।
जलदहनपवनभयकृद् धान्यर्घक्षयविवृद्धौ वा।।''

अन्वयः – चन्द्रजः कदाचित् अपि उत्पातपरित्यक्तः उदयं न व्रजति। (तस्योदयकाले) जलं अग्निः पवनः भयकृत् धान्यस्य अर्घक्षयः विवृद्धिः वा (भवति)।

प्रतिपदार्थः –

चन्द्रजः	–	चन्द्रस्य पुत्रः बुधः।
कदाचित् अपि	–	यस्मिन् कस्मिन् अपि काले।
उत्पातपरित्यक्तः	–	उत्पातविरहितः, अशुभघटनाविरहितः वा।
उदयम्	–	सन्दर्शनम्।
न व्रजति	–	न गच्छति।
जलम्	–	उदकम् (नीरः?)।
दहनः	–	अग्निः।

पवनः – वायुः(एभ्योः)।

भयकृत् – भयं करोति।

धान्यस्य – अन्नस्य।

अर्घक्षयः – स्वल्पमूल्यानां मूल्यह्रासः।

विवृद्धिः वा – वर्धनं वा (भवति)।

व्याख्याः – आकाशे बुधग्रहस्य अस्तानन्तरं यदा उदयो भवति, तस्मिन् काले अनेकविधाः आकस्मिकरूपेण उत्पन्नाः, संकटसूचकाः घटनाः (उत्पाताः) विघटन्ति। आचार्यानुसारेण उत्पातानामुत्पत्तिः बुधस्योदये निश्चयेन भवति। बुधस्योदये पञ्चविधाः उत्पाताः भवन्तीति वर्णितम्, ते यथा–

१. जलकृद्भयम्

२. अग्निकृद्भयम्

३. वायुकृद्भयम्

४. धान्यार्घक्षयः

५. धान्यार्घवृद्धिः

एतेषामुत्पातानां **विषये** सम्प्रति विस्तरेण पठामः –

१. जलकृद्भयम्

जलेन उत्पन्नभयं जलकृद्भयं भवति। जलजनितः उत्पातः अनेकविधः भवितुमर्हति। यथा–

वृष्टिसम्बन्ध्युत्पातः – अतिवृष्टिः, अनावृष्टिः

जलसंसाधनसम्बध्युत्पातः– कूपजले विकृतिः, नदीजलेविकृति तडागजले विकृतिः।

२. अग्निकृद्भयम्

अग्निना उत्पत्रं भयमग्निकृद्भयमुचयते।

यथा– वनगृहग्रामादिदाहः, शय्यावस्त्रकेशेषु विस्फुलिङ्गानां प्रतीतिः।

३. वायुकृद्भयम्

वायुना उत्पन्नभयं वायुकृद्भयं कथितम्।

यथा– झञ्जावातः, चक्रवातः।

४. धान्यार्घक्षयः

अन्नादीनां मूल्येषु अतीवन्यूनताकारणात् वणिग्जनानां हानिर्भवति।

५. धान्यार्घवृद्धिः

अन्नादीनां मूल्ये बहुमूल्यताकारणात् निर्धनजनेभ्यः उदपूर्त्याः संकटमागच्छति।

एवं बुधस्योदये विविधाः उत्पाताः दृश्यन्तो।

समाससंहितायामपि उपरोक्ताः उत्पाताः एव कथिताः येषामुद्धरणं भट्टोत्पलेन स्वटीकायां कृतम् –

''उदयं याति शशिसुतो नोत्पातविवर्जितः कदाचिदपि।
पवनाग्निसलिलभयदो धान्यार्घवृद्धिक्षयकृद्वा।।''

10.3.1 आधुनिक वैज्ञानिकानां मते बुधस्य स्वरूपम्

१०.४ नक्षत्रेषु बुधस्य संचारफलम्

क्रान्तिवृत्ताख्यचे भचक्रे 360 अंशाः सन्ति। भचक्रस्य द्वादशभागे कृते सति मेषादयः त्रिंशदंशात्मकाः द्वादशराशयः, तथा च सप्तविंशतिः विभागं कृत्वा अश्विन्यादीनि सप्तविंशतिः नक्षत्राणि भवन्ति। सूर्यादयः सर्वे ग्रहाः राशिनक्षत्राणां प्रभावक्षेत्रमागत्य पृथिव्याः प्राणिनः प्रभावयन्ति। बुधग्रहः यदा एतेषु नक्षत्रेषु सञ्चरणं करोति तदा तस्य किं फलमिति विषयमवलम्ब्य इदानीं पठामः।

१०.४.१ श्रवणादिनक्षत्रेषु बुधचारस्य फलानि

श्रवण-धनिष्ठा-रोहिणी-मृगशिरा-उत्तराषाढा-आर्द्रा-पुनर्वसु-पुष्य-आश्लेषा-मघानक्षत्रेषु-बुधग्रहस्य सञ्चारस्य फलं वराहमिहिरेणोक्तं यथा-

''विचरन् श्रवणधनिष्ठाप्राजापत्येन्दुवैश्वदेवानि।
मृद्नन् हिमकरतनयः करोत्यवृष्टिं सरोगभयाम्।।

रौद्रादीनि मघान्तानयुपाश्रिते चन्द्रजे प्रजापीडा।
शस्त्रनिपातक्षुद्भयरोगानावृष्टिसन्तापैः।।''

अन्वयः – श्रवणं धनिष्ठा प्राजापत्यम् इन्दुः वैश्वदेववानि हिमकरतनयः मृदनन् विचरन् सरोगभयाम् अवृष्टिं शस्त्रनिपातेन क्षुद्भयेन रोगैः अनावृष्टया सन्तापेन प्रजापीडा भवति।

प्रतिपदार्थः –

श्रवणम्	-	श्रवणनक्षत्रम्।
धनिष्ठा	-	धनिष्ठानक्षत्रम्।
प्राजापत्यम्	-	रोहिणी नक्षत्रम्।
इन्दुः	-	मृगशिरानक्षत्रम्।
वैश्वदेवानि	-	उत्तराषाढ़ा (एतानि पञ्चनक्षत्राणि)।
हिमकरतनयः	-	चन्द्रस्य पुत्रः बुधग्रहः।
मृदनन्	-	उपमर्दयन् (भेदनपूर्वकम् यदा)।
विचरन्	-	विचरति। (तदा)।
सरोगभयाम्	-	रोगभययुक्ताम्।
अवृष्टिम्	-	अवर्षणम् (वर्षायाः अभावं च)।

रोद्रादीनि	–	आद्रोनक्षत्रम्, पुनर्वसु नक्षत्रम्, पुष्यनक्षत्रम् आश्लेषा नक्षत्रम्।
मघान्तानि	–	मघानक्षत्रादीनि (माघपर्यन्तानि)।
चन्द्रजे	–	चन्द्रात्मजे बुधे।
उपाश्रिते	–	व्यवस्थिते।
शस्त्रनिपातेन	–	युद्धेन।
क्षुद्भयेन	–	दुर्भिक्षभीत्या।
रोगैः	–	व्याधिभिः।
अनावृष्ट्या	–	अवर्षणेन (वर्षायाः अभावेन)।
सन्तापेन	–	दुखेन (च)।
प्रजापीड़ा	–	प्रजायाः पीडनं करोति।

व्याख्या – स्वकक्षायां परिभ्रमन् बुधः यदा श्रवण-धनिष्ठा-रोहिणी-मृगशिरा-उत्तराषाढ़ादिषु नक्षत्रेषु सञ्चरति। तस्मिन् काले धरायां वृष्टेः अभावो भवति, रोगोत्पत्तेः भयञ्च उत्पद्यते। एवमेव यदा बुधः आर्द्रा-पुनर्वसु-पुष्य-आश्लेषा-मघानक्षत्रेषु सञ्चारं करोति, तस्मिन् काले लोके युद्धेन, दुर्भिक्षभीत्या, अनेकरोगैः, वर्षायाः अभावेन विविधदुःखादिभिश्च प्रजा कष्टमनुभवति।

१०.४.२ हस्तादिनक्षत्रेषु बुधचारस्य फलानि

श्रवणादिनक्षत्रेषु बुधचारस्य लोके किं फलमिति भवद्भिः पठितम्। सम्प्रति हस्तादिनक्षत्रेषु बुधस्य सञ्चरणवशात् जायमानं फलं पठामः। यथोक्तं वराहमिहिराचार्येण–

हस्तादीनि चरन् षडर्क्षाण्युपीडयन् गवामशुभः।
स्नेहरसार्घविवृद्धिं करोति चोर्वी प्रभूतान्नाम्॥

आर्यम्णं हौतभुजं भद्रपदामुत्तरां यमेशं च।
चन्द्रस्य सुतो निघ्नन् प्राणभृतां धातुसंक्षयकृत्॥

अन्वयः – हस्तादीनि षड् ऋक्षाणि चरन् उपपीडयन् गवाम् अशुभानि। स्नेहानां रसानाम् अर्घविवृद्धिं उर्वी च प्रभूतान्नां करोति। आर्यम्णं हौतभुजम् उत्तराभद्रपदां यमेशं च चन्द्रस्य सुतः निघ्नन् प्राणभृतां धातूनां संक्षयकृत्।

प्रतिपदार्थः –

हस्तादीनि	–	हस्त, चित्रा, स्वाती, विशाखा, अनुराधा, ज्येष्ठादीनि।
षड् ऋक्षाणि	–	षट् संख्याकानि नक्षत्रणि।
चरन्	–	विचरन् बुधः।
उपपीड्यन्	–	(एतेषु नक्षत्रेषु) स्थितयोगातारकां भिन्दन्।
गवाम्	–	गाः।

अशुमः	–	घातकः।
स्नेहानाम्	–	तैलघृतानाम्।
रसानाम्	–	मधुर-अम्ल-कूट-लवण-तिक्त-कषायेति-षड्रसानाम्।
अर्धविवृद्धिम्	–	मूल्यवृद्धिं (करोति)।
उर्वीम् च	–	तथा च पृथ्वीम्।
प्रभूतान्नां करोति	–	पर्याप्तमात्रायां सस्ययुक्तां करोति।
आर्यम्णम्	–	उत्तराफाल्गुनीलक्षत्रम्।
हौतभुजम्	–	कृत्तिकानक्षत्रम्।
उत्तराभद्रपदाम्	–	उत्तराभद्रपदनक्षत्रम्।
यमेशं	–	भरणीनक्षत्रं।
चन्द्रस्य सुतः	–	बुधः।
निघ्नन्	–	उपमर्दयन्।
प्राणभृताम्	–	देहिनाम्।
धातूनां	–	वसा-रक्त-मांस-मेदा-अस्थि-मज्जा-शुक्रादीनां सप्तधातूनाम्।
संक्षयकृत्	–	विनाशं करोति।

व्याख्या – नक्षत्रेषु सञ्चरणवशात् बुधग्रहः यदा हस्त-चित्रा-स्वाती-विशाखा-अनुराधा-ज्येष्ठेति षट्सु नक्षत्रेषु स्थितयोगतारकां (नक्षत्रे स्थितानेकातारकाणां समूहः) भेदं कुर्वन् विचरति, तदा गवां हननं, स्वास्थ्यहानिः रोगादिकं वा अशुभफलं करोति। एतेषु नक्षत्रेषु बुधस्य सञ्चरणवशात् सर्वविधखाद्यतैलानां घृतानाञ्च मूल्यं वर्धते। मधुर-अम्ल-कटु-लवण-तिक्त-कषायेति-षड्रसानां मूल्यमपि तस्मिन् कालखण्डे विशेषेण वर्धते। किन्तु हस्तादिषट्नक्षत्रेषु बुधस्य शुभफलमपि दृश्यते, यतोहि कालेऽस्मिन् धरायां पर्याप्तमात्रायां सस्योत्पादनं जायते। उत्तराफाल्गुनी-कृत्तिका-उत्तराभाद्रपद-भरणीनक्षत्रचतुष्टये बुधस्य सञ्चरणवशात् तु अशुभफलमेव दृश्यते। तस्मिन् काले सर्वेषां देहिनां शरीरेषु स्थितवसा-रक्त-मांस-मेदा-अस्थि-मज्जा-शुक्रादीनां सप्तधातूनां च विनाशो भवति।

व्याख्यायां वर्णिताः मधुराम्लेति षड्रसाः वैशेषिकदर्शनस्य चतुर्विंशतिभेदेषु एकस्मिन् रसनामधेये भेदे वर्णिताः। सप्तधातूनाञ्च विशेषवर्णनम् आयुर्वेदस्य भावप्रकाशादिग्रन्थेषु द्रष्टुं शक्यते।

१०.४.३ आश्विन्यादिनक्षत्रेषु बुधचारस्य फलानि

हस्तादिषु दशनक्षत्रेषु बुधचारस्य फलमस्माभिः पूर्वोक्तसन्दर्भे पठितम्। सम्प्रति अश्विनी-शतभिषामूल-रेवती-पूर्वाफाल्गुनी-पूर्वाषाढा-पूर्वाभाद्रपदेति नक्षत्रेषु सञ्चारवशात् बुध जनितफलानाम् अध्ययनं कुर्मः-

आश्विनवारुणमूलान्युपमृद्नन् रेवतीं च चन्द्रसुतः।
पण्यभिषजगनौजीविकसलिलजतुरगोपघातकरः॥

पूर्वाद्यृक्षत्रितयादेकमपीन्दोः सुतोऽभिमृद्नीयात्।
क्षुच्छस्त्रतस्करामयभयप्रदायी चरन् जगतः॥

अन्वयः – चन्द्रसुतः आश्विनं वारुणं मूलं रेवतीं च उपमृदनन् पण्यजीविकानां भिषजां नौजीविकानां सलिलजानां तुरगाणाम् उपघातकरः। इन्दोः सुतः पूर्वाद्यक्षत्रितयम् एकम् अपि चरन् अभिमृद्नीयात्, जगतः क्षुद् शस्त्रं तस्कराः आमयः भयं प्रदायी।

प्रतिपदार्थः –

चन्द्रसुतः	–	चन्द्रस्य पुत्रः बुधः।
आश्विनम्	–	अश्विनीनक्षत्रम्
वारुणम्	–	शतभिषानक्षत्रम्।
मूलम्	–	मूलनक्षत्रम्।
रेवतीम् च	–	तथा च रेवतिनक्षत्रम्।
उपमृदनन्	–	उपमर्दयन् (भेदनपूर्वकम्)।
पण्यजीविकानाम्	–	वणिक्प्रभृतीनाम् (व्यवसायिनाम्)।
भिषजाम्	–	वैद्यानाम्।
नौजीविकानाम्	–	नाविकानाम्।
सलिलजानाम्	–	जलोत्पन्नानां द्रव्याणां मुक्ताप्रवालसदृशाणाम्।
तुरगाणाम्	–	अश्वानाम्।
उपघातकरः	–	नाशकर्ता भवति।
इन्दोः सुतः	–	चन्द्रस्य पुत्रः (बुधः)।
पूर्वाद्यृक्षत्रितयम्	–	पूर्वशब्द आदिः यस्य तत् नक्षत्रत्रयं यथा- पूर्वफाल्गुनी, पूर्वषाढा, पूर्वभद्रपदेति।
एकम् अपि	–	पूर्वोक्तेषु त्रिषु एकं नक्षत्रमपि (यदि)।
चरन्	–	विचरणं कुर्वन्।
अभिमृद्नीयात्	–	उपमर्दनं कुर्यात्, उपमर्दयेत्। भेदयेत् वा (तदा सः)।
जगतः	–	संसारस्य।
क्षुद्रम्	–	दुर्भिक्षं वा।
शस्त्रम्	–	शस्त्रस्य परिणामं युद्धादिकम्।
तस्कराः	–	चौराः।
आमयः	–	रोगाः।
भयम्	–	भीतिः (च)।
प्रदायी	–	प्रददाति।

व्याख्या – यदा बुधग्रहः आश्विन-शताभिषा-मूल-रेवतीनक्षत्राणां भेदनं कुर्वन् विचरणे करोति, तदा व्यापारकर्मणि प्रवृत्तानां, वैद्यानां, नाविकानां, जलोत्पन्नानां द्रव्याणां मुक्ताप्रवालसदृशाणां, अश्वानाञ्च नाशं करोति। किन्तु यदि पूर्वफाल्गुनी, पूर्वषाढा, पूर्वभद्रपदेषु नक्षत्रेषु एकस्मिन् अपि विचरन् उपमर्दयेत्, तदा संसारे दुर्भिक्षं, शस्त्रप्रयोगं, चौराणां बाहुल्यं, विविधरोगाणां प्रकोपं, भयादिकञ्च उत्पद्यते।

उपरोक्त नक्षत्रेषु बुधसञ्चारस्य यत्फलमस्माभिः पठितम्, आचार्यकश्यपस्यापि मतं समानमेव दृश्यते यथा–

रेवतीं वारुणं मूलमश्विनीं चोपमर्दयन्।
बुधो वणिग्भिषग्वाहान् जलोत्थांश्च विनाशयेत्।।

पूर्वात्रये चरन् सौम्यो भेदं कृत्वा यदि व्रजेत।
क्षुच्छस्त्रतस्करभयैः करोति प्राणिनां वधम्।।

इदानीं बुधस्य सप्तविंशतिनक्षत्रेषु सञ्चारफलस्य स्पष्टबोधार्थं निम्नाङ्कितचक्रं पश्यामः – बुधस्य नक्षत्रेषु सञ्चारफलबोधचक्रम् –

क्रमांक	नक्षत्रनामानि	सञ्चारवशात् फलम्
1	श्रवणम्, धनिष्ठा, रोहिणी, मृगशिरः, उत्तराषाढा	रोगभयम्, अवर्षणम्
2	आर्द्रा, पुनर्वसु, पुष्यः आश्लेषा, मघा	शस्त्रप्रयोगः, दुर्भिक्षभीतिः, व्याधिः, अवर्षणम्, सन्तापः
3	हस्तः, चित्रा, स्वाती, विशाखा, अनुराधा, ज्येष्ठा	गवामशुभः, तैलघृतमूल्यवृद्धिः, षड्रसमूल्यवृद्धिः, प्रभूतान्नता
4	उत्तराफाल्गुनी, कृत्तिका, उत्तराभद्रपद, भरणी	देहिना सप्तधातुना नाशः
5	आश्विनम्, शतभिषग्, मूलम्, रेवती	वणिजा वैद्याना नाविकानां जलोत्पन्नद्रव्याणाम् अश्वानाञ्च नाशः
6	पूर्वाफाल्गुनी, पूर्वषाढा, पूर्वभाद्रपदा	दुर्भिक्षम्, शस्त्रप्रयोगः, चौरबाहुल्यम्, रोगप्रकोपः, भीतिः।

१०.५ बुधस्य सप्तगतयः

पराशरतन्त्रे बुधग्रहस्य विविधनक्षत्रेषु सञ्चारवशात् प्राकृतादीनां सप्तगतीनां वर्णनं प्राप्यते। यासाम् आचार्यवराहमिहिरेण बृहत्संहितायां वर्णनं कृतम्।

प्राकृतविमिश्रसंक्षिप्ततीक्ष्णयोगान्तघोरपापाख्याः।
सप्तपराशरतन्त्रे नक्षत्रैः कीर्तिता गतयः।।

अन्वयः – प्राकृता, विमिश्रा, संक्षिप्ता, तीक्ष्णा, योगान्तिका, घोरा, पापाख्याः, सप्तगतयः पराशरतन्त्रे नक्षत्रैः कीर्तिताः।

प्रतिपदार्थः –

प्राकृताः	–	प्राकृतगतिः।
विमिश्रा	–	विमिश्रगतिः।
संक्षिप्ता	–	संक्षिप्तगतिः।
तीक्ष्णा	–	तीक्ष्णगतिः।
योगान्तिका	–	योगान्तिकगतिः।
घोरा	–	घोरगतिः।
पापाख्याः	–	पापानामधेयाः।
सप्तगतयः	–	सप्तसंख्याकाः गतयः।
नक्षत्रैः	–	नक्षत्रेषु सञ्चारैः।
कीर्तिताः	–	कथिताः।

व्याख्या – पराशरतन्त्रे विविधनक्षत्रेषु सञ्चारवशात् बुधस्य सप्तगतयः कथिताः। तासां नामानि क्रमशः प्राकृता, विमिश्रा, संक्षिप्ता, तीक्ष्णा, योगान्तिका, घोरा, पापादयः सन्ति। एतासां विवरणमग्रे भविष्यति।

10.5.1 प्राकृतादिगतीनां लक्षणानि

पूर्वस्मिन् श्लोके अस्माभिः बुधग्रहस्य सप्तगतीनां नामानि पठितानि। इदानीं तासां लक्षणं पठामः –

प्राकृतसंज्ञा वायव्ययाम्यपैतामहानि बहुलाश्च।
मिश्रा गतिः प्रदिष्टा शशिशिवपितृभुजगदेवानि॥

संक्षिप्तायां पुष्यः पुनर्वसुः फल्गुनीद्वयं चेति।
तीक्ष्णायां भद्रपदाद्वयं सशाक्राश्वयुक् पौष्णम्।

अन्वयः – वायव्यं याम्यं पैतामहं बहुलाः च प्राकृतसंज्ञा, शशिदेवः शिवदेवः पितृदेवः भुजंगदेवः, मिश्रा गतिः प्रदिष्टा। पुष्यः पुनर्वसुः फल्गुनीद्वयं च संक्षिप्तायां इति। भद्रपदाद्वयं सशाकाश्वयुक् सह पौष्णं तीक्ष्णायाम्।

प्रतिपदार्थः –

वायव्यम्	–	स्वातीनक्षत्रम्।
याम्यम्	–	भरणीनक्षत्रम्।
पैतामहम्	–	रोहिणीनक्षत्रम्।
बहुलाः च	–	तथा च कृत्तिकादीनि नक्षत्राणि।
प्राकृतसंज्ञा	–	प्राकृतसंज्ञेति गतिः।
शशिदेवः	–	मृगशिरः।
शिवदेवः	–	आर्द्रा।

पितृदेवः – मघा।

भुजंगदेवः – आश्लेषा।

मिश्रा गतिः – मिश्राख्या गति।

प्रदिष्टा – उक्ता।

पुष्यः – पुष्यनक्षत्रम्।

पुनर्वसुः – पुनर्वसुनक्षत्रम्।

फल्गुनीद्वयं च – पूर्वाफल्गुनी उत्तराफल्गुनी च एते नक्षत्रे।

संक्षिप्तायाम् इति – संक्षिप्तायां (गतौ) इति।

भद्रापदद्वयम् – पूर्वाभद्रपदा उत्तराभाद्रपदेति नक्षत्रद्वयम्।

सशाक्रम – ज्येष्ठानक्षत्रसहितम्।

अश्वयुक् – अश्विनीनक्षत्रम्।

सह पौष्णम् – रेवतीनक्षत्रेण सह (एतानि नक्षत्राणि)।

तीक्ष्णायाम् – तीक्ष्णाख्यां गतौ (स्मर्यन्ते)।

व्याख्या – सन्दर्भेऽस्मिन् वयं प्राकृत-मिश्रा-संक्षिप्ता-तीक्ष्णेति बुधस्य प्राकृतादिषु सप्तगतीसु गतिचतुष्टयानां ज्ञानं कुर्मः-

१. प्राकृतागतिः – बुधग्रहः यदा स्वाती-भरणी रोहणी-कृत्तिकादीनि नक्षत्राणि भेदनपूर्वकं सञ्चरति, तदा बुधस्य प्राकृतागतिर्भवति।

२. मिश्रागतिः – यस्मिन् काले बुधः मृगशिर-आर्द्रा-मघा-आश्लेषानक्षत्राणि उपमर्दयन् विचरति, तदा तस्य मिश्रागतिरूच्यते।

३. संक्षिप्तागतिः – संक्षिप्तायां गतौ बुधः पुष्य-पुनर्वसु-पूर्वाफल्गुनी-उत्तराफाल्गुनीनक्षत्राणि भेदयन् सञ्चरणं करोति।

तीक्ष्णागतिः – स्वकक्षायां भ्रमणं कुर्वन् बुधः यदा पूर्वाभाद्रपद-उत्तराभाद्रपद-ज्येष्ठा-अश्विनी-रेवतीनक्षत्रेषु विचरति, तदा तस्य तीक्ष्णागतिर्भवति।

१०.५.२ योगान्तिकादिगतीनां लक्षणानि

बुधस्य प्राकृतादिगतिषु प्राकृता-मिश्रा-संक्षिप्ता-तीक्ष्णेति चतस्रः गतयः अस्माभिः पठिताः। सम्प्रति योगान्तिका-घोरा-पापाख्यानाम् अतिरिक्तानां गतीनां विषये अध्ययनं कुर्मः।

योगान्तिकेति मूलं द्वे चाषाढे गतिः सुतस्येन्दोः।
घोरा श्रवणस्त्वाष्ट्रं वसुदैवं वारुणं चैव॥

पापाख्या सावित्रं मैत्रं शक्राग्निदैवतं चेति।

अन्वयः – इन्दोः सुतस्य मूलं द्वे आषाढे च योगान्तिका गतिः इति। श्रवणं त्वाष्ट्रं वसुदैवं वारुणं चैव घोरा। सावित्रं मैत्रं, शक्राग्निदैवतं च पापाख्या इति।

प्रतिपदार्थः –

इन्दोः सुतस्य – चन्द्रस्य पुत्रस्य (बुधस्य)।
मूलम् – मूलनक्षत्रम्।
द्वे आषाढ़े च – पूर्वाषाढा उत्तराषाढ़ा इति नक्षत्रद्वये।
योगान्तिका गतिः इति – योगान्तिका नामाख्या गा (उक्ता)।
श्रवणम् – श्रवणनक्षत्रम्।
त्वाष्ट्रम् – चित्रानक्षत्रम्।
वसुदैवम् – धनिष्ठा नक्षत्रम्।
वारुणम् चैव – शतभिषनक्षत्रम् च।
घोरा – घोराख्या गतिः।
सावित्रम् – हस्तः।
मैत्रम् – अनुराधा।
शक्राग्निदैवतम् च – विशाखा (एतानि नक्षत्राणि)।
पापाख्या इति – पापानाम्नी गतिः।

व्याख्या – सम्प्रति बुधस्य योगान्तिका-घोरा पापाख्यानां गतीनां विषये विस्तरेण पठामः –

५. योगान्तिकागतिः – यदा चन्द्रस्य पुत्रः बुधः मूल पूर्वाषाढ़ा- उत्तराषाढा-नक्षत्राणां सञ्चरणं करोति, तदा तस्य योगान्तिका गतिरुच्यते।

६. घोरागतिः – यदा बुधग्रहः श्रवण-चित्रा-धनिष्ठा-शतभिषानक्षत्रेषु सञ्चरति, तदा तस्य घोरसंज्ञिका गतिर्भवति।

७. पापगतिः – यदा बुधग्रहः हस्त-अनुराधा-विशखानक्षत्रेषु सञ्चरति, तदा तस्य पापाख्या गतिः कथ्यते। इदानीं बुधस्य सप्तगतीनां स्पष्टबोधार्थं निम्नाङ्कितां सारिणीं पश्याम–

बुधस्य प्राकृतादिसप्तगतिबोधचक्रम्

क्रमांक	गतिनामानि	बुधस्य सञ्चारनक्षत्राणि
1	प्राकृता	स्वाती, भरणी, रोहणी, कृतिका
2	मिश्रा	मृगशिरः, आर्द्रा, मघा, आश्लेषा
3	संक्षिप्ता	पुष्यः, पुनर्वसुः, पूर्वाफाल्गुनी, उत्तराफाल्गुनी
4	तीक्ष्णा	पूर्वाभाद्रपदा, उत्तरभाद्रा, ज्येष्ठा, अश्विनी, रेवती
5	योगान्तिका	मूलम्, पूर्वाषाढा, उत्तराषाढा
6	घोरा	श्रवणम्, चित्रा, धनिष्ठा, शतभिषज्
7	पापा	हस्तः, अनुराधा, विशाखा

बोधप्रश्नाः

१. बुधस्योदये किं भवति?

२. बुधस्योदये कतिविधाः उत्पाताः भवन्ति?

३. बुधस्य एकराशिभोगकालः कः?

४. रोहिणीनक्षत्रे बुधचारस्य फलं किम्?

५. बुधस्य सप्तगतीनां नामानि लिखत?

६. संक्षिप्तायां गतौ बुधस्य सञ्चारनक्षत्राणि कानि?

१०.६ बुधस्य उदयास्तदिवसात् गतीनां लक्षणं फलञ्च

फलञ्च – आचार्यवराहमिहिरेण पराशरमतेन बुधग्रहस्य उदयास्तदिवसात् प्राकृतादीनां गतीनां लक्षणं फलञ्च वर्णितम्। प्राकृतादिषु गतीषु बुधस्योदयाधारेण अस्ताधारेण च कियत् उदयदिनमानम् अस्तदिनमानं वा, किञ्च फलं भवति? इत्यस्मिन् विषये जानीमः –

उदयप्रवासदिवसैः स एव गतिलक्षणं प्राह॥

चत्वारिंशत 40 त्रिंशद् 30 द्विसमेता

विंशति 22 द्विनवकं च 29।

नव 9 मासार्द्धं 15 दश चैकं –

प्राकृतगत्यामारोग्यवृष्टिसस्यप्रवृद्धयः क्षेमम्।
संक्षिप्तमिश्रयोर्मिश्रमेतदन्यासु विपरीतम्॥

अन्वयः:- स एव उदयदिवसैः प्रवासदिवसैः गतिलक्षणं प्राह। चत्वारिंशत्, त्रिंशद् द्विसमेता विंशतिः द्विनवकं च नव मासार्द्धं दश चैकसंयुताः प्राकृताद्यानाम् प्राकृतगत्याम् आरोग्यं वृष्टिः सस्यप्रवृद्धयः क्षेमम्। संक्षिप्तमिश्रयोः मिश्रम् एतद् अन्यासु विपरीतम्।

प्रतिपदार्थः –

उदयदिवसैः - बुधस्य उदयकालिकदिवसैः।

प्रवासदिवसैः - बुधस्य अस्तकालिकदिवसैः।

स एव - पूर्वोक्तप्राकृतादीनाम्।

गतिलक्षणं प्राह - गतीनां लक्षणम् उच्यते।

चत्वारिंशत् - चत्वारिंशत् संख्याकम्।

त्रिंशद् - त्रिंशत्संख्याकम्।

द्विसमेता विंशतिः - द्वाविंशतिः संख्याकम्।

द्विनवकं च - अष्टादशसंख्याकम्।

नव - नवसंख्याकम्।

मासार्धम् - पञ्चदशात्मकम्।

दशचैकसंयुताः - एकादशसंख्याकम्।

प्राकृताद्यानाम् - पूर्वोक्तप्राकृता-मिश्रा-संक्षिप्तादीनां (क्रमशो भवति)।

प्राकृतगत्याम् - प्राकृतायां गतौ।

आरोग्यम् - निरोगता।

वृष्टिः - वर्षा।

सस्यप्रवृद्धयः - सस्यानां वृद्धिः।

क्षेमम् - शुभम्।

संक्षिप्तमिश्रयोः - संक्षिप्तमिश्रयोः द्वयोः गत्योः।

मिश्रम् - पूर्वोक्तं मिश्रितं फलम्।

एतद् अन्यासु - तीक्ष्णा-योगान्तिका-घोरा-पापगतिषु।

विपरीतम् - पूर्वस्मात् विपरीतफलम् (अनारोग्यम्, अवृष्टिः, धान्यनाशः, अक्षेमश्च) भवति।

व्याख्याः – पराशरमतानुसारेण बुधस्य उदयकालिकदिवसैः अस्तकालिकदिवसैश्च प्राकृतादीनां गतीनां लक्षणं भवति। सर्वेषां ग्रहाणां सूर्यस्यांशाभ्यन्तरे निश्चितकालांशे उदय अस्तो वा भवति, एवमेव बुधोऽपि यदा सूर्यस्य त्रयोदशकालांशाभ्यन्तरे आगमनात् अस्तं याति, बहिर्गमनात् चोदयं याति। अनेन नियमेन एव यदा बुधः प्राकृतायां गतौ (स्वाती-भरणी-रोहिणी-कृत्तिकासु सञ्चरणकाले) यदा उदयम् अथवा अस्तं याति तदा चत्वारिंशत् दिनानि पर्यतं क्रमशः उदयावस्थायाम् अस्तावस्थायाञ्च भवति। एवमेव क्रमशः मिश्रायां गतौ उदयास्तवशात् त्रिंशत् दिनानि यावत् क्रमशः उदय अस्तो वा भवति। संक्षिप्तायां गतौ उदयास्तवशात् द्वाविंशतिदिनानि यावत् क्रमशः उदयः अस्तो वा भवति।

तीक्ष्णायां गतौ उदयास्तवशात् अष्टादशदिनानि यावत् उदयः अस्तो वा भवति। अनेन प्रकारेण योगान्तिकायं नवदिनानि, घोरायां पञ्चदशदिनानि, पापायाम् एकादशदिनानि च बुधग्रहः उदयास्तवशात् उदय अस्तो वा भवति।

प्राकृतायां गतौ यदा बुधः सञ्चरति तदा आरोग्यं, वृष्टिः, धान्यवृद्धिः क्षेमं चास्य फलं स्मृतम्। संक्षिप्तायां मिश्रायाञ्च स्थितबुधस्य मिश्रितं फलं ज्ञेयम्।

तीक्ष्णा-योगान्तिका-घोरा-पापगतिषु च अनारोग्यम्, अवृष्टिः, धान्यनाशः, अक्षेमश्चेति पूर्वतः विपरीतफलं भवति।

१०.७ बुधस्य ऋज्वादिगतीनां लक्षणं तत्फलञ्च

इतः पूर्वं प्राकृतादिगतीनां विषये विस्तरेण अध्ययन कृतम्। इदानीम् आचार्यदेवलोक्तानांऋज्वादीनां चतसृणां गतीनां लक्षणं फलञ्च इदं विषयमधिकृत्य पठामः

ऋज्व्यतिवक्रावक्रा विकला च मतेन देवलस्यैताः।
पञ्चचतुर्द्व्येकाहा ऋज्व्यादीनां षडभ्यस्ताः॥

ऋज्वीहिता प्रजानामतिवक्राऽर्घं गतिर्विनाशयति।
शस्त्रभयदा च वक्रा विकला भयरोगसञ्जननी॥

अन्वयः – देवलस्य मतेन ऋज्वी अतिवक्रा वक्रा विकला एताः। पञ्चचतुर्द्व्येकाहा-षडभ्यस्ताः ऋज्व्यादीनाम्। ऋज्वी प्रजानां हिता अतिवक्रा गतिः अर्घं विनाशयति। वक्रा शस्त्रभयदा विकलां च भयरोगसञ्जननी।

प्रतिपदार्थः –

देवलस्य मतेन	–	आचार्यदेवलस्य मतेन।
ऋज्वी	–	ऋज्वीगतिः सरलरेखात्मिका गतिः।
अतिवक्रा	–	अतिवक्रागतिः अतिशयेन कुटिलागतिरित्यर्थः।
वक्रा	–	वक्रागतिः विपरीतगतिः।
विकला एताः	–	विकलाश्च एताः (बुधस्य चतस्रः गतयः सन्ति)।
पञ्चचतुर्द्व्येकाहा षडभ्यस्ताः	–	क्रमशः 5,4,2,1 संख्याः षडभ्यक्ताः।
ऋज्व्यादीनाम्	–	एतासां गतीनां (दिनमानं भवति)।
ऋज्वी	–	ऋज्वीगतिः।
प्रजानाम्	–	लोकानाम्।
हिता	–	शुभकरी।
अतिवक्रा गतिः	–	अतिवक्रानामाधेया गतिः।
अर्घं विनाशयति	–	दुर्भिक्षं करोति।
वक्रा शस्त्रभयदा	–	वक्रागतिः संग्रामभयं जनयति।
विकला च	–	तथा च विकलागतिः।
भयरोगसञ्जननी	–	भीतिं रोगादिकञ्च उत्पादयति।

व्याख्या – आचार्य देवलेन बुधग्रहस्य चतसृणां गतीनाम् उल्लेखः कृतः, एताः ऋज्वी-अतिवक्रा-वक्रा-विकलाश्चेति नामख्याः सन्ति। क्रमशः 5,4,2,1 संख्याः षड्भिः गुणितेन ऋज्व्यादीनां बुधस्य उदयास्तदिवसात् दिनमानं ज्ञायते। यथा- ऋज्वी त्रिंशत् दिनात्मिका, अतिवक्रागतिः चतुर्विंशति-दिनात्मिका, वक्रागतिः द्वादशदिनात्मिका, विकलागतिश्च षड्दिनात्मिका भवति। एवं प्रकारेण एतासु ऋज्वादिषु गतिषु ऋज्वीगतिः लोकानां शुभकरी, अतिवक्रागतिः दुर्भिक्षकर्त्री, वक्रागतिः संग्रामभयोत्पादिका, विकलागतिश्च रोगभयादिकम् उत्पादयति।

१०.८ मासवशात् बुधस्य उदयास्तफलम्

मासेषु बुधस्य उदयास्त कारणात् शुभाशुभफलमुत्पद्यते, यस्य वर्णनं वराहमिहिरेण निम्नलिखितप्रकारेण कृतम्।

पौषाषाढश्रावणवैशाखेष्विन्दुजः समाघेषु।
दृष्टो भयाय जगतः शुभफलकृत्प्रोषितस्तेषु॥

कार्तिकेऽश्वयुजि वा यदि मासे दृश्यते तनुभवः शिशिरांशोः।
शस्त्रचौरहुतभुग्गदतोयक्षुद्भयानि च तदा विदधाति॥

अन्वयः – पौषाषाढश्रावणवैशाखेषु समाधेषु इन्द्रजः दृष्टः जगतः भयाय, तेषु प्रोषितः शुभफलकृत्। शिशिरांशौः तनुभवः यदि कार्तिके अश्वयुजि मासे वा दृश्यते, तदा शस्त्रभयं, चौरभयं, हुतभुग्भयं गदभयं, तोयभयं क्षुद्भयं च विदधाति।

प्रतिपदार्थः –

पौषाषाढश्रावणवैशाखेषु	–	पौष-आषाढ-श्रावण-वैशाख-मासेषु।
समाघेषु	–	माघे सहितेषु।
इन्दुजः	–	बुधः (यदि)।
दृष्टः	–	उदितः (भवेत्, तदा)।
जगतः	–	संसारस्य।
भयाय	–	भीत्यै (भवति)।
तेषु	–	पूर्वोक्तपौषादिषु मासेषु।
प्रोषितः	–	अस्तं गतः।
शुभफलकृत	–	शुभफलं करोति।
शिशिरांशोः	–	चन्द्रस्य।
तनुभवः	–	शरीरादुत्पन्नः पुत्रः, आत्मजः।
कार्तिके	–	कार्तिकमासे।
अश्वयुजि मासे वा	–	आश्विनमासे वा (यदि)।
दृश्यते	–	उदयं याति।
तदा शस्त्रभयम्	–	तस्मिन् काले संग्रामभयम्।
चौरभयम्	–	तस्करभयम्।
हुतभुग्भयम्	–	अग्निभयम्।
गदभयम्	–	रोगभयम्।
तोयभयम्	–	जलभयम्।
क्षुद्भयं च	–	तथा च दुर्भिक्षम्।
विदधाति	–	करोति।

व्याख्या: – बुधग्रहः पौष-आषाढ-श्रावण-वैशाख-माघमासेषु यदि उदितो भवेत् तदा लोके भयमुत्पद्यते, एतेषु मासेषु बुधस्योदये सति अशुभफलमेव भवति, किन्तु पौषादिषु अस्ते सति बुधः शुभफलप्रदायको भवति। यदि चन्द्रपुत्रः बुधः कार्तिकमासे आश्विनमासे वा उदेति, तर्हि तस्मिन् काले युद्धादिभिः भयं, तरस्करभयं, रोगणामुत्पतिः, जलभयं, दुर्भिक्षञ्च जायते।

१०.९ उदयास्तवशात् बुधस्य फलम्

विविधामासेषु बुधग्रहस्य उदयास्तफलं भवद्भिः पठितम्। शत्रुभिः वेष्टितपुराणां बुध स्य उदयास्तकाले किं भविष्यति, इत्यस्मिन् विषये आचार्यःवराहमिहिरः कथयति यत् –

रुद्धानि सौम्येऽस्तगते पुत्राणि यान्युद्गते तान्युपयान्ति मोक्षम्।
अन्ये तु पश्चादुदिते वदन्ति लाभः पुराणां भवतीति तज्ज्ञाः॥

अन्वयः – सौम्ये अस्तगते यानि पुराणि रुद्धानि तानि उद्गते मोक्षम् उपयान्ति। अन्ये तज्ज्ञाः तु पश्चात् उदिते पुराणां लाभः भवति इति वदन्ति।

प्रतिपदार्थः –

सौम्ये	–	बुधग्रहे।
अस्तगते	–	अस्तावस्थायां प्राप्ते सति।
यानि पुराणि	–	यानि नगराणि।
रुद्धानि	–	शत्रुभिः संक्रान्तानि।
तानि उद्गते	–	तानि सूय्रस्य कालांशात् निष्क्रान्ते।
मोक्षम् उपयान्ति	–	मुक्तिं प्राप्नुवन्ति।
अन्ये तज्ज्ञाः तु	–	अपरे पण्डिताः तु।
पश्चात्	–	पश्चिमायाम्।
उदिते	–	उदिते बुधे।
पुराणां	–	नगराणाम्।
लाभः भवति	–	लब्धिः भवति।
इति वदन्ति	–	एवं कथयन्ति।

व्याख्याः – बुधग्रहस्य अस्तावस्थायां यानि नगराणि शत्रुभिः वेष्टितानि तानि सर्वाणि बुधस्य उदये प्राप्ते सति मोक्षं प्राप्नुवन्ति शत्रूणां सेना नगराणि विमुञ्चय गच्छति इत्यर्थः। अपरेषां केषाञ्चित् विदुषां नन्दीप्रभृतीणां मतमस्ति यत् पश्चिमायां लाभो भवति। अत्र भट्टोत्पलेन स्वटीकायां आचार्यनन्देः वचनमुद्धृतम्–

''पश्चाद्धा सौम्ये लभते पुररोधकः।
पुनः प्रागुदिते तस्मिन् पुरमोक्षं विनिर्दिशेत्॥

१०.१० बुधबिम्बस्य लक्षणं तत्फलञ्च

ग्रहाणां बिम्बः सर्वदा एकसमोः न भवति, तस्मिन् भेदः आगच्छत्येव यथा भवद्भिः भौमाचाराध्याये भौमस्य वर्णलक्षणं पठितं तथैव सन्दर्भेऽस्मिन् बुधस्य बिम्बे जायमानं वर्णभेदलक्षणं तत्फलञ्च आचार्येण उक्तं यथा–

हेमकान्तिरथवा शुकवर्णः सस्यकेन मणिना सदृशो वा।
स्निग्धमूर्त्तिरलघुश्च हिताय व्यत्यये न शुभकृच्छशिपुत्रः॥

अन्वयः-

हेमकान्तिः अथवा शुकवर्णः सस्यकेन मणिना सदृशः वा शशिपुत्रः स्निग्ध मूर्त्तिः अलघुश्च हिताय व्यत्यये न शुभकृत्।

प्रतिपदार्थ -

हेमकान्तिः - सुवर्णाभः।

अथवा शुकवर्णः - अथवा नीलपतिवर्णः।

सस्यकेन मणिना - मणिना नीलवर्णेन।

सदृशः वा - तुल्यो वा।

शशिपुत्रः - चन्द्रात्मजः बुधः।

स्निग्धमूर्तिः - निर्मलदेहः।

अलघुश्च - विस्तीर्ण बिम्बः।

हित्याय- कल्याणाय।

व्यत्यये - विपरीतावस्थायाम्।

न शुभकृत् - शुभकरः न भवति।

व्याख्याः - यस्मिन् काले बुधस्य बिम्बवर्णः सुवर्णस्य, कान्तितुल्यः, नीलपीतवर्णः, नीलमणिसदृशः, निर्मलदेहयुक्तः, विस्तीर्णबिम्बो वा दृश्येत तदा संसारस्य कल्याणं भवति। किन्तु उपरोक्तलक्षणात् भिन्नं विपरीतं वा बुधस्य वर्णः यदि भवेत् तदा लोकस्य शुभं न करोति।

बोधप्रश्ना :

७. उदयास्तदिवसात् बुधः तीक्ष्णयां गतौ कियत् दिनानि यावत् उदय अस्तो वा भवति?

८. आचार्यदेवलस्य मते बुधस्य गतीनां नामानि लिखत?

९. बुधस्य वक्रागतिः कतिदिनात्मिका भवति?

१०. केषु मासेषु बुधस्य अस्तफलं शुभप्रदं भवति?

११. पश्चिमदिशायां स्थितपुराणां लाभो कदा भवति?

10.11 सारांशः

पूर्वस्मिन् अध्याये भवद्भिः अन्तरिक्षे भौमाचारसम्बन्धित घटनानामध्ययनं कृतम्। एतस्मिन् अध्याये च बुधचारसम्बन्धितविषयानां पठनं कृतम्। सर्वप्रथमं तु वराहमिहिराचार्यस्य मतेन बुधस्योदये निश्चयेन उत्पाताः भवन्ति। ते पञ्चविधाः इति अधीतम् तदनन्तरम् आधुनिकवैज्ञानिकानां मते बुधस्याध्ययनं कृतम्। सप्तविंशतिनक्षत्रेषु बुधस्य संचरणवशात् संसारे अनेके शुभाशुभाः उत्पाताः जायन्ते। तत्र बुधस्य नक्षत्रेषु सञ्चरणवशात् अधिकांशतः अशुभफलमेव दृश्यते, हस्तादिषट्नक्षत्रेष्वेव अशुभफलैः सह प्रभूतान्नता इति शुभफलं प्राप्यते। तदनन्तरं पराशरमतानुसारेण बुधस्य प्राकृता, विमिश्रा, संक्षिप्ता, तीक्ष्णा, योगान्तिका, घोरा, पापसप्तगतयः आचार्येण लक्षणपूर्वकं वर्णिताः। केषु नक्षत्रेषु वामनवशात् बुधस्य प्राकृतादयः गतयः जायन्ते इति चक्रमाध्यमेनापि सरलरीत्या पठितम्, तथा च बुधस्य प्राकृतादिषु गतिषु बुधस्योदयाधारेण अस्ताधारेण च कियदुदयमानम् अस्तमानं वा भवतीति फलसहितं निरूपितम्। आचार्येन देवलेन ऋज्वी-अतिवक्रा-वक्रा-विकलादयः बुधस्य चतस्रः गतयः कथिताः, यासां दिनमानम्,

शुभाशुभफलञ्चाध्याये अधीतम्। एवमेव पौषादिषु मात्रेषु बुधस्य उदयादशुभफलम्, अस्तवशात् शुभफलमिति ज्ञातम्, एवमेव अन्यमासेषु अपि शुभाशुभफलं वर्णितम्।

बुधस्य अस्तावस्थायां शत्रुभिः वेष्टितानि नगराणि बुधस्य उदयप्राप्ते मोक्षं यान्ति, अर्थात् स्वतंत्राः भवन्ति। पश्चिमायां बुधभ्योदयात् पश्चिमदिशि स्थितनगराणां लाभो भवतीति अवगतम्। अध्यायस्यान्ते अन्ते च बुधग्रहस्य हेमकान्तिशुकवर्णादिबिम्बलक्षणवशात् फलमुक्त्वा अध्यायोऽयं सम्पूर्तिं गतः।

10.12 शब्दावली

अर्घक्षयः – कस्यापि पदार्थस्य मूल्यह्रासः।

मृदनन्– भेदनपूर्वकम् उपमर्दनम्।

क्षुद्भयं – खाद्यान्नस्य अभावः तेनोत्पन्नं भयम्।

प्राणभृताम् – येषां प्राणाः सन्ति ते, देहिनः प्राणिनः तेषां प्राषभृताम्।

संक्षयः – विनाशः।

सलिलजाः – सलिलं जलम्, तदुत्पन्नाः सलिलजाः, जलोत्पन्नाः, मत्स्याः कच्छपाः, मण्डूका, कमलादिपादपानि, मुक्ताप्रवालादिरत्नानि पण्यजीविका–क्रयविक्रयादिव्यापारेण येषाम् आजीविका भवति ते।

आभयाः – रोगाः।

प्रदिष्टाः– उक्ताः।

तनुभवः – शरीरात् उत्पन्नः।

तोयभयम् – जलाद् भयम्।

गदभयम् – रोगाद् भयम्।

अलघु – न लघुः, अर्थात् दीर्घबिम्बयुक्तः।

10.13 सन्दर्भग्रन्थाः

1. **बृहत्संहिता** – वराहमिहिरविरचिता, चौखम्बा विद्याभवनम्, वाराणसी।
2. **बृहत्संहिता** – भट्टोत्पलटीकासंहिता, सम्पूर्णानन्द संस्कृतविश्वविद्यालयः, वाराणसी।

10.14 सहायकग्रन्थाः

1. वाराही (बृहत्) संहिता - बलदेव प्रमाद जी मिश्रकृत भाषानुवाद सहिता, खेमराज श्री कृष्णदास प्रकाशन बम्बई।
2. Http://www.space.com/36-mercury-the=suns-closest-planetary-neighbor.html

10.15 बोधप्रश्नोत्तराणि

१. बुधस्योदये अनेकविधाः उत्पाताः भवन्ति।

२. बुधस्योदये जल-अग्नि-वायुकृद्भयम्, धान्यार्धक्षयः वृद्धिः वेति पञ्चविधाः उत्पाताः भवन्ति।

३. बुधस्य एकराशि भोगकालः प्रायशः अष्टादशदिनानि अस्ति।

४. रोहिणीनक्षत्रे बुधस्य सञ्चारवशात् अवर्षणं रोगभयञ्च भवति।

५. प्राकृता, विमिश्रा, संक्षिप्ता, तीक्ष्णा, योगान्तिका, घोरा, पापाख्याः इति बुधस्य सप्तगतयः उक्ताः।

६. संक्षिप्तायां गतौ बुधः पुष्यः, पुनर्वसुः, पूर्वाफाल्गुनी, उत्तराफाल्गुनी इति नक्षत्राणां सञ्चरणं करोति।

७. उदयास्तदिवसात् बुधः तीक्ष्णायां गतौ अष्टादशदिनानि (18) यावत् उदय अस्तो वा भवति।

८. आचार्यदेवलस्य मते ऋज्वी, अतिवक्रा, वक्रा, विकला इति बुधस्य चतस्रः गतयः सन्ति।

९. बुधस्य वक्रगतिः द्वादशदिनात्मका भवति।

१०. पौष-आषाढ-श्रावण-वैशाख-माघमासेषु बुधः यदि अस्तो भवेत् तदा तस्य शुभफलं ज्ञेयम्।

११. पश्चिमायां दिशि बुधस्योदये जाते पश्चिमदिशायां स्थितपुराणां लाभो भवति।

१०.१६ अभ्यासप्रश्नाः

१. बुधस्योदयफलं लिखत।

२. हस्तादिषु नक्षत्रेषु बुधचारस्य फलं स्पष्टयत।

३. बुधस्य सप्तगतयः सलक्षणं व्याख्यायत।

४. बुधस्य उदयास्तदिवसात् गतीनां लक्षणं प्रतिपादयत।

५. आचार्यदेवलोक्तानां ऋज्वादिगतीनां लक्षणं फलञ्च निरूपयत।

६. मासवशात् बुधस्य उदयास्तफलं लिखत।

७. बुधबिम्बस्य लक्षणं फलञ्च व्याख्यात।

◆

एकादशः पाठः (गुरुचारः पूर्वार्धम्)

पाठसंरचना

११.१ प्रस्तावना
११.२ उद्देश्यम्
११.३ महाकार्तिकादीनां षष्ट्यब्दवर्षाणां संज्ञामानानि
११.४ गुरोः संचारवशात् कार्तिकादिवर्षाणां लक्षणं तत्फलञ्च
    ११.४.१ कार्तिकादिवर्षत्रयाणां लक्षणं फलञ्च
    ११.४.२ माघादिवर्षत्रयाणां लक्षणं फलञ्च
    ११.४.३ वैशाखादिवर्षत्रयाणां लक्षणं फलञ्च
    ११.४.४ श्रावणादिवर्षत्रयाणां लक्षणं फलञ्च
    बोधप्रश्नाः
११.५ नक्षत्रेषु गुरोः संचारस्य विशिष्टं फलम्
११.६ गुरुवर्णस्य फलम्
११.७ संवत्सरपुरुषस्याविभागः तत्फलञ्च
११.८ षष्ट्यब्दानयनप्रकारः
११.९ द्वादशयुगानां नामानामाल्यधिपतयश्च
११.१० युगे युगे पञ्चवर्षाणि तेषां दैवतफलानि च
११.११ उत्तममध्यमाधमानि युगानि
    बोधप्रश्नाः
११.१२ सारांशः
११.१३ शब्दावली
११.१४ सन्दर्भग्रन्थः
११.१५ सहायकग्रन्थाः
११.१६ बोधप्रश्नोत्तराणि
११.१७ अभ्यासप्रश्नाः

११.१ प्रस्तावना

बृहत्संहिताया द्वादश पाठस्य पूर्वार्द्धभागे भवतां स्वागतम् अस्ति। अस्मिन् पाठे भवान् बृहस्पतिचारः पठिष्यति। गुरुः यस्मिन् नक्षत्रे गच्छति तस्मिन् नक्षत्रे चारो भवति। अस्मिन् अध्याये बृहस्पतिः येन नक्षत्रेण सहोदयं याति यस्मिन्नक्षत्रे स्थिते सूर्यमण्डले प्रविशति तन्नामधेयं वर्षं लोके प्रसिद्धम्। यथा रोहिणीस्थोऽस्तं गतो मृगशिरःस्थश्चोदयं प्राप्तस्तदानन्तराक्रान्त-माससंज्ञितक्रमेण वर्षं भवति। आचार्यो गुरुवर्षाणाम् उल्लेखं करोति यत द्वयोः नक्षत्रयोः कृत्तिकादिनक्षत्रात द्वयोः नक्षत्रयोः कृत्तिकादिनक्षत्राणि भवन्ति। परन्तु फाल्गुनः- भाद्रपदः, आश्विन एते त्रिषु त्रिषु नक्षत्रेषु भवन्ति। ततः आचार्यः मासक्रमः कथयति। यथा - १. कार्तिकः २. मार्गशीर्षः ३. पौषः ४. माघः ५. फाल्गुनः ६. चैत्रः ७. वैशाखः ८. ज्येष्ठः ९. आषाढः १०. श्रावणः ११. भाद्रपदः १२. आश्विन्। ततः भवान् कार्तिकादीनां द्वादशवर्षाणां फलं पठिष्यति। आचार्येण सम्यकरूपेण द्वादशवर्षाणां फलानि कथितानि। भवान् द्वादशवर्षाणां फलम् स्मिन् अध्याये पठिष्यति।

११.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् -

- ➢ कार्तिकादिषष्ट्यब्दानां संज्ञां वक्तुं पारयिष्यति।
- ➢ कार्तिकादिवर्षाणां लक्षणमभिधातुं क्षमो भविष्यति।
- ➢ नक्षत्रेषु गुरोः सञ्चरणस्य फलं निरूपयितुं कुशलो भविष्यति।
- ➢ गुरो:विविधवर्णस्य फलं प्रकटयितुं शक्ष्यति।
- ➢ संवत्सरपुरूषस्य अङ्गविभागं प्रतिपादयितुं शक्ष्यति।
- ➢ षष्ट्यब्दानयने पटुः भविष्यति।
- ➢ द्वादशयुगानां नामानि, देवान् तत्फलानि निरूपयितुं शक्ष्यति।

११.३ महाकार्तिकादीनां षष्ट्यब्दवर्षाणां संज्ञाज्ञानं

नक्षत्रेण सहोदयमुपगच्छति येन देवपतिमन्त्री।
तत्संज्ञं वक्तव्यं वर्षं मासक्रमेणैव॥

अन्वयः – देवपतिमन्त्री येन नक्षत्रेण सहोदयमुपगच्छति वर्षं मासक्रमेणैव तत्संज्ञं वक्तव्यम्।

प्रतिपदार्थः – देवपतिमन्त्री = बृहस्पतिः, उदयम् = दर्शनम्, उपगच्छति = प्राप्नोति, याति, तत्संज्ञं = तन्नामधेयं, वर्षम् वक्तव्यं = वाच्यम्।

व्याख्या – बृहस्पतिः येन नक्षत्रेण सहोदयं याति यस्मिन्नक्षत्रे स्थितः सूर्यमण्डले प्रविशति तन्नामधेयं वर्षं लोके वक्तव्यम्। तच्च मासक्रमेणैव। अन्यमासनक्षत्रेण सहास्तं गतोऽन्यमासनक्षत्रेण सहोदितः। यथा रोहिणीस्थोऽस्तं गतो मृगशिरःस्थश्चोदयं गतस्तदानन्तराक्रान्तमास-संज्ञितक्रमेण वर्षं बोद्धव्यमिति। कश्चित् कृतिकादियुक्ते गुरौ यच्चन्द्रयुक्तं नक्षत्रं चैत्रमासादितो भवति, ततो महाकार्तिकादीनि संवत्सरक्रमेण प्रभवादीनि च गणयन्ति। अन्ये सौरमानेन गणयन्ति। तद् अयुक्तम्। यस्मात् सौरमानं अधिकम् गुरुमानात्।

वर्षाणि कार्तिकादीन्याग्नेयाद् भद्वयानुयोगिनि।
क्रमशस्त्रिभं तु पञ्चममुपान्त्यमन्त्यं च यद्वर्षम्॥

अन्वयः – कार्तिकादीनि अग्नेयाद् भद्वयानुयोगिनि वर्षाणि क्रमशः त्रिभं तु पञ्चम् उपान्त्यम् अन्त्यं च यद्वर्षम्।

प्रतिपदार्थः – कार्तिकादीनि = कार्तिकमासपूर्णाणि, अग्नेयाद = कृत्तिकादिनक्षत्राद्, भद्वपानुयोगिनि = नक्षत्रद्वयानुयोगीनि, त्रिभम् = नक्षत्रत्रयम्, पञ्चम् = द्वादशवर्षेषु फाल्गुनं वर्षम्, अन्त्यम् = द्वादशवर्षेषु फाल्गुनं वर्षम्। अन्त्यम् = द्वादशवर्षेषु आश्विनवर्षम्, उपान्त्यम् = द्वादशवर्षेषु भाद्रपदवर्षम्।

व्याख्या – आचार्यवराहमिहिरः गुरुवर्षाणां उल्लेखं करोति। द्वादशमासानां क्रमेण द्वयोः नक्षत्रयोः कार्तिकादिवर्षाणि भवन्ति। परन्तु पञ्चम अर्थात् फाल्गुनः, उपान्त्यम् अर्थात् भाद्रपदः, अन्त्यम् अर्थात् अश्विनः इति वर्षाणि त्रिषु त्रिषु नक्षत्रेषु भवन्ति। ग्रन्थानुसारं मासक्रमः यथा - १. कार्तिकः २. मार्गशीर्षः ३. पौषः ४. माघः ५. फाल्गुनः ६. चैत्रः ७.वैशाखः ८. ज्येष्ठः ९. आषाढः १०. श्रावणः ११. भाद्रपदः १२. आश्विनः। केन प्रकारेण नक्षत्रानुसारं वर्षाणि भवन्ति तेषां उल्लेखः क्रियते। कृत्तिकारोहिणिभ्यां कार्तिकः। मृगशिरआर्द्राभ्यां मार्गशीर्षः। पुनर्वसुपुष्याभ्यां पौषः। आश्लेषामघाभ्यां माघः। पूर्वफाल्गुन्युत्तरफाल्गुनी हस्तैः फाल्गुनः, चित्रास्वातीभ्यां चैत्रः। विशाखानुराधाभ्यां वैशाखः। ज्येष्ठामूलाभ्यां ज्येष्ठः। पूर्वाषाढोत्तराषाढाभ्यां आषाढः।

श्रवणधनिष्ठाभ्यां श्रावण: शतभिषक्पूर्भद्रपदोत्तराभद्रपदाभि: भाद्रपद:। रेवत्यश्विनीभरणीभिश्च आश्विन:। यदि कृत्तिकायां रोहिण्याभाव स्थितो वा गुरुरूदयं याति तदा कार्तिकं वर्षं ज्ञेयम्।

१२.४ गुरो: सञ्चारवशात् कार्तिकादि वर्षाणां लक्षणं तत्फलञ्च

वराहमिहिराचार्य: गुरो: सञ्चारवशात् कार्तिकादि वर्षाणां लक्षणं तत्फलञ्च सम्यक्रूपेण प्रतिपादयति।

१२.४.१ कार्तिकादिवर्षत्रयाणां लक्षणं फलञ्च च

शकटा नलोपजीवकगोपीडाव्याधिशस्त्रकोपश्च।
वृद्धिस्तु रक्तपीतककुसुमानां कार्तिके वर्षे॥

अन्वय: – कार्तिके वर्षे शकटोपजीवानां अनलोपजीवानां गवां पीडा व्याधि शस्त्रकोपश्च रक्तपीतक-कुसुमानां वृद्धिस्तु।

प्रतिपदार्थ: – शकटोपजीवानां = शकटेन गन्त्या य उपजीवन्ति तेषाम्। अनलोपजीवानां = सुवर्णकारलोहारकारायास्कारादीनाम्। व्याधि: = रोग:, शस्त्रकोप: = युद्ध:, रक्तपीतककुसुमानां = द्रव्याणां रक्तं पीतं च पुष्पं येषां सम्भवति।

व्याख्या – आचार्य: कार्त्तिकवर्षस्यं फलं वर्णयति। स कथयति यत् कार्तिकवर्षे ये शकटेन (वाहनेन) उपजीवन्ति तेषां, सुवर्णकाराणां, लोहकाराणां, गवां च पीडा भवति। रोगा:, युद्धानि, च भवन्ति। तथा च द्रव्याणां रक्तं पीतं च पुष्पं येषां सम्भवन्ति तेषां च वृद्धिर्भवति।

सौम्येऽब्देऽनावृष्टिर्मृगाखुशलाभाण्डजैश्च सस्यवध:।
व्याधि: भयं मित्रैरपि भूपानां जायते वैरम्॥

अन्वय: – सौम्ये अब्दे अनावृष्टि: मृगा: आखव: शलभा: अण्डजा: सस्यवध: व्याधिभयं मित्रैरपि भूपानां जायते वैरम्।

प्रतिपदार्थ: – सौम्ये = मार्गशीर्षे, अब्दे = वर्षे, अनावृष्टि: = मृगा: = अरण्यवशव:, आखव: = मूषका:, शलभा: = कीटजातम्, अण्डजा: = पक्षिण:, सस्यवध: = धान्यनाश:, व्याधिभयम् = रोगभीति:, मित्रैरपि = सुहृद्भिरपि, भूपानां = राज्ञां, वैरम् = शत्रुता।

व्याख्या – आचार्य मार्गशीर्षवर्षस्य फलं कथयति यत् मार्गशीर्षवर्षे अनावृष्टिर्भवति। अरण्यवशव:, मूषका:, कीटजातय:, पक्षिण:, एतै: धान्यानां नाशो भवति। तथा च रोगभीति: भवति। राज्ञां मित्रैरपि वैरमुत्पद्यते। गर्गाचार्य: अपि कथयति –

वर्षहन्ता व्याधिकरोमिथो भेदभयावह:।
शलभाद्याकुल: सौम्यो दुर्भिक्षभयकारक:॥

शुभकृज्जगत: पोषो निवृत्तवैरा: परस्परं क्षितिपा:।
द्वित्रिगुणो धान्यार्घ: पौष्टिककर्मप्रसिद्धिश्च॥

अन्वय: – पौषो शुभकृज्जगत: निवृत्तवैरा: परस्परं क्षितिपा: द्वित्रिगुणो धान्यार्ध: पौष्टिककर्मप्रसिद्धिश्च।

प्रतिपदार्थ: – शुभकृत् = इष्टं करोति, जगत: = लोक:, निवृत्तवैरा = विगतद्वेषा, परस्परम् = अन्योन्यम्, क्षितिपा: = राजान:, द्वित्रिगुणो = द्विगुणस्त्रिगुणो वा, धान्यार्ध: = सस्यार्ध:, पौष्टिककर्मणां = पुष्टिदानां कार्याणाम्।

व्याख्या – आचार्यः पौषवर्षस्य फलं कथयति यत् पौषवर्षः लोकानां कृते कल्याणकारी भवति। राज्ञानां परस्परं विगतद्वेषा भवन्ति। धान्यस्य यन्मूल्यम् आसीत् तस्मात् द्विगुणं त्रिगुणं वा धान्यं लभ्यते। पुष्टिदानां कार्याणां प्रसिद्धिर्भवति। अतिशयेन भवति इत्यर्थः। आचार्यस्य तात्पर्यं अस्ति यत् पौषवर्षं सर्वेषां कृते कल्याणकारी भवति।

११.४.२ माघादिवर्षत्रयाणां लक्षणं फलञ्च

पितृपूजापरिवृद्धिर्माघे हार्दिश्च सर्वभूतानाम्।
आरोग्यवृष्टि धान्यार्धसम्पदो मित्रलाभश्च॥

अन्वयः – माघे पितृपूजापरिवृद्धिः सर्वभूतानां हार्दिश्च आरोग्यवृष्टि धान्यार्घसम्पदो मित्रलाभश्च।

प्रतिपदार्थः – पितृणां = पितृदेवानां, पूजापरिवृद्धिः = अर्चन-कार्ये वृद्धिर्भवति, सर्वभूतानां = सर्वप्राणिणां, हार्दिश्च = तुष्टिश्च, आरोग्यः = निरोगता, वृष्टिः = वर्षणम्।

व्याख्या – आचार्यः माघवर्षस्य फलं कथयति। माघवर्षे पितृणां पूजापरिवृद्धिर्भवति अर्थात् अधिकाधिकं जनाः पितृपूजाकर्मणि रताः भवन्ति। यतो हि मघाःनक्षत्रस्य स्वामी पितृदेवः भवति। अतः अस्मिन् माघवर्षे पितृणां तुष्टित्वात् सर्वेषां प्राणिनां हार्दिश्चिन्ततुष्टिर्भवति। तथा नीरोगता, वर्षणम्, धान्यस्यार्धसम्पत्समर्घता, एते भवन्ति। तथा मित्रलाभश्च भवति। अर्थात् माघवर्षः सर्वप्राणिणां कृते कल्याणकारी भवति। आचार्यः गर्गः अपि –

क्षेमोरोग्यं सुभिक्षं च वर्षणं शिवमेव च।
पितृपूजाः प्रवर्तन्ते माघे राज्ञां च सन्धयः॥

फाल्गुनवर्षे विन्द्यात् क्वचित्क्वचित्क्षेमवृष्टिसस्यानि।
दौर्भाग्यं प्रमदानां प्रबलाश्चौरा नृणश्चोग्राः॥

अन्वयः – फाल्गुनवर्षे क्वचित्क्वचित्क्षेमवृष्टिसस्यानि प्रमदानां दौर्भाग्यं प्रबलाश्चौरा नृपाश्चोग्राः विन्द्यात्।

प्रतिपदार्थः – क्षेमम् = कल्याणम्, वृष्टिः = वर्षणम्, सस्यं = धान्यं, विन्द्यात् = जानीयात्, प्रमदानां = स्त्रीणां, दौर्भाग्यं = दुर्भाग्यत्वं, प्रबलाः = बहवः, चौराः = तस्कराः, नृपाः = राजानः, उग्राः = क्रूराः।

व्याख्या – आचार्यः फाल्गुनवर्षस्य फलं कथयति यत् फाल्गुनवर्षे क्वचित्कल्याणं, क्वचित्वृष्टिः, क्वचित्धान्यं भवति न तु सर्वत्र। स्त्रीणां दौर्भाग्यं नृणाम् अपाल्लभ्यं भवति। तस्कराः बहवः भवन्ति। तथा राजानः क्रूराः भवन्ति।

चैत्रे मन्दा वृष्टिः प्रियमन्नं क्षेममवनिण मृदवः।
वृद्धिश्च कोशधान्यस्य भवति पीडा च रूपवताम्॥

अन्वयः – चैत्रे मन्दा वृष्टिः प्रियमन्नं क्षेमम् अवनिपा मृदवः कोशधान्यस्य वृद्धिश्च पीडा च रूपवताम् भवति।

प्रतिपदार्थः – मन्दा = अल्पा, वृष्टिः = वर्षणम्, प्रियमन्ने = सुदुर्लभमन्नं, क्षेमम् = कल्याणम्, अवनिपा = राजानः, मृदवः = अक्रूराः, कोशधान्यस्य = शिम्बिधान्यस्य, वृद्धिः = बाहुल्यम्, पीडा = कष्टं, रूपवताम् = सुरूपणाम्।

व्याख्या – आचार्यः चैत्रवर्षस्य फलं कथयति। चैत्रवर्षे वृष्टिः अल्पा भवति। सुदुर्लभमन्नस्य उत्पादनं भवति लोके कल्याणं भवति। राजानः अक्रूराः भवन्ति। शिम्बीधान्यस्य बाहुल्यं भवति। सुरूपाणां जानानां पीडा भवति। गर्गाचार्यः अपि कथयति।

मृदुप्रचारा राजानः प्रियमन्नं जनस्य च।
क्षेमारोग्यं च मृदुता चैत्रवर्षस्तथा मृदुः॥

११.४.३ वैशाखादिवर्षत्रयाणां लक्षणं फलञ्च

वैशाखे धर्मरता विगतभयाः प्रमुदिताः प्रजाः सनृपाः।
यज्ञक्रिया प्रवृत्तिर्निष्पत्तिः सर्वसस्यानाम्॥

अन्वयः – वैशाखे सनृपाः प्रजाः धर्मरता विगतभयाः समुदिताः यज्ञक्रियाप्रवृत्तिः सर्वसस्यानाम् निष्पत्तिः।

प्रतिपदार्थः – सनृपाः = राज्ञा सहिता, प्रजाः = जनाः, धर्मरताः = धर्मसक्ता, विगतभयाः = भयरहिताः, समुदिताः = प्रसन्नचित्ताः, यज्ञक्रिया = यागकर्म, प्रवृत्तिः = प्रवर्तनं सर्व सस्यानाम् = सर्वधान्यानाम्, निष्पत्तिः = संवृद्धिः।

व्याख्या – वराहमिहिराचार्यः वैशाखवर्षस्य फलं कथयति यत् वैशाखवर्षे प्रजा नृपेण सहिता धर्मासक्ता, भयरहिता, प्रसन्नचिन्ताश्च भवन्ति। यागकर्मणां प्रवर्तनं भवति। सर्वेषां धान्यानां समृद्धि र्भवति। अर्थात् आचार्यस्य तात्पर्यं अस्ति यत् राज्ञां, जनानां, यज्ञक्रियाकर्तॄणां धान्यानां च कल्याणं भवन्ति। गर्गाचार्यः –

ईतयः प्रथमं यान्ति सन्धिं कुर्वन्ति पार्थिवाः।
वैशाखे तु सस्यजन्या वृष्टयः सम्भवन्ति हि॥

ज्यैष्ठे जातिकुलधनश्रेणीश्रेष्ठा नृपाः स धर्मज्ञाः।
पीड्यन्ते धान्यानि च हित्वा कङ्गु शमीजातिम्॥

अन्वयः – ज्यैष्ठे जातीनां कुलानां धनश्रेष्ठाः श्रेणीश्रेष्ठाः नृपाः सधर्मज्ञाः धान्यानि कङ्गं शमी जातिम् च हित्वा पीड्यन्ते।

प्रतिपदार्थः – जातीनां = स्वजातीनां, कुलानां = स्वकुटुम्बानां, धनेश्रेष्ठा = अतिधनिनः, श्रेणीश्रेष्ठा = बहूनां समानजातीयनां संज्ञा श्रेणी ततः श्रेष्ठाः, नृपाः = राजानः, सधर्मज्ञाः = धर्मज्ञैर्जनैः सहिताः, धान्यानि = अन्नानि, कङ्गु = प्रियङ्गुः, शमीजातिम् = तिलादिः, हित्वा = वर्जयित्वा।

व्याख्या – वराहमिहिराचार्यः ज्येष्ठवर्षस्य फलं कथयति। ज्येष्ठवर्षे ये जातीनां प्रधानाः सन्ति, स्वकुलानां प्रधानाः सन्ति, अतिधनिनः सन्ति, समानजातीयानां प्रधानाः सन्ति तेषां पीडा भवति। धर्मज्ञैः जनैः सहिताः राजानः ते सर्वे एव पीड्यन्ते। धान्यानि पीड्यन्ते सर्वाण्येव परन्तु प्रियङ्गुः, तिलादिः एतद् वर्जयित्वा। केचित् सबीजान् इति पठन्ति।

आषाढे जायते सस्यानि क्वचिदवृष्टिरन्यत्र।
योगक्षेमं मध्यं व्यग्राश्च भवन्ति भूपालाः॥

अन्वयः – आषाढे सस्यानि क्वचिदवृष्टिरन्यत्र जायन्ते योगक्षेमं मध्यं भूपालाः व्यग्राश्च भवन्ति।

प्रतिपदार्थः – सस्यानि = धान्यानि, क्वचित् = कुत्रचित्, अवृष्टिः =

अनावृष्टि:, अन्यत्र = अपर:, जायन्ते = उत्पद्यन्ते, योग: = अलब्धलाभो योग:, क्षेमम् = लब्ध पालनं क्षेमम्, मध्यमं = सामान्यम्, भूपाला: = राजान:, व्यग्रा: = विकला: (उग्रा:)।

व्याख्या – आचार्य: आषाढवर्षस्य फलं कथयति। आषाढवर्षे क्वचित् क्वचित् धान्यानि उत्पद्यन्ते अर्थात् सर्वत्र न उत्पद्यन्ते। अन्यत्र देशेषु अनावृष्टि: भवति। लोके योगं (अलब्धभागो)क्षेमम् (लब्धपालनं)च मध्यमं भवति। अर्थात् न च अतिउत्कृष्टं न च अतिनिकृष्टम् इति औसतम्। राजान: व्यग्रा: (उग्रा:) भवन्ति। गर्गाचार्य: कथयति।

दुर्भिक्षाक्षेमजननश्चाषाढोऽन्योन्य भेदकृत्।
भूपालयुद्धजननो मध्यमक्षेमकारक:॥

१२.४.४ श्रावणादि वर्षत्रयाणां लक्षणं फलञ्च

श्रावणवर्षे क्षेमं सम्यक् सस्यानि पाकमुपयान्ति।
क्षुद्रा ये पाखण्डा: पीड्यन्ते ये च तद्भक्ता:॥

अन्वय: – श्रावणवर्षे सम्यक्क्षेमं सस्यानि पाकमुपयान्ति क्षुद्रा ये पाखण्डा: ये च तद् भक्ता: पीड्यन्ते।

प्रतिपदार्थ: – सम्यक् = निश्चितं, क्षेमम् = कुशलम्, सस्यानि = धान्यानि, पाकम् = निष्पत्ति:, उपयान्ति = भवन्ति। क्षुद्रा: = नीचजातय:, पाखण्डा: = मिथ्याचारा:, तद् भक्ता: = क्षुद्राणां पाखण्डानां भक्ता: (सेवका:), पीड्यन्ते = बाध्यन्ते।

व्याख्या – वराहमिहिराचार्य: श्रावणवर्षस्य फलं कथयति। श्रावणवर्षे सर्वेषां कृते कल्याणं भवति तथा सर्वाणि धान्यानि निश्चितं निष्पत्तिम् उपयान्ति। ये क्षुद्रा:, पाखण्डिन: सन्ति तान् कष्टं भवति। ये क्षुद्राणां पाखण्डानां भक्ता: सन्ति तान् अपि कष्टान् भवन्ति। गर्गाचार्य: सम्यक्रूपेण कथयति –

श्रावण: सस्यसम्पन्न: क्षेमोरोग्यकर: शिव:।
धान्यं समर्घतां याति सम्यक् वर्षति वासव:।
क्षुद्रान् पाखण्डिन: सर्वान् तद् भक्तांश्चोपतापयेत्॥

भाद्रपदे वल्लीजं निष्पत्तिं याति पूर्वसस्यं च।
न भवत्यपरं सस्यं क्वचित्सुभिक्षं क्वचिच्च भयम्॥

अन्वय: – भाद्रपदे वल्लीजं पूर्वसस्यं च याति निष्पतिं अपरं न सस्यं क्वचित्सुभिक्षं क्वचिच्च भयम् भवति।

प्रतिपदार्थ: – वल्लीजम् = मुद्गादिकम् (दलहन:), पूर्वम् = प्रथमम्, सस्यम् = धान्यम्, याति = प्राप्नोति, निष्पत्तिम् = परिपाकम्, अपरम् = अन्यम्, सस्यम् = धान्यम्, क्वचित् = कुत्रचित्, सुभिक्षम् = अत्यधिकं अन्नं, भयम् = भीति:।

व्याख्या – तत: आचार्य: भाद्रपदवर्षस्य फलं कथयति। भाद्रपदवर्षे मुद्गादिकं (दलहन) परिपाकं प्राप्नोति अर्थात् ये वल्लीजं सन्ति तेषां सम्यक्रूपेण निष्पति: भवति। आचार्यस्य तात्पर्यं अस्ति यत् कृषका: यदि पूर्वं अन्नं उपादयन्ति तदा सम्यक्रूपेण निष्पति: भवति। यदि पश्चाद् अन्नं उत्पादयन्ति तदा सम्यक्रूपेण निष्पत्ति: न भवति। कुत्रचित् अत्यधिकं अन्नं भवति कुत्रचित् भयं भवति। गर्गाचार्य: अपि –

प्रौष्ठपात् सस्यजननो नाशयत्यपरं च यत्।
करोति च क्वचित् क्षेमं क्वचिदक्षेमकारक:॥

आश्वयुजेऽब्देऽजस्तं पतति जलं प्रमुदिताः प्रजाः क्षेमम्।
प्राणचयः प्राणभूतां सर्वेषामन्नबाहुल्यम्॥

अन्वयः – आश्वयुजे अब्दे अजस्रं जलं पतति प्रजाः प्रमुदिताः क्षेमम् सर्वेषां प्राणभृतां प्राणचयः अत्र बाहुल्यम्।

प्रतिपदार्थः – आश्वयुजे = आश्विने, अब्दे = वर्षे, अजस्रं = निरन्तरम्, सततम्, जलम् = वर्षणम्, पतति = वर्षति, प्रजाः = जनाः, प्रमुदिताः = प्रसन्नचित्ताः, क्षेमम् = कल्याणम्, प्राणभृतां = शरीरिणां सर्वेषां अवशेषाणां, प्राणचयः = बलोपचयः, अत्र बाहुल्यम् = प्राचुर्येणसुभिक्षम्।

व्याख्या – आचार्यः आश्विनवर्षस्य फलं कथयति। अश्विनवर्षे निरन्तरं जलं पतति (वर्षति)। सर्वे प्रज्ञाः प्रसन्नचित्ताः भवन्ति तथा च सर्वेषां कल्याणं भवति। सम्पूर्णप्राणिनां बलेषु अभिवृद्धि भवति। तथा अन्नानां बाहुल्यं सुभिक्षं च भवति। गर्गाचार्यः अपि कथयति –

पर्याप्तसस्यान्नजलक्षेमश्चाश्वयुजः शिवः।
सम्प्रवृत्तोत्सवः श्रीमान् सर्वकामसुखावहः॥

अनेन प्रकारेण वराहमिहिराचार्य सम्यक्रूपेण सर्वेषां वर्षाणां फलं प्रतिपादितवान्। आचार्यः समाससंहितायां सर्वेषां वर्षाणां शुभाशुभफलं कथितवान्। यथा –

फाल्गुनचैत्राषाढः मध्याः सौम्योऽधमस्तथा ज्येष्ठाः।
वैशाखपौषमाघाः शुभफलदाः श्रावणाद्याश्च॥

शुभफलदायकम् मध्यमफलदायकम् अधमफलदायकम् ज्येष्ठः वैशाखः पौषः फाल्गुनः चैत्रः आषाढः मार्गशीर्षः माघः श्रावणः।

बोधप्रश्नाः

१. देवपतिमन्त्री कः अस्ति?
२. गुरुवर्षस्य प्रथममासः कः?
३. गुरुवर्षस्य द्वादशमासः कः?
४. पुनर्वसुपुष्याभ्यां कः मासः भवति?
५. ज्येष्ठामूलाभ्यां कः मासः भवति?
६. अनलोपजीवानां कस्मिन् वर्षे पीडा भवति?
७. कस्मिन् वर्षे पितृपूजाकर्मणि रता भवन्ति?
८. भूपालस्य को अर्थः?

११.५ नक्षत्रेषु गुरोः संचारस्य विशिष्टं फलम्

उदगारोग्यसुभिक्षक्षेमकरो वाक्पतिश्चरन् भानाम्।
याम्ये तद्विपरीतो मध्येन तु मध्यफलदायी॥

अन्वयः – वाक्पतिः भानाम् उदग् चरन् आरोग्यसुभिक्षक्षेमकरो याम्ये तद् विपरीतो मध्येन तु मध्यफलदायी।

प्रतिपदार्थः – वाक्पतिः = बृहस्पतिः, भानाम् = नक्षत्राणाम्, उदग् = उत्तरेण, चरन् = गच्छन्, आरोग्यम् = निरोगम्, सुभिक्षम् = प्रचुरान्नं, क्षेमम् = कल्याणं, याम्ये = दक्षिणे, विपरीतो = विलोमम्, मध्येन = मध्यभागेन, मध्यफलदायी = मध्यमफल दायको।

व्याख्या – वराहमिहिराचार्यः नक्षत्रेषु गुरोः संचारस्य विशिष्टं फलं कथयति। यदि बृहस्पतिः नक्षत्राणां उत्तरभागे गमनं करोति तदा आरोग्यं सुभिक्षं कल्याणं च करोति। यदि नक्षत्राणां दक्षिणभागे गमनं करोति तदा तद् विपरीतः अर्थात् आरोग्यं असुभिक्षम् अक्षेमं च करोति। यदि नक्षत्राणां मध्यभागे गमनं करोति तदा मध्यमफलदायी भवति। अर्थात् मध्यमं फलं ददाति न शुभं न वा अशुभम्।

विचरन् भद्वयमिष्टस्तत्सार्द्धं वत्सरेण मध्यफलः।
सस्यानां विध्वंसी विचरेदधिकं यदि कदाचित्॥

अन्वयः – वत्सरेण विचरन् भद्वयमिष्टस्तत्सार्द्धं सस्यानां विध्वंसी यदि विचरेदधिकं कदाचित्।

प्रतिपदार्थः – वत्सरेण = वर्षेण, विचरन् = गच्छन्, भद्वयम् = नक्षत्रद्वयम्, इष्टः = शोभनः, तत्सार्द्धं = तन्नक्षत्रद्वयं सार्द्धं, सस्यानां = अन्नानां, विध्वंसी = विनाशयति, विचरेत् = गच्छेत्।

व्याख्या – आचार्यः अन्यफलं कथयति। यदि एकस्मिन् वर्षे गुरुः नक्षत्रद्वयं विचरति तदा प्रजानां कृते शुभकरो भवति। सार्द्धं नक्षत्रद्वयं यदि वत्सरेण विचरति तदा मध्यमं फलं करोति। अर्थात् न शुभं नाशुभम् यदि अधिकं भद्वयात् सार्द्धाद्यदि कदाचिद्विचरेद् वर्षेण तदा सस्यानां विध्वंसी भवति।

११.६ गुरोः वर्णस्य फलम्

अनलभयम नलवर्णे व्याधिः पीते रणागमः श्यामे।
हरिते च तस्करेभ्यः पीडा रक्ते तु शस्त्रभयम्॥

अन्वयः – अनलवर्षे अनलभयम् पीते व्याधिः श्यामे रणागमः हरिते च तस्करेभ्यः रक्ते तु शस्त्रभयम्।

प्रतिपदार्थः – अनलवर्णे = अग्निवर्णे, अनलभयम् = अग्निभयम्, पीते = पीतवर्णे, व्याधिः = रोगः, श्यामे = कृष्णे, रणागमः = युद्धभयम्, हरिते = हरितवर्णे, तस्करेभ्यः = चौरेभ्यः, रक्ते = रुधिरे शस्त्रभयम् = आयुधभीतिः, पीडा = कष्टम्।

व्याख्या – वराहमिहिराचार्यः गुरोः वर्णानुसारं लक्षणं कथयति। यदि अग्निवर्णो बृहस्पतिः दृश्यते तदा अग्निभयं भवति। यदि पीतवर्णो बृहस्पति स्यात् तदा रोगभयं भवति। कृष्णवर्ण स्यात् तदा युद्धं भवति। हरितवर्णो बृहस्पतिस्स्यात् तदा चौरभयं भवति। यदि रक्तवर्णो स्यात् तदा शस्त्रभयं भवति।

धूमाभेऽनावृष्टिस्त्रिदशगुरौ नृपवधो दिवादृष्टे।
विपुलेऽमले सुतारे रात्रौ दृष्टे प्रजाः स्वस्थाः॥

अन्वयः – त्रिदशगुरौ धूमाभेऽनावृष्टिः दिवा दृष्टे नृपवधो रात्रौ दृष्टे विपुलेऽमले सुतारे प्रजाः स्वस्थाः।

प्रतिपदार्थः – त्रिदशगुरौ = बृहस्पतिः, धूमाभे = अग्निवर्णे, अनावृष्टिः = वृष्टिरहिता, दिवा = दिनम्, नृपवधो = राज्ञः मृत्युः, रात्रौ = निशि, विपुले = महाबिम्बे, अमले = निर्मले, सुतारे = शोभनतारे (शुभनक्षत्रे), प्रजाः = लोकाः (जनाः), स्वस्था = नीरोगाः।

व्याख्या – आचार्यः गुरोः अन्यत्फलं कथयति। यदि बृहस्पतिः आकाशे अग्निवर्णसदृशः स्यात् तदा अनावृष्टिः भवति अर्थात् अवर्षणम् भवति। यदि बृहस्पतिः दिवसभागे दृश्यते तदा राज्ञः मृत्युर्भवति। यदि गुरोः बिम्बं विस्तृतं स्यात्, निर्बलः स्यात् तदापि जानाः नीरोगाः भवन्ति।

पराशरः अपि कथयति –

कदाचिद्यत्र दृश्यते दिवा देवपुरोहितः।
राजा वा म्रियते तत्र स देशो वा विनश्यति॥

११.७ संवत्सरपुरुषस्य अङ्गविभागः तत्फलञ्च

वराहमिहिराचार्येण बृहत्संहितायां स्पष्टरूपेण संवत्सरपुरुषस्य अङ्गविभागः तत्फलं च कथितम्।

रोहिण्योऽनलभं च वत्सरतनुर्नाभिस्त्वषाढाद्वयं
सार्पं हृत्पितृदैवतं च कुसुमं शुद्धैः शुभं तैः फलम्।
देहे क्रूरनिपीडितेऽग्न्यनिलजं नाभ्यां भयं क्षुत्कृतं
पुष्पे मूलफलक्षयोऽथ हृदये सस्यस्य नाशो ध्रुवम्॥

अन्वयः – रोहिण्योऽनलभं च वत्सर तनुः नाभि तु आषाढद्वयं सार्पं हृत्पितृदैवतं च कुसुमं तैः शुद्धैः शुभं फलम् देहे क्रूरनिपीडितेऽग्न्यनिलजं नाभ्यां भयं क्षुत्कृत पुष्पे मूलफलक्षयोऽथ हृदये ध्रुवम् सस्यस्य नाशो भवति।

प्रतिपदार्थः – रोहिणी = रोहिणीनक्षत्रम्, अनलभं = कृत्तिकानक्षत्रम्, वत्सरतनुः = संवत्सरपुरुषस्य शरीरम्, आषाढद्वयम् = पूर्वाषाढोत्तराषाढे, सार्पं = आश्लेषा, हृत् = हृदयम्, पितृदैवतं = मघा, कुसुमं = पुष्पम्, शुद्धैः = सुचितैः, शुभं = कल्याणं (शुभफलम्), देहे = शरीरे, क्रूरनिपीडिते = क्रूरग्रहनिपीडिते, अग्निः = हुतवहः, अनिलो = वायुः, नाभ्यां = पीडितायामषाढाद्वयः, भयम् = भीतिः, क्षुत्कृतम् = दुर्भिक्षकृतम्, पुष्पे = मघायां, मूलफलक्षयः = मूलानां मूलप्राणवतां फलानां च आम्रादीनां क्षयः विनाशः, हृदये = आश्लेषायां, ध्रुवम् = अवश्यम्, सस्यस्य = धान्यस्य, नाशो = क्षयो भवति।

व्याख्या – आचार्यः संवत्सरपुरुषस्य लक्षणं कथयति यत् रोहिणीनक्षत्रं कृत्तिकानक्षत्रञ्च एते द्वे नक्षत्रे संवत्सरपुरुषस्य शरीरे स्तः। पूर्वाषाढोत्तराषाढा तस्यैव नाभिः, आश्लेषा नक्षत्रं तस्य हृदयम्। मघा नक्षत्रं तस्य पुष्पमिति। तस्य प्रयोजनं कथयति यत् संवत्सरपुरुषस्य शरीरं यदि शुद्धं स्यात् तदा लोके शुभं भवति अर्थात् कल्याणं भवति शुद्धस्य तात्पर्यं अस्ति यत् तैः तन्वादिभिः पापग्रहविरहितैः लोके शुभं फलं भवति। क्रूरग्रहैः अर्थात् रविभौमसौरेः यदि निपीडितः स्यात् तदा अग्न्यनिलजं भयं भवति। अर्थात् यदि रविभौमसौरैः कृत्तिकारोहिण्यौ निपीडतः स्यात् तदा अग्निजं वायुज च भयं भवति। यदि नाभिः पीडितः स्यात्। अर्थात् पूर्वाषाढोत्तराषाढे क्रूरग्रहेः पीडितः स्यात् तदा दुर्भिक्षस्य भयं भवति। यदि मघानक्षत्रं पापग्रहैः (क्रूरग्रहैः) पीडितः स्यात् तदा मूलद्रव्याणां फलानां (आम्रादीनां) विनाशो भवति। यदि आश्लेषानक्षत्रम् पीडितायां अवश्यं धान्यस्य नाशः भवति। कश्यपः अपि कथयति यत्

कृत्तिका रोहिणी चोभे संवत्सरतनुः स्मृताः।
अषाढाद्वितयं नाभी सार्पं हृत्कुसुमं मघा॥

क्रूरग्रहहते देहे दुर्भिक्षानलमारुताः।
हृदये सस्यहानिः स्यात् सौम्यैः पुष्टिः प्रकीर्तिता॥

११.८ षष्ट्यब्दानयनप्रकारः

गतानि वर्षाणि शकेन्द्रकाला-
द्धतानि रुद्रैर्गुणयेच्चतुर्भिः।
नवाष्टपञ्चाष्ट ८५८९ युतानि कृत्वा
विभाजयेच्छून्यशरागरामैः ३७५०॥

लब्धेन युक्तं शकभूपकालं
संशोध्य युक्तं शकभूपकालं
संशोध्य षष्ट्या विषयैर्विभज्य।
युगानि नारायणपूर्वकाणि
लब्धानि शेषाः क्रमशः समाः स्युः॥

अन्वयः – शकेन्द्रकालाद्धतानि गतानि वर्षाणि रुद्रैर्गुणयेच्चतुर्भिः नवाष्टपञ्चाष्टौयुतानि कृत्वा विभाजयेच्छून्यशरागरामैः लब्धेन युक्तं शकभूपकालं संशोध्य षष्ट्या विषयैर्विभज्य युगानि नारायणपूर्वकाणि लब्धानि शेषाः क्रमशः समाः स्युः।

प्रतिपदार्थः – शकेन्द्रकालाद्धतानि = शकनृपवधादारभ्याभीष्टवर्षं यावत्, गतानि = व्यतीतानि रुद्रैः = एकादशरुद्रैः अर्थात् एकादशसंख्यायां, गुणयेत् = संगुणयेत्, नवाष्टपञ्चाष्टयुतानि = अष्टभिः सहस्रैः पञ्चभिः शतैरेकोननवत्याधिकैः ८५८९ संयोज्यानि। विभाजयेत् = अपहरेत् शून्यशरागरामैः = त्रिभिः सहस्रैः सप्तभिः शतैः सार्द्धैः ३७५०। लब्धेन = फलेन, युक्तं = संयुक्तं, शक भूपकालम् = शक नृपसमयं, संशोध्य षष्ट्या = षष्ट्यापहरेत्, विषयैः = पञ्चभिः, विभज्य = भागं दत्वा, नारायणपूर्वकाणि = विष्णुप्रभृतीनि।

व्याख्या – आचार्यः षष्ट्याब्दानयनं करोति। शको नाम म्लेच्छजातयः राजानः ते यस्मिन् काले विक्रमादित्यदेवेन व्यापादिताः स कालो लोके शक इति प्रसिद्धः। शकवर्षं यावत् वर्षाणि व्यतीतानि तानि संस्थाप्य एकादशभिः गुणयेत् ततः पुनरपि चतुर्भिः गुणयेत्। एवं चतुश्चत्वारिंशता गुणितानि भवन्ति। ततो अष्टभिः सहस्रैः पञ्चभिः शतैः एकोनवत्याधिकैः युतानि एवं कृत्वा ततः त्रिभिः सहस्रैः सप्तभिः शतैः सार्द्धैः विभजेत्। लब्धफलं वर्षाणि। तानि एव बृहस्पतिराशयः। शेषं त्रिंशता सङ्गुण्य तेनैव छेदेन विभज्य अवाप्तं भागाः राशीनामधः स्थाप्याः। शेषं षष्ट्या सङ्गुण्य तेनैव छेदेन भागवाप्तं विलिप्ताः लिप्तानामधः स्थाप्यम्। ततस्तेन लब्धेन राश्यादिना फलेन शकनृपसमयं युक्तं कार्यम। वर्षेषु राशयः क्षेप्याः शेषं अधः स्थापयेत्। यतः तानि वर्षरूपाण्येव गुरोर्राशयः सम्पन्नाः। ततः संशोध्य षष्ट्यावर्षस्थाने यो असौ राशिः ततः षष्ट्या अपहरेत्। लब्धं अतीतषष्ट्याब्दाः। शेषं वर्तमानषष्ट्यब्दस्य गतवर्षाणि। यतो गुरो राशिभोग प्रमितमे वर्षम् ततः तानि अब्दानि अत्र विषयैः पञ्चभिर्विभज्य लब्धं वर्तमानषष्ट्यब्दस्य अतीतयुगानि। एतानि विष्णुप्रभृतीनि भवन्ति। पञ्चभिः भागे हृते यत् शेषं तदेव वर्तमानयुगस्य अब्दाः सविकलाः गताः। शेषं पञ्चभ्यः संशोध्य यद् अवशिष्यते तावन्ति वर्षाणि तत्र भवन्ति। अत्र प्रसंगवशात् षष्ट्यब्दानयनस्य उदाहरणं प्रस्तूयते।

गतशकवर्षम् - 1935 (सम्पादित होने वाली हार्ड कॉपी में यहाँ तक मैटर उपलब्ध हुआ है अतः यहाँ तक करेक्शन हो चुका है)

$1935 \times 11 = 21285$

$21285 \times 4 = 85140$

85140

+8589

3750)93729(24 लब्धिः
90000
शेषम् 3729 x 30

3750)111870(29 लब्धिः
108750
शेषम् 3120 x 60

3750)187200(49 लब्धिः
183750
शेषम् 3450 x 60

3750)207000(55 लब्धिः
206250

रा. अं. क. वि.

24 । 29 । 49 । 55

1935 । 00 । 00 । 00

60) 1959 । 29। 49। 55(32 लब्धिः गतषष्ट्यब्द
1920
शेषम् 39 वर्तमानषष्ट्यब्दस्य गतवर्षसंस्था

5)39(7 लब्धिः वर्तमानषष्ट्यब्दस्य गतयुगम्।
35
शेषम् 4 वर्तमानयुगस्य अब्दाः सविकलाः गताः।

एकैकमब्देषु नवाहतेषु दत्त्वा पृथग् द्वादशकं क्रमेण।
हत्वा चतुर्भिर्वसुदेवताद्यान्युडूनि शेषांशकपूर्वमब्दम्॥

अन्वयः

नवा हतेषु दत्त्वा पृथग् एकैकमब्देषु द्वादशकं क्रमेण हत्वा चतुर्भिर्वसुदेवताद्यान्यूडूनि शेषांशकम् पूर्वब्दम्।

प्रतिपदार्थः

नवा = नवभिः, एकैकमब्देषु = एकैकमवर्षेषु, द्वादशकं = द्वादशभागं, हत्वा = अपहत्वा, वसुदेवताद्यानि = धनिष्ठादीनि, उडूनि = नक्षत्राणि।

१२.९ द्वादशयुगानां नामानि अधिपतयश्च

वराहमिहिराचार्यः द्वादशयुगानां नामनि कथयति। वयम् जानिमः यत् गुरुवर्षसंख्या षष्टिः सन्ति। तेषां षष्ट्यब्दाः अपि कथयति। अत्र प्रसंगवशात् षष्ट्यब्दानां नामानि च प्रस्तूयते।

1. प्रभवः
2. विभवः
3. शुक्लः
4. प्रमोदः
5. प्रजापतिः
6. अङ्गिरा
7. श्रीमुखः
8. भावः
9. युवा
10. धाता
11. ईश्वरः
12. बहुधान्यः
13. प्रमाथी
14. विक्रमः
15. वृषः
16. चित्रभानुः
17. सुभानुः
18. तारणः
19. पार्थिवः
20. व्ययः
21. सर्वजित्
22. सर्वधारी
23. विरोधी
24. विकृतः
25. खरः
26. नन्दनः
27. विजयः
28. जयः
29. मन्मथः
30. दुर्मखः
31. हेमलम्बः
32. विलम्बः
33. विकारी
34. शर्वरी
35. प्लवः
36. शुभकृत्
37. शोभकृत्
38. क्रोधी
39. विश्वावसुः
40. पराभवः
41. प्लवङ्गः
42. कीलकः
43. सौम्यः
44. साधारणः
45. विरोधकृत्
46. परिधानी
47. प्रमादी
48. आनन्दः
49. राक्षसः
50. नलः
51. पिङ्गलः
52. कालयुक्तः
53. सिद्धार्थी
54. रौद्रः
55. दुर्मतिः
56. दुन्दुभिः
57. रूधिरोद्गारी
58. रक्ताक्षः
59. क्रोधनः
60. क्षयः

विष्णुः सुरेज्यो बलभिद्हुताशस्त्वष्टोत्तरप्रोष्ठपदाधिपश्च।
क्रमाधुगंशाः पितृविश्वसोमशक्रानलाख्याश्वि भागाः प्रदिष्टाः॥

अन्वयः – विष्णुः सुरेज्यो बलभिद् हुताशः त्वष्टाः उत्तरप्रोष्ठपदाधिपः पितृः विश्वः सोमः शक्रानलः अश्विः भगः क्रमाद्युगेशाः प्रदिष्टाः।

प्रतिपदार्थः – विष्णुः = नारायणः, सुरेज्यः = बृहस्पतिः, बलभिद् = इन्द्रः, हुताशः = अग्निः, त्वष्टा = प्रजापतिः, उत्तरप्रोष्ठपदाधिपः = अहिर्बुध्न्यः, पितृ = पितृदेवः, विश्वः = विश्वेदेवाः, सोमः = सोमदेवः, शक्रानलः = इन्द्राग्निः, अश्विः = अश्विनिकुमारः, भगः = सूर्यः।

व्याख्या – आचार्यवराहमिहिरः षष्टिसंवत्सरस्थितानां द्वादशयुगानां नामानि कथयतिः। प्रथमयुगम् नारायणः, द्वितीययुगम् बृहस्पतिः, तृतीययुगम् इन्द्रः, चतुर्थयुगम् अग्निः, पञ्चयुगम् प्रजापतिः, षष्ठयुगम् अहिर्बुध्न्यः, सप्तमयुगम् पितृदेवः, अष्टमयुगम् विश्वदेवः, नवमयुगम् सोमः, दशमयुगम् इन्द्राग्निः, एकादशयुगम् अश्विनिकुमारः, द्वादशयुगम् सूर्यः एते

देवविशेषा द्वादश क्रमाद् युगस्वामिनः उक्ताः। समाससंहितायामपि आचार्येण उक्तम्।

विष्णुगुरुशक्रहुतभुक्त्वष्टाहिर्बुध्न्यपित्र्यविश्वानि।
सौम्यमथेन्द्राग्न्याख्यं तवाश्विनमपि भाग्य संज्ञं च॥

११.१० युगे युगे पञ्चवर्षाणि तेषां दैवतं फलानि च

संवत्सरोऽग्निः परिवत्सरोऽर्क इदादिकः शीतमपूरवमाली।
प्रजापतिश्चाप्यनुवत्सरः स्यादिद्वत्सरः शैलसुतापतिश्च॥

अन्वयः – संवत्सरः अग्नि परिवत्सरो अर्कः इदादिकः शीतमयुखमाली अनुवत्सरः प्रजापतिः इद्वत्वसरः शैलसुतापतिश्च स्याद्।

प्रतिपदार्थः – संवत्सरः = प्रथमोऽब्दसंज्ञा, अग्निः = अग्निदेवः, परिवत्सरः = हितयोब्दसंज्ञा, अर्कः = सूर्यः, इदादिकः = तृतयोब्दसंज्ञा शीतमयूखमाली = चन्द्रः, अनुवत्सरः = चतुर्थाब्दसंज्ञा, , प्रजापतिः = व्रह्मा, इद्वत्वसरः = पञ्चमाब्दसंज्ञा, शैलसुतापतिः = शैलस्य आत्मजा इमा तस्याः पतिः शिवः।

व्याख्या – आचार्यवराहमिहिरेण प्रत्येकयुगस्य पञ्चवर्षाणि, तेषां च स्वामीनां, उल्लेखः स्पष्टरूपेण कृतम्। स कथयति यत् संवत्सरः, परिवत्सरः, इदावत्सरः, अनुवत्सरः, इद्वत्सरः, एतानि पञ्चवर्षाणि भवति, तत्र यः प्रथमवर्षः संवत्सरः तस्य ·स्वामी अग्निदेवः भवति। द्वितीयवर्षः परिवत्सरः तस्य स्वामीः सूर्यः, तृतीयवर्षः इदावत्सरः तस्य स्वामी चन्द्रः, चतुर्थवर्षः अनुवत्सरः तस्य स्वामी व्रह्मा, पञ्चवर्षः, इद्वत्स्वरः तस्य स्वामी शिवः (रुद्रः) भवति।

विशेषः – वेदाङ्गज्योतिषेऽपि पञ्चवर्षाणि युगं भवति। गर्गादिनां आचार्याणां अपि मतं अस्ति यत् पञ्चवर्षाणि युगं भवति। परन्तु तैत्तिरीयब्राह्मणे चतुर्वसंवत्सराणां उल्लेखः दृश्यते।

"अग्निर्वा संवत्सरः। आदित्यः परिवत्सरः। चन्द्रमा इदावत्सरः। वायुरनुवत्सरः।"

तै. ब्रा. 1/4/10

एकस्मिन् स्थाने पञ्चसंवत्सराणां उल्लेखः अस्ति, परन्तु अनुवत्सरस्य उल्लेखो नास्ति।

"संवत्सरोसि परिवत्सरोसि। इदावत्सरोसीदुवत्सरोसि इद्वत्वरोसि वत्सरोसि।"

तै.ब्रा. 3/10/4

वराहमिहिराचार्येण पञ्चसंवत्सराणां उल्लेखः कृतम्। यः निर्विवादः अस्ति।

वृष्टिः समाधे प्रमुखे द्वितीये प्रभूततोया कथिता तृतीये।
पशञ्जलं मुञ्चति यच्चतुर्थं स्वल्पोदकं पञ्चमब्दमुक्तम्॥

अन्वयः – आद्ये समा वृष्टिः द्वितीये प्रमुखे प्रभूततोया तृतीये पश्चाद यच्चतुर्थं जलं मुञ्चति पञ्चममब्दं स्वल्पोदकं उक्तम्।

प्रतिपदार्थः – आद्ये = प्रमथे, समा = न चातिबह्वी न चात्यतपा अर्थात् मध्यमः, वृष्टिः = जलं, प्रमुखे = प्रथमभागे, प्रभूततोया = बुहुजला, पश्चाद् = द्वितीयभागे, मुञ्चति = वर्षति, अब्दं = वर्षं, स्वल्पं = अल्पं (न्यूनं) उदकं = जलम्, उक्तं = कथितम्।

व्याख्या – वराहमिहिराचार्यः संवत्सराणां फलं कथयति। स कार्थयति यत् कस्मिन् संवत्सरे वर्षा अधिका भवति, कस्मिन् संवत्सरे वर्षा मध्यमा भवति तथा च कस्मिन् संवत्सरे वर्षा न्यूना भवति। अर्थात् प्रथमवर्षे संवत्सरः भवति। तस्मिन् वर्षे वर्षा समा भवति अथर्ज़त् न

च अतिवघ्नी न च अतिन्यूना। द्वितीयं वर्षम् परिवत्सरः तस्मिन् समये प्रथमभागे अर्थात् आदि एव वृष्टिर्भवति। तृतीयम् वर्षम् इदावत्सरः तस्मिन् समये द्वितीये भागे जलं भवति। चतुर्थवर्षम् अनुवत्सरः। तस्मिन् समये सम्यक् वृष्टिः भवति। पञ्चमवर्षम् इदवत्सरः। तस्मिन् समये अल्पं अर्थात् न्यूनं जलं वर्षति। अस्मिन् समये द्वितीये भागे जलं भवति। चतुर्थवर्षम् अनुवत्सरः। तस्मिन् समये सम्यक् वृष्टिः भवति। पञ्चमवर्षम् इद्वत्सरः। तस्मिन् समये अल्पं अर्थात् न्यूनं जलं वर्षति।

११.११ उत्तरमध्यमाधमानि युगानि

चत्वारि मुख्यानि युगान्यथैषां
विष्णवन्द्रजीवा नलदैवतानि।
चत्वारि मध्यानि च मध्यमानि
चत्वारि चान्त्यान्यधमानि विन्धात्॥

अन्वयः – एषां चत्वारि युगानि मुख्यानि विष्णिवन्द्रजीवानल दैवतानि चत्वारि मध्यानि च मध्यमानि चत्वारि च अन्त्यानि अधमानि विन्धात्।

प्रतिपदार्थः – एषां = द्वादशानां गुणानां, मुख्यानि = उत्तमफलानि, विष्णुः = नारायणः, इन्द्रः = इन्द्रदेवः, जीवो = बृहस्पतिः, अनलः = अग्निः, दैवतानि = देवाः, मध्यानि = न आदि न अन्त्यः मध्ययुगानि मध्यमानि = मध्यफलानि, अन्त्यानि = अन्तिमयुगानि, अधमानि = दुष्ट फलानि, विन्धात् = जानीयात्।

व्याख्या – वराहमिहिराचार्यः उत्तममध्यमाधमयुगानां फलं कथयति। भवान् पूर्वमेव पठितवान् यत् विष्णु, गुरु, इन्द्रः, अग्निः, त्वष्टा, अहिर्बुध्न्य पितृ, विश्वः, सोमः, इन्द्राग्निः, आश्विनः, भाग्यसंज्ञकश्च। द्वादशयुगेशाः भवन्ति।

एषां द्वादशानां युगानां चत्वारि युगानि उत्तमफलानि प्रयच्छन्ति। कानि तानि? विष्णुः, इन्द्रः, बृहस्पतिः अग्निः, अर्थात् विष्णुदैवतं प्रथमम्, इन्द्रदैवतं तृतीयम्। बृहस्पतिदैवतं द्वितीयम्। अग्निदैवतं चतुर्थम्। एतानि युगानि उत्तमफलानि प्रयच्छन्ति। चत्वारि युगानि मध्यानि मध्यफलानि प्रयच्छन्ति। कानि तानि? त्वष्टदैवतम्। अहिर्बुध्न्यदैवतम्। पितृदैवतम्। विश्वदैवतम्। एतानि युगानि मध्यफलानि प्रयच्छन्ति। तथा च अन्त्यानि चत्वारि, सौमदैवतम्। इन्द्राग्नि दैवतम्। अश्विदैवतम्। भागाख्यदैवतम् एतानि युगानि दुष्टफलानि जानीयात्। समास-सँहितायां अपि आचार्यः कथयति –

चत्वारि युगान्यादौ शुभानि मध्यानि मध्यमफलानि।
चत्वार्यन्त्यानि न शोभनानि वर्षैर्विशेषोऽत्र॥

बोधप्रश्नाः

९. यदि बृहस्पतिः नक्षत्राणां उत्तरभागे गमनं करोति तदा .... करोति।

१०. यदि गुरुः नक्षत्राणां मध्यभागे गमनं करोति तदा ...... करोति।

११. अग्निवर्णस्य बृहस्पति .... ददाति।

१२. द्वादशयुगानां प्रथमनाम लिखतु।

१३. संवत्सराणां संख्या लिखतु।

१४. परिवत्सरे कस्मिन् भागे वृष्टिः .... भवति।

१५. अन्त्यानि चत्वारि युगानि ...... जानीयात्।

११.१२ सारांशः

अस्मिन् पाठे भवता बृहस्पतिचारस्य पूर्वार्धः अधीतम् आचार्येण सम्यग्रूपेण बृहस्पतिचारम् अस्मिन् पाठे प्रतिपादितम्। भवान् पठितवान् यत् बृहस्पतिः येन नक्षत्रेण सहोदयं याति तन्नाम धेयं वर्षं लोके वक्तव्यम्। ततः गुरुवर्षाणां उल्लेखं कृतवान्। द्वादशमासानां क्रमेण द्वादशवर्षाणि भवन्ति। तेषु कृत्तिका नक्षत्रात् द्वयोः द्वयोः नक्षत्रयोः कार्त्तिकादिवर्षाणि भवन्ति। परन्तु पञ्च अर्थात् फाल्गुनः उपान्त्यम् अर्थात् भाद्रपदः, अन्त्यम् अर्थात् आश्विनः वर्षाणि त्रिषु त्रिषु नक्षत्रेषु वर्षाणि भवन्ति। यथा १. कार्तिक २. मार्गशीर्षः ३. पौषः ४. माघः ५. फाल्गुनः, ६. चैत्र ७. वैशाख ८. ज्येष्ठः ९. आषाढः १०. श्रावण ११. भाद्रपदः १२. आश्विनः। ततः आचार्यः कार्तिकादिवर्षाणां फलं कथितवान्। कार्तिकवर्षे रोगा युद्धानि च भवन्ति। मार्गशीर्षवर्षे अनावृष्टिः भवति। पौषवर्षे लोकानां कृते कल्याणकारी भवति। माघवर्षे अधिकाधिकं जनाः पितृपूजाकर्मणि रता भवन्ति। फाल्गुनवर्षे क्वचित्कल्याणं क्वचित्वृष्टिः भवति। चैत्र वर्षे वृष्टिः अल्पा भवति। वैशाखवर्षे प्रजा नृपेण सहिता धर्मसक्ताः भयरहिताः च भवन्ति। आषाढवर्षे क्वचित् क्वचित् धान्यानि उत्पद्यन्ते। श्रावणवर्षे सर्वेषां कृते कल्याणं भवति। भाद्रपदवर्षे मुद्गादिकं परिपाकं प्राप्नोति। आश्विनवर्षे निरन्तरं जलं पतति।

ततः आचार्यः नक्षत्रेषु गुरोः संचारस्य विशिष्टं फलं कथितवान्। यदि बृहस्पतिः नक्षत्राणां उत्तरभागे गमनं करोति तदा कल्याणं करोति। यदि दक्षिणभागे गमनं करोति तदा तद् विपरीतः करोति। यदि मध्यमाने गमनं करोति तदा मध्यमं फलं ददाति। ततः भवान् गुरोः वर्णानुसारं लक्षणं पठितवान्। अग्निवर्षस्य बृहस्पतिः अग्निभयं ददाति। पीतवर्णस्य बृहस्पतिः रोगभयं ददाति। पीतवर्णस्य बृहस्पतिः रोगभयं ददाति। कृष्णवर्णस्य बृहस्पतिः युद्धं कार्याणि। हरितवर्णस्य बृहस्पतिः चौरभयं ददाति। ततः आचार्यः संवत्सरपुरुषस्य लक्षणं षष्ठ्यब्दानयनप्रकारश्च कृतवान्। द्वादशयुगानां नामानि तेषां अधिपतयश्च सम्यक्रूपेण भवान् अधीतवान्। संवत्सरः, परिवत्सरः, इदावत्सरः, अनुवत्सरः, इद्वत्सरः, एतानि पञ्चवर्षाणि भवन्ति। तेषां अधिपतिः अपि अधीतवान्। अनेन प्रकारेण बृहस्पतिचारस्य पूर्वार्द्धं सम्यक् रूपेण अधितवान्।

११.१३ शब्दावली

१. देवपतिमन्त्री = गुरुः ।
२. शस्त्रकोपः = युद्धम् ।
३. अब्दः = वर्षम् ।
४. सस्यवधः = धान्यनाशः ।
५. व्याधिभयम् = रोगभीतिः ।
६. शलभाः = कीटजातयः ।
७. प्रमदानां = स्त्रीणाम् ।
८. विगतभयाः = भयरहिताः ।
९. शमीजातिम् = तिलादिः ।
१०. आश्वयुजे = आश्विने ।
११. भानाम् = नक्षत्राणाम् ।
१२. व्याधिः = रोगः ।

१३. अनावृष्टिः = वृष्टिरहिता ।

१४. अमले = निर्मले ।

१५. हृदये = आश्लेषायां ।

१६. शकभूपकालम् = शक नृप समयं ।

१७. बलभिद् = इन्द्रः ।

१८. भगः = सूर्यः ।

१९. मुञ्चति = वर्षति ।

२०. जीवः = बृहस्पतिः ।

२१. अनलः = अग्निः ।

११.१४ सन्दर्भग्रन्थाः

1. बृहत्संहिता- व्याख्या डॉ. सुरकान्त झा, चौखम्बा-संस्कृत-सीरिज-ऑफिस, वाराणसी।

११.१५ सहायकग्रन्थाः

१. बृहत्संहिता- व्याख्या - प्रो. नागेन्द्र पाण्डेयः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

२. प्राचीनभारतस्य भौगोलिकस्वरूपम्-लेखकः - डॉ. कृष्णकुमारः, मयंक प्रकाशन, मिश्राबाग हनुमानगढी, कलखलः, हरिद्वारः।

३. सूर्यसिद्धान्तः- व्याख्या - पं. कपिलेश्वरशास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी।

४. सिद्धान्तशिरोमणि- व्याख्या - बापूदेव शास्त्री, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी।

५. बृहत्संहिता- व्याख्या - सुरेशचन्द्रमिश्रः, रञ्जनपब्लिकेशन, दरियागंज, दिल्ली।

६. संस्कृत-हिन्दी-कोशः- वामनशिवरामआप्टे, मोतीलालबनारसीदास, पब्लिशर्स, प्रा. लि. दिल्ली।

११.१६ बोधप्रश्नोत्तराणि

१. बृहस्पतिः

२. कार्तिकः

३. आश्विनः

४. पौषः

५. ज्येष्ठः

६. कार्तिकवर्षे

७. माघवर्षे

८. राजा

९. कल्याणं ।

१०. मध्यमफलं ।

११. अग्निभयम् ।

१२. विष्णुः ।

१३. पञ्च ।

१४. प्रथमभागे ।

१५. दुष्टफलानि ।

११.१७ अभ्यासप्रश्नाः

१. महाकार्तिकादीनां षष्ट्यब्दवर्षाणां संज्ञाज्ञानम् लिखत।

२. गुरोः सञ्चारवशात् कार्तिकादि वर्षाणां लक्षणं तत्फलञ्च प्रतिपाद्यताम्।

३. माघादिवर्षत्रयाणां लक्षणं लिखत।

४. श्रावणादिवर्ष त्रयाणां लक्षणं लिखत।

५. गुरोः वर्णस्य फलं प्रतिपाद्यताम्।

६. षष्ट्ब्दानयनप्रकारः सम्यक् लिखत।

◆

द्वादशः पाठः (गुरुचारः उत्तरार्धम्)

पाठसंरचना

१२.१ प्रस्तावना।
१२.२ उद्देश्यम्।
१२.३ प्रभवसंवत्सरस्य फलम्।
१२.४ विभवादिसंवत्सराणां नामानि तेषां फलानि च।
१२.५ द्वितीययुगान्तर्गतानां संवत्सराणां नामानि फलानि च।
१२.६ तृतीयचतुर्थयुगान्तर्गतानां संवत्सराणां नामानि फलानि च।
१२.७ पञ्चमषष्ठयुगान्तर्गतानां संवत्सराणां नामानि फलानि च।
बोधप्रश्नाः
१२.८ सप्तमाष्टमयुगान्तर्गतानां संवत्सराणां फलानि।
१२.९ नवमदशमयुगान्तर्गतानां संवत्सराणां फलानि।
१२.१० एकादशद्वादशयुगान्तर्गतानां संवत्सराणां फलानि।
    १२.१०.१ क्षयसंवत्सरस्य विशेषफलकथनम्।
१२.११ गुरोः बिम्बलक्षणं तत्फलञ्च।
बोधप्रश्नाः
१२.१२ सारांशः।
१२.१३ शब्दावली।
१२.१४ सन्दर्भग्रन्थाः।
१२.१५ सहायकग्रन्थाः।
१२.१६ बोधप्रश्नोत्तराणि।
१२.१७ अभ्यासप्रश्नाः।

१२.१ प्रस्तावना

पूर्वस्मिन् पाठे भवान् बृहस्पतिचाराध्यायस्य कार्तिकादीनां मासानां, पष्ठ्यब्दानां संज्ञामानानि, सलक्षणं मासफलञ्च पठितवान्। तत्र मध्यममानेन गुरो एकराभिसञ्चारवशात् सम्वत्सरः प्रभवति। यथोक्तं –

> **''बृहस्पतेर्मध्यमराशिभोगात, संवत्सरं साहितिका वदन्ति''**
> –भास्कराचार्यः (सि. शिरोमणौ)

एवमत्र बृहस्पतिचारे संवत्सरस्य आनयनप्रकारसहितः युगे तेषां फलानि च वर्णितानि सन्ति। प्रस्तुतपाठे प्रभवादीनां षष्ठिसंवत्सराणां नामानि सफलानि वर्णितानि सन्ति। प्रत्येकयुगान्तर्गतानां संवत्सराणां फलानि, क्षयसंवत्सरस्य लक्षणानि, तेषां फलानि गुरोः बिम्बलक्षणानि फलानि च मुख्यरूपेण प्रतिपादिताः विषयाः भविष्यन्ति। संवत्सरज्ञाने तेषां फलज्ञाने च भयं पाठः विभेषेण लाभदायको भविष्यति। अस्यैव संवत्सरस्य शुभाशुभफलानि पञ्चाङ्गेपु प्रतिपादितानि भवन्ति। येन वर्षा-महर्घादीनां विषयाणां ज्ञानं संभवते।

१२.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् –

- प्रभवादीनां षष्ठिसंवत्सराणां नामानि ज्ञातुं समर्थः भविष्यति।

- संवत्सराणां शुभाशुभफलज्ञाने पतुः भविष्यति।
- द्वादशयुगेषु संवत्सरस्य वैशिष्ट्यप्रतिपादने सक्षमः भविष्यति।
- क्षयसंवत्सरज्ञाने कुशलो भविष्यति।
- क्षयसंवत्सरगतवैशिष्ट्यप्रतिपादने समर्थः भविष्यति।
- बृहस्पतेः बिम्बगतलक्षणज्ञाने पतुः भविष्यति।
- गुरोः बिम्बेषु पतितशुभाशुभफलनिर्धारणे सक्षमो भविष्यति।

१२.३ प्रभवसंवत्सरस्य फलम्

संवत्सराणां संख्या तेषां नामानि भवान् पूर्वपाठे पठितवान्। अग्रे षष्ट्यब्दस्य प्रथमवर्षस्य प्रभवस्य प्रवृत्तेः कालं कथयति।

आद्यं धनिष्ठांशमभिप्रपन्नो माघे यदा यात्युदयं सुरेयः।
षष्ट्यब्दपूवः प्रभवः स नाम्ना प्रपद्यते भूतहितस्तदाब्दः॥

अन्वयः – सुरेज्यः आद्यं धनिष्ठां शं अभिप्रपन्नो माघे यदा याति उदयं षष्ट्यब्दपूर्वः स प्रभवनाम्ना प्रपद्यते तद् अब्दः भूतहितः।

प्रतिपदार्थः – सुरेज्यः = गुरुः, आद्यं = प्रथमम्, धनिष्ठांशं = धनिष्ठायाः प्रथमपादम्, अभिप्रपन्नः = स्थितः, माघे = माघमासे, षष्टयब्दपूर्वः = षष्ट्यब्दस्य प्रथमं वर्षम्, प्रभवनाम्ना = प्रभवसंज्ञः, प्रपद्यते = प्रवर्तते, तद् = सः, अब्दः = वर्षम्, भूतहितः = भूतानां सत्त्वानां हितंऽनुकूलम्।

व्याख्या – वराहमिहिराचार्यः प्रभवाख्यस्याब्दस्य प्रवृत्तिकालं कथयति। बृहस्पतिः प्रथमं धनिष्ठायाः प्रथमपादे स्थितो माघे मासे यदा यस्मिन् काले उदयं याति। अर्थात् सूर्यमण्डलाद् उद्गच्छति तदा तस्मिन् काले षष्ट्यब्दस्य प्रथमं वर्षम् भवति। स च प्रभवनाम्ना प्रवर्तते। अर्थात् तस्य प्रारम्भं भवति। एतत् चान्द्रेण मानेन यो मासः तत्र सम्भवति न तु सौरमानेन। कृतदृक्कर्मद्वयो गुरुर्यदा राशिवकाद् भागत्रयोविंशतेर्लिप्ताविशते श्चार्वाग्भवति, सर्पश्च राशिदशकं शड् भागान् द्वादशलिप्ताश्च भुक्त्वा स्थितो भवति तदैतत् सम्भवति नान्यत्रेति। अर्थात् दृक्कर्मसंस्कारस्य पश्चाद् यदि गुरु रा अं क.

9 / 23 / 20 भुक्त्वा स्थितो भवति।

सूर्य रा. अं. क.

10 / 6 / 12 भुक्त्वा स्थितो भवति।

तदैतत्सम्भवति अन्यथा न भवति। ततः अग्रे कथयति वर्षम कीदृशम्? सत्त्वानां भूतानां अनुकूलं भवति।

क्वचित्त्ववृष्टिः पवनाग्निकोपः
सन्तीतयः श्लेष्मकृताश्च रोगाः।
संवत्सरेऽस्मिन् प्रभवे प्रवृत्ते
न दुःखमाप्नोति जनस्तथापि॥

अन्वयः – अस्मिन् प्रभवे संवत्सरे प्रवृत्ते क्वचित्त्ववृष्टिः पवनाग्निकोपः ईतयः सन्ति। श्लेष्मकृताः रोगाः तथापि जनः न दुःखं आप्नोति।

प्रतिपदार्थ: – प्रभवे = प्रभवारण्ये, संवत्सरे = वर्षे, प्रवृत्ते = प्रतिपन्ने, वृष्टि: = जलवर्षणम् पवन: = आयु:, अग्नि: = दाहक:, कोप: = प्रकोप:, ईतय: = अतिवृष्ट्यादय:, सन्ति = भवन्ति, श्लेष्मकृता: = कफोत्पन्ना:, रोगा: = दैहिककष्टा:, आप्नोति = प्राप्नुवन्ति।

व्याख्या – अस्मिन् प्रभवारण्ये वर्षे प्रतिपन्ने सति क्वचिद् अनावृष्टि: भवति, न सर्वत्र भवति। तथा वायुप्रकोप: अग्निप्रकोपश्च क्वचिद् भवति। तथा अतिवृष्ट्यादय उपद्रवा: भवन्ति। कफोत्पन्ना: रोगा क्वचिद् भवन्ति। तथापि जनो न दु:खं लभते।

१३.४ विभवादि संवत्सराणां नामानि तेषां फलानि च

तस्माद् द्वितीयो विभव: प्रदिष्ट: शुक्लस्तृतीय: परत: प्रमोद:।
प्रजापतिश्चेति पथोत्तराणि शस्तानि वर्षाणि फलान्ययैषाम्॥
निष्पन्नशालीक्षुयवादिसस्यां भयैर्विमुक्ताभुवशान्तवैराम्।
संहृष्टलोकां कलिदोषमुक्तां क्षत्रं तदा शास्ति च भूतधात्रीम्॥

अन्वय: – तस्माद् द्वितीयो विभव: प्रदिष्ट:, तृतीय: शुक्ल:, परत: प्रमोद: प्रजापतिश्चेति यथोत्तराणि शस्तानि अथा एषां वर्षाणि फलानि। तदा क्षत्रं शासित निष्पन्ना: शालय: इक्षव: यवादय: भयै: विमुक्तां उपशास्तवैरां संहृष्टलोकां कलिदोषमुक्ताम्।

प्रतिपदार्थ: – विभव: = विभवनाम्ना संवत्सर:, प्रदिष्ट: = उक्त:, शुक्ल: = शुक्लनाम्ना संवत्सर:, परत: = अन्तरं, प्रमोद: = प्रमोदनाम्ना संवत्सर:, प्रजापति: = प्रजापतिनाम्ना संवत्सर:, इति शब्द: = प्रकाराय, यथोत्तराणि = उत्तरोत्तराणि, शस्तानि = शुभानि, शत्रम् = राजवर्ग:, शास्ति = पालयति, निष्पन्ना = निष्ठा:, शालय: = तुषधान्या:, (धान) इक्षव: = इक्षुरसा: यस्मात् उत्पन्ना: भवन्ति ते इक्षव:, (गन्ना:), भयै: = दु:खै:, विमुक्तां = वर्जितां, उपशान्तवैरां = नष्टद्वेषाम्, संहृष्टलोकां = प्रहृष्टजनाम्, कलिदोषमुक्तां = कलियुगे ये दोषा अधर्म- व्याधि-दारिद्र-शोक -अकालमृत्यु-प्रभृतय: तै: रहिताम्।

व्याख्या – वराहमिहिराचार्य: विभवादि चतुर्णां संवत्सराणां फलं कथयति। तस्मात् प्रभवाद् द्वितीयवर्षम् विभवनाम्ना उक्त:। तृतीय: शुक्ल:, अनन्तरं चतुर्थ: प्रमोद:, प्रजापति पञ्चमश्चेति। एतानि वर्षाणि उत्तरोत्तराणि शुभानि भवन्ति। अर्थात् एतानि वर्षाणि अनन्तरक्रमेण फलानि भवन्ति। तदा तस्मिन् युगे राजवर्ग: वसुन्धराम् एवं विधां पालयन्ति यस्मात् तुषधान्या:, इक्षव: (गन्ना), यवादय:, धान्यानि, उत्पद्यन्ते। तथा जना: दु:खरहिता:, द्वेषरहिता:, प्रसन्नचित्ता: भवन्ति। कलियुगे ये दोषा: अर्थात् अधर्म-व्याधि-दारिद्र-शोक-अकालमृत्यु-प्रभृतय: तै: रहिता:।

१२.५ द्वितीययुगान्तर्गतानां संवत्सराणां नामानि फलानि च

अधोऽङ्गिरा: श्रीमुखभावसाह्वौ युवा सुधातेति युगे द्वितीये।
वर्षाणि पञ्चैव यथाक्रमेण त्रीण्यत्र शस्तानि समे परे द्वे॥
त्रिष्वाद्यवर्षेषु निकामवर्षो देवो निरातङ्कभयश्च लोक:।
अब्दद्वयेऽन्त्येऽपि समा सुवृष्टि: किन्त्वत्र रोगा: समरागमश्च॥

अन्वय: – द्वितीये आद्य: अङ्गिरा: श्रीमुख: भावसाह्वो, युवा, सुधाता पञ्च वर्षाणि यथाक्रमेण त्रीणि शस्तानि परे द्वे समे आधेषु त्रिषु वर्षेषु देव: निकामं वर्षो लोक: निरातङ्कभय: अन्त्ये अब्दद्वये सुवृष्टि: समा किन्तु वर्षद्वये रोगा: समरागमश्च।

प्रतिपदार्थ: – द्वितीये = बार्हस्पत्ययुगे, आद्य: = प्रथम:, अङ्गिरा: = अङ्गिरासंज्ञकसंवत्सरे, श्रीमुख: = श्रीमुखसंज्ञकसंवत्सरे, भावसाह्वो = भावसे व्याह्व: संज्ञा यस्य संवत्सरस्य, युवा =

युवासंज्ञकसंवत्सरः, सुधाता = सुधातासंज्ञक संवत्सरः, त्रीणि = अङ्गिरा-श्रीमुख-भावसंवत्सराणि शस्तानि = शोभनानि, परे = पश्चिमे, द्वे = युवा-सुधातासंवत्सरौ, समे = न शुभे नापि अशुभे, आद्येषु = प्रथमेषु, त्रिषु = अङ्गिरा-श्रीमुख-भावसंवत्सरेषु, देवः = इन्द्रः, निकामं = पर्याप्तं, वर्षो = वर्षति, लोकः = जनः, निरातङ्कभ्यः = आतङ्क उपद्रवो भयं भीतिश्च निर्गता अतिवधमानायस्य, अन्त्ये = पश्चिमे, अब्दद्वये = युग्मद्वये = युग्मवर्षे युवा - सुधातासंवत्सरे, सुवृष्टिः = शोभना वृष्टिः, समा = तुल्या (औसतम्) अर्थात् नातिवह्वी नाति-अल्पा यथा कालोपयोग्या, वर्षद्वये = युवा-सुधातसंवत्सरौ, रोगाः = गदाः, समरागमश्च = समरः संग्रामः तस्य आगमः प्राप्तिः।

व्याख्या – वराहमिहिराचार्यः द्वितीययुगान्तर्गतानां संवत्सराणां नामानि फलानि च कथयति। द्वितीये बार्हस्पत्ययुगे प्रथमोऽब्दोऽङ्गिराः, द्वितीयः श्रीमुखः, तृतीयो भावः, चतुर्थो युवा, पञ्चमः सुधाता एतानि पञ्चवर्षाणि यथाक्रमेण परिपठितानि स्थितानि। अत्र अस्मिन् युगे त्रीणि वर्षाणि अर्थात् अङ्गिरा-श्रीमुख-भावसंवत्सराणि शोभनानि भवन्ति। परे अर्थात् पश्चिमे युवा-सुधाता द्वे वर्षे समे अर्थात् न शुभं नापि अशुभं भवतः। प्रथमेषु त्रिषु वर्षेषु अर्थात् अङ्गिरः, श्रीमुखभावसंवत्सरेषु इन्द्रः पर्याप्तं वर्षति । जनाः आतङ्करहिताः भयरहिताश्च भवन्ति। अन्त्ये वर्षद्वये अर्थात् युवा - सुधातासंवत्सरेः शोभना वृष्टिः समा भवति। अर्थात् नात्यधिका नात्यल्पा यथाकालोपयोग्या। किन्तु अत्रास्मिन् वर्षद्वये अर्थात् युवा-सुधाता संवत्सत्योः रोगाः भवन्ति। तथा संग्रामस्य (युद्धस्य) आगमः भवति।

१२.६ तृतीयचतुर्थयुगान्तर्गतानां संवत्सराणां नामानि फलानि च

शाक्रे युगे पूर्वमधेश्वराख्यं वर्षं द्वितीयं बहुधान्यमाहुः।
प्रमाथिनं विक्रमनप्यधान्यद् वृषं च विन्द्याद् गुरुचारयोगात्॥
आद्यं द्वितीयं च शुभे तु वर्षे कृतानुकारं कुरुतः प्रजानाम्।
पापः प्रमाथी वृषविक्रमौ तु सुभिक्षदौ रोगभयप्रदौ च॥

अन्वयः – शाक्रे युगे पूर्वं ईश्वरः द्वितीयं बहुधान्यः गाहुः प्रमाथिनं विक्रमम् अपि अन्यद वृषं गुरुचारयोगात् विन्द्यात्। आद्यं द्वितीयं च शुभे प्रजानाम् कृत्तानुकारं कुरुतः, प्रमाथी पापः, वृषविक्रमौ तु सुभिक्षदौ रोगभयप्रदौ च।

प्रतिपदार्थः – शाक्रे = इन्द्रे, पूर्वं = प्रथमं, ईश्वरः = ईश्वरसंज्ञम्, बहुधान्यः = बहुधान्यसंज्ञकसंवत्सरः, माहुः = उक्तवन्तः, प्रमाथिनं = प्रमाथिसंज्ञकसंवत्सरः, विक्रमम् = विक्रमसंज्ञकसंवत्सरः, अन्यद् = अन्तिमं, वृषं = वृषसंज्ञकसंवत्सरः, गुरुचारयोगात् = बृहस्पतिः-चारसंयोगात्, विन्द्यात् = जानीयात्, आद्यं = प्रथमः, शुभे = प्रशस्तफले, प्रजानाम् = लोकानां, कृतानुकारं = कृत्तयुगस्यानुकारं, प्रभाथी = प्रमाघी-संज्ञकसंवत्सरः, पापः = अनिष्टफलं, वृषविक्रमौ = वृषविक्रमसंज्ञकसंवत्सरौ, सुभिक्षदौ = सुभिक्षं ददतः, रोगभयप्रदौ = रोगभयं कुरुतः।

व्याख्या – ततः वराहमिहिराचार्यः तृतीययुगान्तर्गतानां संवत्सराणां नामानि फलानि च कथयति। इन्द्रनामकयुगे प्रथमः वर्षः ईश्वरः भवति। द्वितीयवर्षः बहुधान्यनामकः संवत्सरः, तृतीयवर्षः प्रमाघनामकसंवत्सरः, चतुर्थवर्षः विक्रमनामकसंवत्सरः अन्तिमः अर्थात् पञ्चवर्षः वृषनामकः संवत्सरः तान् बृहस्पतिचारसंयोगात् जानीयात्। यतो बृहस्पत्यैव मानेन एतानि वर्षाणि भवन्ति। यस्मिन् काले गुरुरादिव्यमण्डलाद् उदेति तस्मिन्नेव काले वर्षप्रवृत्तिः। प्रथमवर्षे द्वितीयवर्षे अर्थात् ईश्वरः बहुधान्योः संवत्सरो शुभं भवति। लोकानां जनानां कृतयुगस्य अनुकारं कुरुतः। अर्थात् सत्युगे यथा सर्वे जनाः धर्मरताः, सुखिताः, दीर्घजीविनः भवन्ति। प्रमाधीनामकसंवत्सरः

अनिष्टफलदायी भवा। वृषविक्रमनामकसंवत्सरौ सुभिक्षं ददतः, किन्तु रोगभयं कुरुतः। ततः आचार्यः चतुयुगान्तर्गताना संवत्सराणां नामानि फलानि च कथयति।

श्रेष्ठं चतुर्थस्य युगस्य पूर्वं यच्चित्रभानुं कथयन्ति वर्षम्।
मध्यं द्वितीयं तु सुभानुसञ्ज्ञं रोगप्रदं मृत्युकरं नतं च॥
तारणं तदनु भूरिवारिदं सस्य वृद्धिमुदितातिपार्थिवम्।
पञ्चमं व्ययमुशन्ति शोभनं मन्मथप्रबलमुत्सवाकुलम्॥

अन्वयः – चतुर्थस्य युगस्य पूर्वं वर्षं यच्चित्रभानुं श्रेष्ठं कथयन्ति, द्वितीयं तु सुभानुसंज्ञं मध्यं, नतं रोगप्रदं मृत्युकरं च, तदनु तारणं भूरिवादिं सस्यवृद्धिः मुदितातिपार्थिवं, पञ्चमं व्ययम् शोभनं मुशन्ति मन्मथप्रबलम् उत्सवैः आकुलम्।

प्रतिपदार्थः – चतुर्थस्य युगस्य = हुताशाख्यस्य युगस्य, पूर्वं = प्रथमम्, चित्रभानुः = चित्रभानुनामकसंवत्सरः, श्रेष्ठं = उत्तमम्, कथयन्ति = प्रवदन्ति, द्वितीयं = सुभानुसंज्ञं = चतुर्थस्य युगस्य द्वितीय संवत्सरः सुभानुसंज्ञं, मध्यम् = मध्यफलम्, नतं = नतसंज्ञकसंवत्सरः, रोगप्रदः = रोगान् ददाति, मृत्युकरं = मृत्युं च करोति। तदनु = पश्चाद् तारणम् = तारणनामकसंवत्सरः, भूरि = बहु, वारि = जलं, सस्यवृद्धिः = सस्यानां धाान्यानां वृद्धिः, मुदितातिपार्थिवं = मुदितो हृष्टोऽतीवात्यर्थं पार्थिवो राजा च पत्रं, व्ययम् = व्ययसंज्ञकसंवत्सरः, शोभनं = श्रेष्ठं, मुशन्ति = कथयन्ति, मन्मथप्रबलम् = मन्मथः कामः प्रबल उद्धतो यस्मिन् वर्षे तत् उत्सवैः = विवाहादिभिः, आकुलं = सोद्यमम्।

व्याख्या – आचार्यचतुर्थस्य युगस्य प्रथमं वर्षं चित्रभानुसंज्ञं तत् शुभं प्रवदन्ति। तस्यैव द्वितीयं सुभानुसंज्ञं तच्च मध्यफलदायकं भवति। तृतीयसंवत्सरः नतसंज्ञम् वा तारणसंज्ञः तच्च रोगान् ददाति मृत्युं च करोति। तस्य तृतीयस्य वर्षस्य पश्चात् चतुर्थं वर्षं पार्थिवनामसंज्ञं तच्च बहु जलं ददाति। तथा सस्यानां वृद्धिः, राजा अत्यधिकं प्रमुदितं भवति। पञ्चमं वर्षं व्ययसंज्ञं तच्च श्रेष्ठं कथयन्ति। अस्मिन् वर्षे कार्यस्य प्रबलता, विवाहादिभिः च आकुलं भवति।

१२.७ पञ्चमषष्ठयुगान्तर्गतानां संवत्सराणां नामानि फलानि च

त्वाष्ट्रे युगे सर्वजिदाद्य उक्तः संवत्सरोऽन्यः खलु सर्वधारी।
तस्माद्विरोधी विकृतः खरश्च शस्तो द्वितीयोऽत्र भयाय शेषाः॥

अन्वयः – त्वाष्ट्रे युगे आद्यः संवत्सरः सर्वजिद् उक्तः अन्यः खलु सर्वधारी तस्मात् विरोधी विकृतः खरश्च शस्तो द्वितीयः, अत्र शेषाः भयाय।

प्रतिपदार्थः – त्वाष्ट्रे युगे = त्वाष्ट्रनामके युगे, आद्यः = प्रथमः, संवत्सरः = वर्षः, सर्वजित् = सर्वजित् नामक संवत्सरः, उक्तः = कथितः, अन्यः = द्वितीयः, सर्वधारी = सर्वधरीनामक संवत्सरः, तस्मात् = द्वितीयात् परतः तृतीयो, विरोधी = विरोधीनामकसंवत्सरः, विकृतः = विकृतनामक संवत्सरः, खरः = खरनामकसंवत्सरः, शस्तो = शुभः, द्वितीयः = त्वाष्ट्रनामकस्य युगस्य द्वितीयवर्षः सर्वधारी, भयाय = भयं कुर्वन्ति, शेषाः = प्रथमतृतीयचतुर्थपञ्चमाः।

व्याख्या – वराहमिहिराचार्यः पञ्चमस्य युगस्य नामानि फलानि च कथयति यत् त्वाष्ट्रे युगे प्रथमः संवत्सरः सर्वजिन्नाम्नः कथितः। द्वितीयः सर्वधारीनामकसंवत्सरः, द्वितीयात् परतः तृतीयो विरोधीनामकसंवत्सरः भवति। चतुर्थः विकृतनामकसंवत्सर पञ्चमः खरनामकसंवत्सरः भवति। अत्र अस्मिन् युगे द्वितीयवर्षः सर्वधारी अस्ति। सः शुभकारी भवति। शेषाः अर्थात् प्रथम सर्वजित् , तृतीयः विरोधी , चतुर्थः विकृतः, पञ्चमः खरः एते भयं कुर्वन्ति। ततो आचार्यः अग्रिमयुगानां नामानि फलानि च कथयति।

युवासंज्ञकसंवत्सरः, सुधाता = सुधातासंज्ञक संवत्सरः, त्रीणि = अङ्गिरा-श्रीमुख-भावसंवत्सराणि शस्तानि = शोभनानि, परे = पश्चिमे, द्वे = युवा-सुधातासंवत्सरौ, समे = न शुभे नापि अशुभे, आद्येषु = प्रथमेषु, त्रिषु = अङ्गिरा-श्रीमुख-भावसंवत्सरेषु, देवः = इन्द्रः, निकामं = पर्याप्तं, वर्षो = वर्षति, लोकः = जनः, निरातङ्कभ्यः = आतङ्क उपद्रवो भयं भीतिश्च निर्गता अतिवघमानायस्य, अन्त्ये = पश्चिमे, अब्दद्वये = युग्मद्वये = युग्मवर्षे युवा - सुधातासंवत्सरे, सुवृष्टिः = शोभना वृष्टिः, समा = तुल्या (औसतम्) अर्थात् नातिवह्वी नाति-अल्पा यथा कालोपयोग्या, वर्षद्वये = युवा-सुधातसंवत्सरौ, रोगाः = गदाः, समरागमश्च = समरः संग्रामः तस्य आगमः प्राप्तिः।

व्याख्या – वराहमिहिराचार्यः द्वितीययुगान्तर्गतानां संवत्सराणां नामानि फलानि च कथयति। द्वितीये बार्हस्पत्ययुगे प्रथमोऽब्दोऽङ्गिराः, द्वितीयः श्रीमुखः, तृतीयो भावः, चतुर्थो युवा, पञ्चमः सुधाता एतानि पञ्चवर्षाणि यथाक्रमेण परिपठितानि स्थितानि। अत्र अस्मिन् युगे त्रीणि वर्षाणि अर्थात् अङ्गिरा-श्रीमुख-भावसंवत्सराणि शोभनानि भवन्ति। परे अर्थात् पश्चिमे युवा-सुधाता द्वे वर्षे समे अर्थात् न शुभं नापि अशुभं भवतः। प्रथमेषु त्रिषु वर्षेषु अर्थात् अङ्गिरः, श्रीमुखभावसंवत्सरेषु इन्द्रः पर्याप्तं वर्षति । जनाः आतङ्करहिताः भयरहिताश्च भवन्ति। अन्त्ये वर्षद्वये अर्थात् युवा - सुधातासंवत्सरेः शोभना वृष्टिः समा भवति। अर्थात् नात्यधिका नात्यल्पा यथाकालोपयोग्या। किन्तु अत्रास्मिन् वर्षद्वये अर्थात् युवा-सुधाता संवत्सत्योः रोगाः भवन्ति। तथा संग्रामस्य (युद्धस्य) आगमः भवति।

१२.६ तृतीयचतुर्थयुगान्तर्गतानां संवत्सराणां नामानि फलानि च

शाक्रे युगे पूर्वमथेश्वराख्यं वर्षं द्वितीयं बहुधान्यमाहुः।
प्रमाथिनं विक्रमनप्यधान्यद् वृषं च विन्द्याद् गुरुचारयोगात्॥
आद्यं द्वितीयं च शुभे तु वर्षे कृतानुकारं कुरुतः प्रजानाम्।
पापः प्रमाथी वृषविक्रमौ तु सुभिक्षदौ रोगभयप्रदौ च॥

अन्वयः – शाक्रे युगे पूर्वं ईश्वरः द्वितीयं बहुधान्यः गाहुः प्रमाथिनं विक्रमम् अपि अन्यद वृषं गुरुचारयोगात् विन्द्यात्। आद्यं द्वितीयं च शुभे प्रजानाम् कृत्तानुकारं कुरुतः, प्रमाथी पापः, वृषविक्रमौ तु सुभिक्षदौ रोगभयप्रदौ च।

प्रतिपदार्थः – शाक्रे = इन्द्रे, पूर्वं = प्रथमं, ईश्वरः = ईश्वरसंज्ञम्, बहुधान्यः = बहुधान्यसंज्ञकसंवत्सरः, माहुः = उक्तवन्तः, प्रमाथिनं = प्रमाथिसंज्ञकसंवत्सरः, विक्रमम् = विक्रमसंज्ञकसंवत्सरः, अन्यद् = अन्तिमं, वृषं = वृषसंज्ञकसंवत्सरः, गुरुचारयोगात् = बृहस्पतिः-चारसंयोगात्, विन्द्यात् = जानीयात्, आद्यं = प्रथमः, शुभे = प्रशस्तफले, प्रजानाम् = लोकानां, कृतानुकारं = कृत्तयुगस्यानुकारं, प्रभाथी = प्रमाघी-संज्ञकसंवत्सरः, पापः = अनिष्टफलं, वृषविक्रमौ = वृषविक्रमसंज्ञकसंवत्सरौ, सुभिक्षदौ = सुभिक्षं ददतः, रोगभयप्रदौ = रोगभयं कुरुतः।

व्याख्या – ततः वराहमिहिराचार्यः तृतीययुगान्तर्गतानां संवत्सराणां नामानि फलानि च कथयति। इन्द्रनामकयुगे प्रथमः वर्पः ईश्वरः भवति। द्वितीयवर्षः बहुधान्यनामकः संवत्सरः, तृतीयवर्षः प्रमाघनामकसंवत्सरः, चतुर्थवर्पः विक्रमनामकसंवत्सरः अन्तिमः अर्थात् पञ्चवर्पः वृषनामकः संवत्सरः तान् बृहस्पतिचारसंयोगात् जानीयात्। यतो बृहस्पत्यैव मानेन एतानि वर्षाणि भवन्ति। यस्मिन् काले गुरुरादिव्यमण्डलाद् उदेति तस्मिन्नेव काले वर्षप्रवृत्तिः। प्रथमवर्षे द्वितीयवर्षे अर्थात् ईश्वरः बहुधान्योः संवत्सरो शुभं भवति। लोकानां जनानां कृतयुगस्य अनुकारं कुरुतः। अर्थात् सत्युगे यथा सर्वे जनाः धर्मरताः, सुखिताः, दीर्घजीविनः भवन्ति। प्रमाधीनामकसंवत्सरः

अनिष्टफलदायी भवी। वृषविक्रमनामकसंवत्सरौ सुभिक्षं ददतः, किन्तु रोगभयं कुरुतः। ततः आचार्यः चतुयुगान्तर्गताना संवत्सराणां नामानि फलानि च कथयति।

श्रेष्ठं चतुर्थस्य युगस्य पूर्वं यच्चित्रभानुं कथयन्ति वर्षम्।
मध्यं द्वितीयं तु सुभानुसञ्ज्ञं रोगप्रदं मृत्युकरं नतं च॥
तारणं तदनु भूरिवारिदं सस्य वृद्धिमुदितातिपार्थिवम्।
पञ्चमं व्ययमुशन्ति शोभनं मन्मथप्रबलमुत्सवाकुलम्॥

अन्वयः – चतुर्थस्य युगस्य पूर्वं वर्षं यच्चित्रभानुं श्रेष्ठं कथयन्ति, द्वितीयं तु सुभानुसंज्ञं मध्यं, नतं रोगप्रदं मृत्युकरं च, तदनु तारणं भूरिवादिं सस्यवृद्धिः मुदितातिपार्थिवं, पञ्चमं व्ययम् शोभनं मुशन्ति मन्मथप्रबलम् उत्सवैः आकुलम्।

प्रतिपदार्थः – चतुर्थस्य युगस्य = हुताशाख्यस्य युगस्य, पूर्वं = प्रथमम्, चित्रभानुः = चित्रभानुनामकसंवत्सरः, श्रेष्ठं = उत्तमम्, कथयन्ति = प्रवदन्ति, द्वितीयं = सुभानुसंज्ञं = चतुर्थस्य युगस्य द्वितीय संवत्सरः सुभानुसंज्ञं, मध्यम् = मध्यफलम्, नतं = नतसंज्ञकसंवत्सरः, रोगप्रदः = रोगान् ददाति, मृत्युकरं = मृत्युं च करोति। तदनु = पश्चाद् तारणम् = तारणनामकसंवत्सरः, भूरि = बहु, वारि = जलं, सस्यवृद्धिः = सस्यानां धाान्यानां वृद्धिः, मुदितातिपार्थिवं = मुदितो हृष्टोऽतीवात्यर्थं पार्थिवो राजा च पत्रं, व्ययम् = व्ययसंज्ञकसंवत्सरः, शोभनं = श्रेष्ठं, मुशन्ति = कथयन्ति, मन्मथप्रबलम् = मन्मथः कामः प्रबल उद्धतो यस्मिन् वर्षे तत् उत्सवैः = विवाहादिभिः, आकुलं = सोद्यमम्।

व्याख्या – आचार्यचतुर्थस्य युगस्य प्रथमं वर्षं चित्रभानुसंज्ञं तत् शुभं प्रवदन्ति। तस्यैव द्वितीयं सुभानुसंज्ञं तच्च मध्यफलदायकं भवति। तृतीयसंवत्सरः नतसंज्ञम् वा तारणसंज्ञः तच्च रोगान् ददाति मृत्युं च करोति। तस्य तृतीयस्य वर्षस्य पश्चात् चतुर्थं वर्षं पार्थिवनामसंज्ञं तच्च बहु जलं ददाति। तथा सस्यानां वृद्धिः, राजा अत्यधिकं प्रमुदितं भवति। पञ्चमं वर्षं व्ययसंज्ञं तच्च श्रेष्ठं कथयन्ति। अस्मिन् वर्षे कार्यस्य प्रबलता, विवाहादिभिः च आकुलं भवति।

१२.७ पञ्चमषष्ठयुगान्तर्गतानां संवत्सराणां नामानि फलानि च

त्वाष्ट्रे युगे सर्वजिदाद्य उक्तः संवत्सरोऽन्यः खलु सर्वधारी।
तस्माद्विरोधी विकृतः खरश्च शस्तो द्वितीयोऽत्र भयाय शेषाः॥

अन्वयः – त्वाष्ट्रे युगे आद्यः संवत्सरः सर्वजिद् उक्तः अन्यः खलु सर्वधारी तस्मात् विरोधी विकृतः खरश्च शस्तो द्वितीयः, अत्र शेषाः भयाय।

प्रतिपदार्थः – त्वाष्ट्रे युगे = त्वाष्ट्रनामके युगे, आद्यः = प्रथमः, संवत्सरः = वर्षः, सर्वजित् = सर्वजित् नामक संवत्सरः, उक्तः = कथितः, अन्यः = द्वितीयः, सर्वधारी = सर्वधारीनामक संवत्सरः, तस्मात् = द्वितीयात् परतः तृतीयो, विरोधी = विरोधीनामकसंवत्सरः, विकृतः = विकृतनामक संवत्सरः, खरः = खरनामकसंवत्सरः, शस्तो = शुभः, द्वितीयः = त्वाष्ट्रनामकस्य युगस्य द्वितीयवर्षः सर्वधारी, भयाय = भयं कुर्वन्ति, शेषाः = प्रथमतृतीयचतुर्थपञ्चमाः।

व्याख्या – वराहमिहिराचार्यः पञ्चमस्य युगस्य नामानि फलानि च कथयति यत् त्वाष्ट्रे युगे प्रथमः संवत्सरः सर्वजिन्नाम्नः कथितः। द्वितीयः सर्वधारीनामकसंवत्सरः, द्वितीयात् परतः तृतीयो विरोधीनामकसंवत्सरः भवति। चतुर्थः विकृतनामकसंवत्सर पञ्चमः खरनामकसंवत्सरः भवति। अत्र अस्मिन् युगे द्वितीयवर्षः सर्वधारी अस्ति। सः शुभकारी भवति। शेषाः अर्थात् प्रथम सर्वजित् , तृतीयः विरोधी , चतुर्थः विकृतः, पञ्चमः खरः एते भयं कुर्वन्ति। ततो आचार्यः अग्रिमयुगानां नामानि फलानि च कथयति।

नन्दनोऽथ विजयो जयस्तथा मन्मथोऽस्य परतश्च दुर्मुखः।
कान्तमत्र युग आदितस्त्रयं मन्मथः समफलोऽथमोऽपरः॥

अन्वयः – नन्दनो अथ विजयो जयः तथा मन्मथो अस्य परतश्च दुर्मुखः, आदितः त्रयं कान्तं मन्मथः समफलः अपरश्च अधमः।

प्रतिपदार्थः – नन्दनो = षष्ठस्य युगस्य प्रथमसंवत्सरः नन्दनः, विजयः = विजयनामकसंवत्सरः, जपः = जपनामकसंवत्सरः, मन्मथो = मन्मथनामकसंवत्सरः, परतः = अनन्तरं, दुर्मुखः = दुर्मुखः नामकसंवत्सरः, आदितः = आदौ प्रथमं, त्रयं = वर्षत्रयं, कान्तं = शुभम्, मन्मथः = मन्मथनामक संवत्सरः, समफलः = न शुभो नापि अशुभः, अपरः = पश्चाद्, अधमः = अशुभफलम्।

बोधप्रश्नाः

१. षष्ट्यब्दस्य प्रथमवर्षः किम्?

२. द्वितीययुगस्य किं नाम?

३. देवस्य कोऽर्थः?

४. तृतीययुगे कति संवत्वराणि सन्ति?

५. चतुर्थयुगस्य अन्तिमा संख्या का?

६. त्रिभानुनामकसंवत्सरः कीदृशं फलं ददाति?

१२.८ सप्तमाष्टमयुगान्तर्गतानां सवत्सराणां फलानि

ततः आचार्यः सप्तमयुगस्य फलं कथयति –

हेमलम्ब इति सप्तमे युगे
स्याद्विलम्बिपरतो विकारि च।
शर्वरीति तदनु प्लवः स्मृतो-
वत्सरो गुरुवशेन पञ्चमः॥
इतिप्राया प्रचुरपवना वृष्टिरब्दे तु पूर्वे
मन्दं सस्यं न बहुसलिलं वत्सरेऽतो द्वितीये।
अत्युद्वेगः प्रचुरसलिलं स्यात्तृतीयश्चतुर्थो
दुर्भिक्षाय प्लव इति ततः शोभनो भूरितोयः॥

अन्वयः – सप्तमे युगे हेमलम्बः इति स्यात् विलम्बि परतो विकारि शर्वरीति तदनु पञ्चमः प्लवः वत्सरः स्मृतः गुरुवशेन। पूर्वे अब्दे तु इति प्राया प्रचुर-पवना वृष्टिः, अतो द्वितीये वत्सरे मन्दं सस्यं न बहुसलिलं, तृतीयः अत्युद्वेगः प्रचुरसलिलं स्यात्, चतुर्थो दुर्भिक्षाय ततः प्लवः इति शोभनः भूरितोयः।

प्रतिपदार्थः – सप्तमे = पैत्रे युगे, हेमलम्बः = हेमलम्बः नामकसंवत्सरः सः प्रथमः, स्यात् = भवेत्, विलम्बि = विलम्बिनामकसंवत्सरः, परतः = अनन्तरं, विकारी = विकारीनामकसंवत्सरः, शर्वरी = शर्वरीनामकसंवत्सरः, तदनु = तत्पश्चात्, प्लवः = प्लवनामकसंवत्सरः, वत्सरः = वर्षः, स्मृतः = उक्तः, गुरुवशेन = बृहस्पतिचारयोगात्, पूर्वे = प्रथमे, अब्दे = वर्षे, इति प्राया = अतिवृष्ट्या आसयः, प्रचुरपवना = बहुवाता (बहुवायुः),

वृष्टिः = वर्षा द्वितीयवत्सरे = द्वितीये संवत्सरे , मन्दं = अल्पं, सस्यं = धान्यः, बहुसत्तिलं = प्रभूतजलं, अत्युद्वेगः = प्रभूतदोबदः, प्रचुरसलिलं = प्रभूतजलम्, स्यात् = भवेत्, ततः = अनन्तरं, प्लवः = प्लवनामकसंवत्सरः, शोभनः = श्रेष्ठः, भूरितोयः = बहुजलम्।

व्याख्या – आचार्यः सप्तमयुगस्य फलं कथयति। सप्तमयुगः पैत्रनामकः भवति। पैत्रयुगस्य प्रथमसंवत्सरः हेमलम्बः भवति। द्वितीयसंवत्सरः विलम्बि, तृतीयो विकारी, चतुर्थः शर्वरी, तत्पश्चात् पञ्चमः संवत्सरः प्लवः इति उक्तः। ते सर्वे बृहस्पतिचारयोगात् भवन्ति।

पैत्रयुगस्य प्रथमे वर्षे अतिवृष्ट्या उपद्रवाबहुला बहुवायुवशात् च वृष्टिः भवति। पैत्रयुगस्य द्वितीये संवत्सरे अर्थात् विलम्बिसंज्ञकसंवत्सरे अल्पधान्यं न प्रभूतजलं च भवति। पैत्रयुगस्य तृतीयेवर्षे अर्थात् विकारिसंज्ञकसंवत्सरे प्रभूतदोषदः प्रभूतं जलं च भवेत्। पैत्रेयुगस्य चतुर्थे संवत्सरे अर्थात् शर्वरिसंज्ञकसंवत्सरे दुर्भिक्षाय भवति। पैत्रयुगस्य पञ्चमे वर्षे अर्थात् प्लवसंज्ञकसंवत्वरे श्रेष्ठः बहुजलञ्च भवति। ततः अष्टमयुगस्य फलं कथयति।

वैश्वे युगे शोकहृदित्यथाद्यः
संवत्सरोऽतः शुभकृद् द्वितीयः।
क्रोधी तृतीयः परतः क्रमेण
विश्वावसुश्चेति पराभवश्च॥
पूर्वापरौ प्रीतिकरौ प्रजाना-
मेषां तृतीयो बहुदोषदोऽब्दः।
अन्त्यौ समौ किन्तु पराभवेऽग्निः
शस्त्राभयार्तिद्विजगोभयं च॥

अन्वयः – वैश्वे युगे आद्यः शोकहृदिति संवत्सरः अतः द्वितीयः शुभकृद् तृतीयः क्रोधी परतः क्रमेण विश्वावसुः चेति पराभवः। पूर्वापरौ प्रजानां प्रीतिकरौ एषां तृतीय अब्दः बहुदोषः अन्त्यौ समौ किन्तु पराभवेऽग्निः शस्त्राभयार्तिः द्विजगोभयं च।

प्रतिपदार्थः – वैश्वे = अष्टमयुगे वैश्वे आद्यः = प्रथमः, शोकहृदिति = शोकहृत्नामकसंवत्सरः, केचिच्छोककृदिति पठन्ति। संवत्सरः = वर्षः, द्वितीयः शुभकृद् = द्वितीयसंवत्सरः शुभकृद्, तृतीयः क्रोधी = तृतीयसंवत्सरः क्रोधी परतः = अनन्तरम्, विश्ववसुः = चतुर्थसंवत्सरः विश्ववसुः संज्ञः, पराभवः = वैश्वयुगस्य पञ्चमः संवत्सरः, पूर्वापरौ = प्रथमद्वितीयाब्दौ प्रजानां = जनानां, प्रीतिकरौ = प्रसन्नकरौ, तृतीयाब्दः = तृतीयसंवत्सर क्रोधी, बहुदोषदः = अशुभान् ददाति, अन्त्यौ = पश्चिमौ चतुर्थपञ्चमौ, समौ = समफलौ, पराभवेऽग्निः = अग्निभयं, शस्त्राभयार्तिः = शस्त्रेण पीडा भवति, द्विजगोभयं = द्विजानां ब्राह्मणानां गवां च भयं भवति।

व्याख्या – आचार्यः अष्टमयुगस्य वैश्वस्य फलं कथयति। वैश्वयुगे प्रथमः संवत्सरः शोकहृत् अस्ति। परन्तु सम्प्रति सर्वत्रास्य शुभकृत् इति प्रसिद्धं नाम शोकं कृन्तति छिनतीति शोककृत्। अष्टमयुगस्य द्वितीयः संवत्सरः शुभकृत्, तृतीयः क्रोधी, अनन्तरं क्रमेण चतुर्थः विश्वावसुः, पञ्चमः पराभवः भवन्ति। प्रथमद्वितीयाब्दौ अर्थात् शोकहृत्शोभकृतौ जनानां प्रीतिकरौ भवतः। एषां सर्वेषां पञ्चानां क्रोधी यो वर्षः तृतीयः स बहुदोषान् अशुभान् ददाति। पश्चिमौ चतुर्थपञ्चमौ विश्वावसु-पराभवौ समफलौ न शुभौ नापि अशुभौ भवतः। किन्तु अत्र वर्षद्वये अग्निभयं भवति। तथा शस्त्रेण पीडा भवति। तथा ब्राह्मणेभ्यो गवेभ्यो च भयं भवति।

१२.९ नवमदशमयुगान्तर्गतानां संवत्सराणां फलानि

आद्यः प्लवङ्गो नवमे युगेऽब्दः स्यात् कीलकोऽस्यः परतश्च सौम्यः।
साधारणो रोधकृदित्यथैवं शुभप्रदौ कीलकसौम्यसंज्ञौ।

कष्टः प्लवङ्गो बहुशः प्रजानां साधारणेऽल्पं जलमीतपश्च।
यः पञ्चमो रोधकृदित्यथाब्दश्चित्रं जलं तत्र च सस्य सम्पत्॥

अन्वयः – नवमे युगे आद्यः अब्दः प्लवङ्गः स्यात् अन्यः कीलकः परतश्च सौम्यः, साधारणो रोधकृद् इत्येवं कीलकसौम्यसंज्ञौ शुभप्रदौ प्लवङ्गो प्रजानां बहुशो कष्टः साधारणे अल्पं जलम् ईतयश्च य पञ्चमो अब्दः रोधकृदिति चित्रं जलं तत्र सस्य सम्पत् च।

प्रतिपदार्थः – नवमे युगे = सोमसंज्ञकनवमे युगे, आद्यः = प्रथमः, अब्दः = वर्षः, प्लवङ्ग = प्लवङ्गसंज्ञकसंवत्सरः, स्यात् = भवेत्, अन्यः = द्वितीयः, कीलकः = कीलकसंज्ञकसंवत्सरः, परतः = अनन्तरं, सौम्यः = सौम्यसंज्ञकसंवत्सरः, साधारणः = साधारणसंज्ञकसंवत्सरः, रोधकृत् = रोधकृत् संज्ञकसंवत्सरः, शुभप्रदौ = श्रेष्ठौ, प्रजानां = जनानां, बहुशोः = बहुप्रकारः, कष्टः = अशुभः, अल्पः = स्वल्पः, ईतयः = अतिवृष्ट्यादय उपद्रवाः, अब्दः = वर्षः, चित्रं = नानाप्रकारकं, सस्यः = धान्यः, सम्पत् = कोशः।

व्याख्या – भवान् अष्टमयुगस्य फलं पठितवान्। सम्प्रति आचार्यः नवमयुगस्य फलं कथयति। यत् सोमे नवमे युगे प्रथमः सम्वत्सरः प्लवङ्गः भवति। द्वितीयः कीलकसंज्ञकसंवत्सरः अनन्तरं तृतीयः सौम्यसंज्ञकसंवत्सरः, चतुर्थः साधारणसंज्ञकसंवत्सरः, पञ्चमः रोधकृत्संज्ञकसंवत्सरः भवति। तत्र तेषु कीलकसौम्यसंज्ञौ शुभप्रदौ भवतः। प्लवङ्गसंज्ञकसंवत्सरे प्रजानां बहुप्रकारं कष्टं भवति। साधारणसंज्ञकसंवत्वरे अल्पं जलं वा अतिवृष्ट्यः उपद्रवाः भवन्ति। अथानन्तरं यः पञ्चमेऽब्दौ रोधकृतिति तत्र तस्मिन्नब्दे नानाप्रकारं जलं क्वचित्क्वचित्वर्षति। तथा सस्यानां सम्पच्च भवति। ततः दशमस्य युगस्य फलं कथयति।

इन्द्राग्निदैवं दशमं युगं यत्तत्राधवर्षं परिधाविसंज्ञम्।
प्रमादिनं विक्रममप्यतोऽन्यत् स्याद्राक्षसश्च चानलसंज्ञितं च॥

परिधाविनि मध्यदेशनाशो नृपहानिर्जलमल्पमग्निकोपः।
अलसस्तु जनः प्रमादिसंज्ञे उभरं रक्तकपुष्पबजीनाशः॥
विक्रमः सकललोकनन्दनो राक्षसः क्षयकरोऽनलस्तथा।
ग्रीष्मधान्यजननोऽत्र राक्षसो वह्निकोपमरकप्रदोऽनलः॥

अन्वयः – दशमं युगं इन्द्राग्निदैवं यत्तत्र आद्यवर्षं परिधाविसंज्ञम् प्रमादिनं अतो अन्यत् विक्रमं स्यात् राक्षसं च अनलर्सज्ञितं च, परिधाविनि मध्यप्रदेशनाशो नृपहानिः जलमल्पम् अग्निकोपः प्रमादिसंज्ञे जनः अलसस्तु ठमरं रक्तकपुष्पबीजनाशः विक्रमः सकललोकनन्दनो राक्षसः क्षयकरोऽनलस्तथा ग्रीष्मधान्यजननोऽत्र अनलः राक्षसो वह्निकोपमरकप्रदः।

प्रतिपदार्थः – इन्द्राग्निदैवं = इन्द्राग्निदैवं युगं, आद्यवर्षं = प्रथमसंवत्सरः, परिधाविसंज्ञम् = परिधाविसंज्ञकसंवत्सरः, प्रमादिनं = प्रमादिसंज्ञकसंवत्सरः, अतो = अस्मात्, अन्यत् = अनन्तरं, विक्रमं = विक्रमसंज्ञकसंवत्सरः, स्यात् = भवेत्, राक्षसं = राक्षससंज्ञकसंवत्सरः, अनलर्सज्ञितं = अनलसंज्ञकसंवत्सरः, मन्यदेशनाशो = परिशिष्टे अस्ति। नृपहानिः राज्ञो मरणं, जलमल्पम् = स्वल्पजलम् अग्निकोपः = वह्निभयम्, जनः = लोकः, अलसः = आलस्यः, डमरं = कलहः सशस्त्रः, रक्तकपुष्पबीजनाशः = रक्तकपुष्पाणं येषां वृक्षाणां लोके रक्तपुष्पं भवति , तथा रक्तकबीजानां च नाशो भवति। सकललोकनन्दनः = समस्तजनसमृद्धिकरः, क्षयकरः = विनाशकरः, ग्रीष्मधान्यजननो = ग्रीष्मर्तुधान्यानां सम्पत्करः (समृद्धिकरः) वह्निकोपः = अग्निकोपः, मरकपदः = मारकं ददाति।

व्याख्या – वराहमिहिराचार्यः दशमयुगस्य फलं कथयति। द्वादशयुगानां दशमम् युगं इन्द्राग्निदेवं अस्ति। तस्मिन् युगे प्रथमसंवत्सरः परिधाविसंज्ञः, द्वितीय संवत्सरः प्रमादिसंज्ञः,

तस्मात् तृतीयसंवत्सरः विक्रमसंज्ञः, चतुर्थसंवत्सरः, राक्षससंज्ञः, पञ्चमसंवत्सरः अनलसंज्ञः भवति। परिधाविसंवत्सरे मध्यदेशनाशो भवति। मध्यदेशस्य उल्लेखः परिशिष्टे अस्ति। तत्रैव राज्ञो मरणम्, अल्पजलं अग्निभयं च भवति। प्रमादिसंवत्सरे लोकः आलसयुक्तः भवति। तथा सशस्त्रं कलहः, रक्तकपुष्पाणां येषां वृक्षाणां लोके रक्तपुष्पं भवति, तथा रक्तबीजानां च नाशो भवति। विक्रमसञ्ज्ञकसंवत्सरे समस्तजनानां समृद्धिकारकः भवति। राक्षसवर्षः सर्वेषां प्राणिनां कृते विनाशाकरो भवति। अनलस्तेनैव प्रकारेण क्षयकर एव अत्र अस्मिन् युगे राक्षससंवत्सरे ग्रीष्मधान्यानां अर्थात् यवगोधूमादीनां कृते समृद्धिकारकः भवति। तथा अनलसंवत्सरः अग्निप्रकोपः मृत्युकारकः च भवति।

विशेषः – सम्प्रति समस्तप्रमुखज्योतिषग्रन्थेषु विक्रमसंवत्सरस्य अपरसंज्ञा 'आनन्दः संवत्सरः अस्ति परन्तु बृहत्संहितायां वराहमिहिराचार्येण आनन्दस्थाने विक्रमसंवत्सरस्य उल्लेखं कृतम्।

१२.१० एकादशद्वादशयुगान्तर्गतानां संवत्सराणां फलानि

एकादशे पिङ्गलकालयुक्तः सिद्धार्थरौद्राः खलु दुर्मतिश्च।
आद्ये तु वृष्टिर्महती सचौरा श्वासो हनूकम्पयुतश्च कासः॥
यत्कालयुक्तं तदनेकदोषं सिद्धार्थसंज्ञे बहवो गुणाश्च।
रौद्रोऽतिरौद्रः क्षयकृत् प्रदिष्टो यो दुर्मतिर्मध्यमवृष्टिकृत् सः॥

अन्वयः – एकादशे पिङ्गलः कालयुक्तः सिद्धार्थः रौद्रः खलु दुर्मतिश्च आद्ये तु महतीवृष्टि सच्चौरा श्वासो हनूकम्पयुतः च कासः यत् कालयुक्तं तद् अनेकदोषं सिद्धार्थसंज्ञे बहवो गुणाश्च रौद्रः अतिरौद्रः क्षयकृत् प्रदिष्टो यो दुर्मतिः सः मध्यमवृष्टिकृत्।

प्रतिपदार्थः – एकादशे = एकादशे आश्विनयुगे, पिङ्गलः = पिङ्गलसंज्ञकसंवत्सरे, कालयुक्तः = कालयुक्तसंज्ञकसंवत्सरे, सिद्धार्थः = सिद्धार्थसंज्ञकसंवत्सरे, रौद्रः = रौद्रसंज्ञकसंवत्सरे, खलु = खलुशब्दः, आगमद्योतनार्थं, दुर्मतिः = दुर्मतिसंज्ञकसंवत्सरः, आद्ये = प्रथमे, महतीवृष्टिः = अतिवृष्टिः (अत्यधिकवर्षा) सचौरा = तस्करयुक्ता , श्वासो = श्वासरोगम्, हनूकम्पयुतः = मुखादिभागः (ठोढी) हनु तस्य कमपनं हनुकम्पयुतः, कासः = कफरोगविशेषः, अनेकदोषं = बहुदोषप्रदम्, बहवो = प्रभूतः, गुणाः = सम्पदादयः, अतिरौद्रः = बहुदुष्टफलप्रदः, क्षयकृत् = नाशकरः, प्रदिष्टः = उक्तः, मध्यमः = न अल्पं नापि स्वल्पम्, वृष्टिः = जलं (वर्षा) कृत् = करोति।

व्याख्या – भवान् दशमयुगस्य फलं पठितवान् ततः भवान् एकादशयुगस्य फलं पठिष्यति। आचार्यः कथयति यत् एकादशे युगे अर्थात् आश्विनयुगे पिङ्गलसंज्ञकसंवत्सरः, कालयुक्तसंज्ञकसंवत्सरः, सिद्धार्थसंज्ञकसंवत्सरः, रौद्रसंज्ञकसंवत्सरः, दुर्मतिसंज्ञकसंवत्सरः च भवति। आश्विनयुगस्य प्रथमसंवत्सरः पिङ्गलः। तस्मिन् संवत्सरे अतिवृष्टिः, तस्करयुक्ता स्थितिः अर्थात् तस्करा भवन्ति तथा श्वासरोगाः भवन्ति। जनानां हनूकम्पयुतश्च कासः अर्थात् कासपीडा च जनेभ्यो भवति यया हनू (ठोढी) कम्पते। कालयुक्तसंवत्सरे बहुदोषप्रदम्, सिद्धार्थसंवत्सरे बहवः सम्प्रदादयः भवन्ति। यो रौद्रसंज्ञकसंवत्सरः सो अतिदुष्टफलदायक तथा प्रजानां क्षयकरः भवति। यो दुर्मतिसंज्ञकसंवत्सरः स मध्यमां वृष्टिं करोति। ततः द्वादशयुगस्य फलं कथयति।

भाग्ये युगे दुन्दुभिसंज्ञमाद्यं सस्यस्य वृद्धिं महतीं करोति।
अङ्गारसंज्ञं तदनु क्षयाय नरेश्वराणां विषमा च वृष्टिः॥
रक्ताक्षमब्दं कथितं तृतीयं तस्मिन् भयं दृष्ट्रिकृतं गदाश्च।
क्रोधं बहुक्रोधकरं चतुर्थं राष्ट्राणि शून्यीकुरुते विरोधैः॥

अन्वयः – भाग्ये युगे आद्यं दुन्दुभिसंज्ञं सस्यस्य वृद्धिं महतीं करोति, तदनु अङ्गारसंज्ञं नरेश्वराणां क्षयाय विषमा वृष्टिः च तृतीयं वर्षं रक्ताक्षसंज्ञं अब्दं तस्मिन् भयं दृष्ट्रिकृतं गदाश्च कथितं चतुर्थं क्रोधं बहुक्रोधकरं राष्ट्राणि विरोधैः शून्यीकुरुते।

प्रतिपदार्थः – भाग्ये युगे = भाग्यसंज्ञके युगे, आद्यं = प्रथमं दुन्दुभिसंज्ञं = दुन्दुभिसंज्ञकसंवत्सरः, सस्यस्य = धानस्य , वृद्धिं = , महतीं = अतिबह्वी, तदनु = तत्पश्चात्, अङ्गारसंज्ञं = अङ्गारसंज्ञकसंवत्सरः, नरेश्वराणां = राज्ञां, क्षयाय = नाशाय, विषमा = अतुला अतिचण्डा वा, वृष्टिः = वर्षणं, रक्ताक्षसंज्ञं = रक्ताक्षसंज्ञकसंवत्सरः, अब्दं = वर्षम्, भयं = भीतिं, दृष्ट्रिकृतं = सूकरादयस्तत्कृतं भयं, गदा = रोगाः, कथितं = उक्तम्, क्रोधं = क्रोध संज्ञकसंवत्सरः, बहुक्रोधकरं = बहुप्रकारं क्रोधं करोति, राष्ट्राणि = देशाः, विरोधैः = कलहैः, शून्यीकुरुते = अशून्यानि शून्यानि करोतीति शून्यी कुरुते अर्थात् राष्ट्रस्य नाशः जायते।

व्याख्या – भवान् एकादशयुगस्य फलं अधीतवान् ततः भवान् द्वादशयुगस्य फलं पठिष्यति। भाग्यसंज्ञकद्वादशयुगम् भवति। भाग्यसंज्ञकयुगे प्रथमं वर्षं दुन्दुभिसंज्ञं तच्च अतिमहति सस्यवृद्धिं करोति। तत्पश्चात् द्वितीयं वर्षं अङ्गारसंज्ञं तच्च राज्ञां नाक्षाय भवति। वृष्टिश्च अतुला अतिचण्डा वा भवति। तृतीयं वर्षं रक्ताक्षसंज्ञं कथितम्। तस्मिन् वर्षे दृष्ट्रिकृतं भयं भवति अर्थात् दंष्ट्रिणः सूकरादयस्तत्कृतं भयं भवति। तथा रोगाश्च भवन्ति। चतुर्थवर्षं क्रोधसंज्ञं तच्च बहुप्रकारेण लोकानां क्रोधं करोति तथा राष्ट्राणि कलहैः रहितःकुरुते।

विशेषः – वराहमिहिराचार्येण बृहत्संहितायां द्वादशयुगान्तर्गतेषु भाग्यसंज्ञकयुगे द्वितीयवर्षं अङ्गारसंज्ञकं कथितम् परन्तु अन्येषु ग्रन्थेषु रुधिरोद्गारी अस्ति।

१२.१०.१ क्षयसंवत्सरस्य विशेषफलकथनम्

क्षयमिति युगस्यान्त्यस्यान्त्यं बहुक्षयकारकं
जनयति भयं तद्विप्राणां कृषीबलवृद्धिदम्।
उपचयकरं विट्शूद्राणां परस्वाहृतां तथा
कथितमखिलं षष्ट्यब्दे यत्तदत्र समासतः॥

अन्वयः – अन्त्यस्य युगस्य अन्त्यं क्षयमिति तद् बहुक्षयकारकं जनयति। विप्राणां क्षयं कृषीबलवृद्धिदम् विट्शूद्राणां उपचयकरं तथा परस्वहतां अखिलं षष्ट्यब्दे यत् तदत्र समासतः।

प्रतिपदार्थः – क्षयमिति = क्षयसंज्ञकसंवत्सरः, बहुक्षयकारकं = बहुविधं क्षयं करोति, जनयति = उत्पादयति, विप्राणां = ब्राह्मणानां, भयं = भीतिम्, कृषीबलानां = कर्षकाणां वृद्धिदम्, विट्शूद्राणां = वैश्यानां शूद्राणां उपचयकरं = वृद्धिकरम्, परस्वहृतां = परधनहृतृणां अखिलं = सम्पूर्णं, षष्ट्यब्दे = षष्टिसंवत्सरे, समासतः = संक्षेपतः।

व्याख्या – वराहमिहिराचार्यः द्वादशयुगान्तर्गतानां भाग्यसंज्ञकयुगस्य पञ्चमसंवत्सरस्य विशेषफलं कथयति। पञ्चमसंवत्सरः क्षयसंज्ञम्। तच्च बहुविधं जनानां क्षयं करोति। अर्थात् जनान् नाशयति। ब्राह्मणेभ्यो भीतिं अर्थात् भयं उत्पादयति। कर्षकाणां अर्थात् कृषिसम्बन्धिकार्यकतृणां कृते शुभं समृद्धिकारकं च भवति। वैश्यानां कृते उन्नतिकारकं शूद्राणां कृते अपि उन्नतिकारकं च भवति। तथा परकीयधनहर्तृम् अपि वृद्धिं उत्पादयति। वराहमिहिराचार्यः कथयति यत् बृहस्पतिचाराध्याये यत् सम्पूर्णं कथितम् सः संक्षेपरूपेण अस्ति। परन्तु अन्यशास्त्रेषु विस्तृतरूपेण बृहस्पतिचारसंदर्भे कथनं अस्ति। आचार्यः समाससंहितायां कथयति यत् –

ऐन्द्रे तृतीयमशुभं द्वितीयवर्जानि पञ्चमे तु युगे।

पित्र्ये युगे तृतीयं चतुर्थमपि पापदं वर्षम्॥
वैश्ये तृतीयमशुभं शुभदान्युक्तानि चावशेषाणि।
सौम्ये द्वितीयवर्षं शुभावहं यत्तृतीयं तु॥
पथितं शुभमैन्द्राग्नौ तृतीयवर्षं तथाश्विदैवत्ये।
भाग्ये प्रथमं वर्षं षष्ट्यब्दस्यैव संक्षेपः॥

१२.११ गुरोः बिम्बलक्षणं तत्फलञ्च

अकलुषांशुजटिलः पृथुमूर्तिः
कुमुदकुन्दकुसुमस्फटिकाभः।
ग्रहतो न यदि सत्पथवर्ती
हितकरोऽमरगुरुर्मनुजानाम्॥

अन्वयः – अमरगुरुः मनुजनां हितकरः अकलुषांशुःजटिलः पृथमूर्तिः कुमुदः कुन्दकुसुमः स्फटिकः आभा ग्रहहतो न सत्पथवर्ती।

प्रतिपदार्थः – अमरगुरुः = बृहस्पति, मनुजानां = मनुष्याणां, हितकरः = शिवप्रदः कल्याणप्रदः, अकलुषांशु = निर्मलरश्मिः, जटिलः = परिव्याप्तः, पृथुमूर्तिः = विस्तीर्णदेहः, कुमुदः = कुमुदपुष्पः, कन्दकुसुमः = कन्दपुष्पः, स्फटिकः = अतिस्निग्धः, आभा = क्रान्तिः, ग्रहहतो = ग्रहयुद्धे अन्येन ग्रहेण विजितः अर्थात् पराजितो ग्रहः, सत्पथर्वी = ग्रहनक्षत्राणामुत्तरमार्गगोचराणामधिकृतः।

विशेषः – अस्मिन् अध्याये भवान् युगवर्णनं तत् फलं च अधीतवान्। भवान् जानाति यत् द्वादशयुगानि भवन्ति तेषां मध्ये षष्टि-संवत्सराणां संख्या भवति। यथा –

संवत्सराणि		युगानि	संवत्सराणि		युगानि
1.	प्रभवः		19.	पार्थिवः	
2.	विभवः		20.	व्ययः	अग्निः
3.	शुक्लः		21.	सर्वजित्	
4.	प्रमोदः		22.	सर्वधारी	
5.	प्रजापतिः	विष्णुः	23.	विरोधी	
6.	अङ्गिराः		24.	विकृतः	
7.	श्रीमुखः		25.	खरः	त्वष्टा
8.	भावः		26.	नन्दनः	
9.	युवा		27.	विजयः	
10.	धाता	गुरुः	28.	जयः	
11.	ईश्वरः		29.	मन्मथः	
12.	बहुधान्यः		30.	दुर्मुखः	अहिर्बुध्न्यः
13.	प्रमार्थी		31.	हेमलम्वः	

14.	विक्रमः		32.	विलम्बः	
15.	वृषः	इन्द्रः	33.	विकारी	
16.	चित्रभानुः		34.	शर्वरी	
17.	सुभानुः		35.	प्लवः	पितृ
18.	तारणः				
36.	शुभकृत्		37.	शोभकृत्	
38.	क्रोधी		39.	विश्वावसु	
40.	पराभवः	विश्वः	41.	प्लवङ्ग	
42.	कीलकः		43.	सौम्यः	
44.	साधारण		45.	विरोधकृत्	सोमः
46.	परिधावी		47.	प्रमादी	
48.	आनन्दः		49.	राक्षसः	
50.	नलः	इन्द्राग्निः	51.	पिङ्गलः	
52.	कालयुक्तः		53.	सिद्धार्थी	
54.	रौद्रः		55.	दुर्मतिः	आश्विनः
56.	दुःदुभिः		57.	रुधिरोद्गारी	
58.	रक्तक्षः		59.	क्रोधनः	
60.	क्षयः	भाग्यसंज्ञकः			

बोधप्रश्नाः

७. पैत्रयुगस्य प्रथमसंवत्सरः कः?

८. अष्टमयुगस्य किं नाम?

९. विक्रमसंवत्सरे जनानां कारक भवति?

१०. आश्विनयुगस्य संख्याक्रमः लिखतु?

११. भाग्यसंज्ञकयुगस्य पञ्चमसंवत्सरः कः?

१२.१२ सारांशः

अस्मिन् पाठे भवान् बृहस्पतिचारस्य उत्तरार्द्धं अधीतवान्। आचार्येण सम्यक्रूपेण बृहस्पतिचारम् अस्मिन् पाठे प्रतिपादितम्। भवान् पठितवान् यत् द्वादशयुगानि भवन्ति। द्वादशयुगेषु षष्ठिसंवत्सराणां भवन्ति। प्रथमं युगम् विष्णुः भवति। विष्णुयुगे पञ्चसंवत्सराणां संख्या भवति।

१२.१३ शब्दावली

१. पवनः = वायुः।

२. हुताशनः = अग्निः।

३. कोपः = प्रकोपः।

४. गदा = रोगः।

५. शत्रम् = राजवर्गः।

६. लोकः = विश्वः।

७. अब्दद्वये = युग्मवर्षे।

८. समा = तुल्या।

९. शक्रः = इन्द्रः।

१०. प्रजानाम् = लोकानां।

११. श्रेष्ठं = उत्तमम्।

१२. शस्तः = शुभः।

१३. भयं = भीतिं।

१४. अधमः = अशुभः।

१५. प्रचुरपवना = बहुवाता।

१६. मन्दं = अल्पं।

१७. प्रचुरसलिलं = प्रभूतजलम्।

१८. शोभनः = श्रेष्ठः।

१९. उमरं = कलहः।

२०. महतीवृष्टिः = अतिवृष्टिः (अत्यधिका वर्षा)

१२.१४ सन्दर्भग्रन्थः

१. बृहत्संहिता – व्या. डॉ. सुरकान्त झा, चौखम्बा संस्कृत सीरिज-ऑफिस, वाराणसी।

१२.१५सहायकग्रन्थाः

१. बृहत्संहिता– प्रो. नागेन्द्रपाण्डेयः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

२. प्राचीनभारतस्य भौगौलिकस्वरूपम्- डॉ. कृष्णकुमारः, मयंक प्रकाशन, मिश्रबाग, हनुमागगढी, कनखल, हरिद्वार।

३. सूर्यसिद्धान्तः- व्या. पं. कपिलेश्वर शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी।

४. सिद्धान्तशिरोमणिः- व्या. बापूदेवशास्त्री, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, वाराणसी।

५. बृहत्संहिता- व्या. सुरेशचन्द्रमिश्रः, रञ्जन पब्लिकेशन, दरियागंज, नई दिल्ली।

६. संस्कृत -हिन्दी-कोशः- वामनशिवरामआप्टे, मोतीलाल बनारसीदास पब्लिशर्स, प्रा. लि. दिल्ली।

१२.१६ बोधप्रश्नोत्तराणि

१. प्रभवः

२. गुरुः

३. इन्द्रः

४. पञ्च

५. व्ययः

६. शुभफलम्

७. हेमलम्बः

८. विश्वः

९. एकादशः

१०. क्षयः

१२.१७ अभ्यासप्रश्नाः

१. प्रथमयुगस्य सम्पूर्णं फलं वर्णयतु।

२. संवत्सराणां संख्या तेषां नामानि च लिखतु।

३. द्वितीययुगान्तर्गतानां संवत्सराणां फलानि लिखतु।

४. पञ्चमषष्ठयुगान्तर्गतानां संवत्सराणां फलानि प्रतिपाद्यताम्।।

५. नवमदशमयुगान्तर्गतानां संवत्सराणां फलानि विवेच्यताम्।

६. क्षयसंवत्सरस्य विशेषफल लिखतु।

७. गुरोः बिम्बलक्षणं तत्फलञ्च विवेच्यताम्।

◆

स्वप्नः

संस्कृते पारम्परिक-आधुनिकज्ञानवैदुष्यस्य समन्वयनद्वारा
संस्कृतशिक्षायाः वैश्विकपरिप्रेक्ष्यस्य उपस्थानम्।

सङ्कल्पः

- संस्कृतनिष्ठज्ञानसरण्याः उत्तमावबोधस्य सर्जनम्।
- संस्कृतशिक्षान्तर्गतानाम् अभिनवविषयाणां संवर्धनम्।
- आधुनिकसमाजोत्कर्षाय सम्भावनानां प्रकाशनदृष्ट्या संस्कृतभाषायाः तत्साहित्यस्य च प्रासङ्गिकतायाः आविष्करणम्।